

# कवितार्किकसिंह सर्वतन्त्रस्वतन्त्र
# श्रीमद्वेदान्तदेशिक विरचिता अधिकरणसारावलिः



सम्पादक : पी.वी. शठकोपताताचार्यः

Published by :
Sri. V.P T.V . Kainkarya Trust.
Kancheepuram

2-10-2016

**SRI VENKATESWARA VEDIC UNIVERSITY**
Established under AP State Act No.29/2006
Sponsored by TTD and Recognized by UGC
Alipiri-Chandragiri Bypass Road, Tirupati-517502

Prof. K.E. DEVANATHAN
VICE-CHANCELLOR

Tele : 0877 2222586 (O)
2100849 (R)
Fax : 2222587
Mobile : 09989500799
e-mail:vcsvvedicuniversity@gmail.com

श्रीमते रामानुजाय नमः

## அணிந்துரை.

ஸ்வாமி தேசிகன் ஸாதித்தருளிய க்ரந்தங்களில் அதிகரண ஸாராவளிக்கு தனியிடம் உண்டு.ஸ்வாமி ஸ்ரீபாஷ்யத்தை சுருக்கமாக இந்த நூலில் ஸாதித்துள்ளார் என்பது ப்ரஸித்தம். ஆனால் வேறு சில சிறப்புகளை நாம் காணலாம்.

1.ஸ்ரீபாஷ்யத்தை தினமும் க்ரந்தமுகமாக பாரயணம் செய்ய முடியாதவர்கள்ச்லோகரூபமாந இக்க்ரந்தத்தை செஞ்சுள் நிறுத்தி தினமும் அனுஸந்தானம் செய்து தே பகவத்ப்ரீதியை அடையலாம்.

2.ஒவ்வொரு அதிகரணத்தின் பூர்வபக்ஷ ஸித்தாந்தங்களை மனதில் ஸுலபமாக ஏற்றிக்கொள்ளலாம்.

3.ஸ்ரீபாஷ்யத்திலும் ச்ருதப்ரகாசியகையிலும் ஸாதிக்கப்படாத விசேஷங்களை அவ்வோ ஆசார்யர்களுக்கு அபிமாதமானவிதத்தில் இங்கு ஸ்வாமி ஸாதிப்பதால் அவற்றை அறிந்து ஸித்தாந்தத்தில் தெளிவு பெறலாம்.

4.ஸ்வாமியே அதிகரணஸாராவளுயின் துடக்கத்தில் ஸாதித்தவாறு ஸ்ரீபாஷ்யம் மற்றும் அதன் மூலமான ஸூத்ரங்களில் ஏற்படும் ஸமசயங்களை இந்த க்ரந்தம்மூலமாக போக்கிக்கொள்ளலாம்.

5.ஸ்வாமி தேசிகனுக்கு முன்பு ஸாதிக்கப்பட்ட க்ரந்தங்களில் பரஸ்பரம் விரோதம் முதலானவை தோன்றின் அவற்றை நீக்கித்தெளிவு பெறலாம். இன்னும் பலவிதமாந பயன்களைக்கொண்ட

இந்த க்ரந்தம் ஸ்வாமியின் திருக்குமாரரும் ஸர்வதந்த்ரஸ்வதந்த்ரருமான குமாரவரதாசார்யரால் விளக்கப்பெற்றது என்பதுவே இதன் பெருமைக்குச்சான்று.

ஸ்வாமியின் க்ரந்தம் ஸாதிக்கும் முறை.

ஸ்வாமியின் ஸர்வக்ஞத்வம் அனைவராளும் அறியப்பட்டதே. ஆயினும் ஸ்வாமி க்ரந்தங்களில் ஒரு தனிமை உள்லது. அதனை பார்ப்போம். ஸ்வாமி யின் க்ரந்தஹ்களில் தேவையில்லாமல் சொற்களின் ப்ரயோகம் இருக்காது. அந்த நடையை பலவாறு ஆராய்ந்தால் மட்டுமே தாத்பர்யத்தை அறியமுடியும். தனக்கு முன்பு ப்ரசார்தில் இருந்த பொத்த, ஜைன, சார்வாகாதி, நாஸ்திக்க்ரந்தஹ்களும், ஸாங்க்ய, வைசேஷிக,ந்யாய பாசுபதாதிக்ரந்தங்களும் ஸாக்ஷாத் திருவேங்கடமுடையானின் அவதாரமான ஸ்வாமிக்கு ப்ரத்யக்ஷமாக இருந்தன என்று க்ரந்தங்களில் அறியலாம். இவ்வாறு பூர்வோத்தரமீமாம்ஸா, வேதாந்தங்கள் அனைத்து க்ரந்தங்களையும் ஆராய்ந்து க்ரந்தஹ்களை அனுக்ரஹித்தபடியால் ஸ்வாமியின் தாத்பர்யத்தை அறிய மிகவும் பாடுபடவேண்டும். ஸாக்ஷாத் ஹயக்ரீவன் தாந் அதனை வெளிப்படுத்த தகுந்தவன்.ஆயினும் स हि न नः प्रत्यक्षरूपो दृशाम् என்றவாறு து ஸாத்யமாகாது. எனவே நமது ஆசார்யர்களே சரணம். அதிகரணஸாராவளியின் விஷயத்தில் ஸ்வாமி திருக்குமார்ருடைய வ்யாக்யானம் அதனை அனுஸரித்த வ்யாக்யானங்களும் நமக்கு மிகவும் உதவும்.

இந்த க்ரந்தத்தின் பாடபேதஹ்களை பற்றி பலவிசாரங்கள் நடந்துள்லந. உதாஹரணமாக इत्थं जीवेशसीमामभिलपितुमना- क्रोशभाजां श्रुतीनां எனும்- 164 வது ச்லோகப்பகுதியில் க்ரோசபாஜாம் என்னுமிடத்தில் பாடவிசாரம் நடந்துள்ளது. இங்கு க்ரோசபாஜம் என்னும் பாடம் கொள்ளவேணும் என ஸ்ரீவபயவே கபிஸ்தலம் ஸ்வாமி ஸாதித்ததாக அஸ்மத் ஸ்வாமி ஸ்ரீமதுபயவே நாவல்பாக்கம் அய்யாவகத்து ஸ்வமி

அடியோஹ்களுக்கு தெளிவுபடுத்திளார். இவ்வாறு பலஇடங்கள் உள்ளந. இவ்வாறே பராயத்தாதிகரணஶ்ரீஸூக்தி ச்ருதப்ராகிகைக்கு முரண்படுகிறதும் வாத்த்தையும் பெரியோர்கள் தவறு என விளக்கியுள்ளனர்.இவ்வாறு स्वार्थोयं जीवशब्दो वदति परमं द्वारवृत्त्येति पक्षाः -142 என்னுமிடத்தில் பக்ஷ எனும் பாடம் உள்ளது. அஹ்கேயே நான்காவது பாத்த்திலும் பாடபேதம் உள்ளது. இந்த க்ரந்த்த்தினை பதிப்பிக்கும் ஸமயத்தில் அடியேனுக்கு ஆசார்யன் ஸாதிக்கும்போது னுஸரித்தபாடத்தை நினைவுக்கு வந்தவரை சேர்த்துள்ளோம் பெரும்பாலும் பாடபேதங்கள் பரமஸம்ப்ரதாயத்துக்கு விருத்தமானவை அல்ல.

இந்த க்ரந்தத்தை ஸேவிக்கும் முறை.

ஶ்ரீபாஷ்யத்தை ச்ரோத்ரியம் ப்ரம்ஹநிஷ்டம் என்றபடி வேதாந்தத்தை அதிகித்து ப்ரம்ஹஸூத்ரத்தின்பால் ஈடுபட்டுள்ல மஹானின் பக்கலில் அதிகரிக்கவேண்டும்.அவ்வாறு அதிகரிக்கும்போது அதனுடன் அதிகரணஸாலவளியையும் ஸேவிப்பது ஸம்ப்ரதாயம். அதிகரணஸாரவளியின் நூன்முகம் ஶ்ரீபாஷ்யத்தின் விஷயங்களைப்பற்றி பொதுவாக அறிய உதவுகிறது. सौत्री सङ्ख्या शुभाशीः अधिकृति गणना चिन्मयी ब्रह्मकाण्डे என்னும் பகுதி கடபயாதி எண்ணிக்கை மூலமாக ஸூத்ரங்கள் 545,மற்றும் அதிகரணங்கள் 156 எனக்கூறுகிறது.अक्षोर्म्यशाहिकाष्ठा ன்று ஒவ்வொருபாதங்களிலும் அதிகரணங்களின் எம்ணிக்கையை ஸ்வாமி மிக சுருக்கமாக நமக்கு அறிவிக்கின்ரார். எனவே இவழாறான ச்லோங்களை மனப்பாடம் செய்தால் ஶ்ரீபாஷயத்தைப்பற்றி தெளிவு கிடைக்கும். स्रष्टा देही स्वनिष्ठ என்னும் சேலோகம் தனிவிதமாக ஶ்ரீபாஷ்யத்தின் னைத்து பாதஹ்களும் பகவானைய கல்யாணகுணங்களை விவரிப்பதாக கூறுகிறது.சாரீரகசாஸ்த்ரம் அனைத்தும் பகவத்குணங்களை கூறுவதற்காகவே என்று ஸ்வாமியே अधिकरणगणैस्तद्गुणानुद्गृणाति என்று இங்கேயே கூறியுள்ளார்.

எனவே ச்லோகங்களை உடனுக்குடன் மனதில் ஏற்றினால் சாஸ்த்ரத்தினுடைய பொதுவான நிலையும் விசேஷங்களும் நமக்கு கலக்கமற மனதில் படியும்.மேலும் ஸ்ரீபாஷ்யத்தில் இல்லாததாயும் ஸ்ரீபாஷ்யகார்ருக்கு உகந்ததாயும் கூறப்பட்ட விசேஷங்களை காலக்ஷேபஸமயத்தலேயே ஆசார்யமுகமாக கேட்டால் ஸங்கதிமுதலானவைகளில் ஸம்சயம் வராது.

காலக்ஷேபகாலத்திலேயே அதிகரணஸாராவளீ மனதில் ஏற்பட வேண்டும் .பின்பு வயது கூடிய பின்பு அதன் ச்லோகங்கள் தொடர்ச்சியாக நினைவுக்கு வராவிட்டாலும் ஸம்சயம் வரும்கால் ஆங்காங்கு ஸ்வாமி ஸ்ரீஸூக்திகள் ஏகஸம்பந்தி க்ஞானம் அபரஸம்பந்திஸ்மாரகம் என்னும் கணக்கிலே நினைவுக்கு வந்து ஸமசயத்தினை போக்கும் என்பது அஸ்மதாசார்யன் அருள்மொழி.

ஸ்ரீபாஷ்யத்தின் பொருளுக்கு பெருமையுள்ளது. அவ்வாறே அதன் சொற்களுக்கும் பெருமையுண்டு. எனவே ஸ்ரீபாஷ்யத்தை அனுஸந்தித்தல் நித்யக்ருத்யமாக பெரியோர் கூறுவர். அதிகரணஸாராவளியின் அனுஸந்தானமும் அப்படி பெருமைக்கு உகந்ததாக பெரியோர்கள் திருவுள்ளம்.எனவே இதன் பொருளை அனுஸந்திப்பதோடு நிற்காமல் ச்லோகங்களை இளம் வித்வான்கள் மனப்பாடம் செய்வது ஸம்ப்ரதாயத்துக்கு உகந்தது. அதிகரணஸாராவளியை ஆசார்யமுகமாக நியமத்துடன் அதிகரிக்கவேண்டும். இது ஸ்ரீபாஷ்யத்தின் ஸாராம்சமானபடியால் அதன் நியமங்கள் பெரும்பாலும் இதற்கும் உண்டு.

இத்தகைய பெருமைக்குரிய ஸ்வாமியின் க்ரந்தத்தை நித்யம் அனுஸந்திப்பதற்கு தகுந்தபடி ஸ்ரீஉவே வித்வான் பெரு சடகோபதாதாசார்யர் வெளியிடுகிறார். அவருடைய தேசிகபக்தி அனைவருக்கும் அறிந்தவிஷயமே. வேதசாஸ்த்ரங்களில் மிகுந்த க்ஞானத்தை பெற்று தேவப்பெருமாள் கைங்கர்யத்திலேயே ரஸானுபவம் செய்யும் இவர் அதன் பரீவாஹமாக ஸ்வாமியின் கைங்கர்யத்தை நிர்வஹித்து வருகிறார். ஸ்வமி தேசிகனின்

க்ரந்தங்களில் மூலப்ரதி இப்போது கிடைக்கப்பெறுவதில்லை.. கிடைப்பதும் உபயோகிக்கத்தகுந்ததாக இல்லை. இக்கைங்கர்யம் மேலும் சிறக்க வேண்டுகிறேன்.

"वक्ता श्रोता वचनविषयः प्रीयतां वेङ्कटेशः"

கா.இ.தேவநாத தாஸன்.

## நூன்முகம்

संसारसन्तापविषण्णजन्तून् समीक्ष्य सर्वान् कृपया गुरुर्यः।
चकार सारावलिदुग्धराशिं तत्पादपद्मं भजतात्मनो मे।।

ச்ரியஃபதியான ஸர்வேச்வரன் ஸம்ஸாரஸாகரத்தில் மூழ்கி பரிதபிக்கும் சேதநர்களை ஸம்ரக்ஷணம் செய்ய பல அவதாரங்களைச்செய்தார். அந்த க்ரமத்தில் திருவேங்கடவனே ஸ்வாமி தேசிகனாக அவதரித்தான் என பல ப்ரமாணங்கள் மூலமாக அறிகிறோம். வேதத்தை அபஹரித்த மதுகைடபர்களை அழித்து அதை மீண்டும் சதுர்முகனுக்கு உபதேசிக்க ஸ்ரீஹயக்ரீவாவதாரத்தை செய்தருளிய பகவான், வேதாந்தங்களுக்கு ஸ்ரீபாஷ்யம் மூலம் ஸ்ரீபாஷ்யகாரர் ஸாதித்த அர்த்தங்களை அபஹரித்த மதாந்தரஸ்தர்களை வாதத்தில் ஜயிக்க ஸ்வீகரித்த அவதாரம் ஸ்ரீதேசிகாவதாரம்.

" பரச்சதம் வாபி பரஸ்ஸஹஸ்ரம் ஸ்ரீவேங்கடாசார்யக்ருதாஃ ப்ரபந்தாஃ" என ஸ்வாமி தேசிகனின் ப்ரசிஷ்யரான ப்ரதிவாதிபயங்கரம் அண்ணன் ஸ்வாமி கொண்டாடிய க்ரமத்தில் ஸ்வாமி தேசிகன் ஸாதித்த க்ரந்தங்கள் நூறுக்கும் அதிகமாகும்.அவைகளில் ஸ்வாமி தேசிகனால் பஹுமானிக்கப்பட்ட க்ரந்தம் அதிகரணஸாராவளி எனும் க்ரந்தமாகும். ,",,,தார்யமாசார்யவத்பிஃ" என ஸாதித்தார்.

ஸ்ரீரங்கத்தில் நடைபெற்ற வாதத்தில் அத்வைதிகளை ஜயித்த ஸ்வாமி தேசிகனுக்கு வேதாந்தாசார்யர் எனும் பிருதத்தை நம்பெருமாள் அனுக்ரஹித்தார். "தேந தேவேந தத்தாம் , வேதாந்தாசார்யஸம்க்ஞாம் அவஹிதபஹுவித் ஸார்த்தமந்வர்த்தயாமி" எம்பெருமான் அனுக்ரஹித்ததை ஸார்த்தமாக்குவதாக ப்ரதிக்ஞை செய்து உபக்ரமித்தார்.இதில் ஸ்ரீபாஷ்யத்தின் அதிகரணங்களின் பொருளை ஸங்க்ரஹித்தார். ஆயினும் ஸ்ரீபாஷ்யத்தின் மேலாக எழுந்த ஆக்ஷேபத்துக்கும் ஸமாதானமாக பல விஷயங்களை இங்கு ஸாதிக்கிறார்.

1.ஸ்ரீபாஷ்யகாரர் தாம் ஸாதித்த ஸ்ரீபாஷ்யத்தில் சில அதிகரணங்களின் முடிவில் இந்த அதிகரணம் அத்வைதி மதத்தில் ஸமந்வயமாகாது என ஸாதிக்கிறார். ஸ்வாமி தேசிகன் மேலும் பல அதிகரணங்கள் ஸமன்வயமாகாது என்றும், இருபது அத்யாயங்களைக்கொண்டு த்ரிகாண்டீ எனும் மீமாம்ஸா சாஸ்த்ரம் முழுவதுமே அத்வைதிகளுக்கு அனுகுணமில்லை என்று ஸாதிக்கிறார்.

2.சரீரவாசகமான பதங்கள் சரீரியான பகவானைக்குறிக்கும் என்றால் பகவான் எல்லோருக்கும் அந்தர்யாமியாக இருப்பதால் பர்யவஸாநவ்ருத்தியால் ஸந்த்யாவந்தநாதிகர்ம குரு எனும் விதியும் பகவானைக்குறித்தாகும் என்பதாக சங்கை செய்து ஸமாதானம் ஸாதிப்பது ரஸமாகும்.

3.ப்ரஹ்மத்தை அனுமானத்தால் அறிய முடியாது என்று கூறும் சாஸ்த்ரயோநித்வாதிகரணத்துக்கும் அசேதநத்தால் மட்டும் ஜகத்ஸ்ருஷ்டி வராது என்று கூறும் ரசநாநுபபத்தி அதிகரணத்துக்கும் விரோதம் உள்ளது போல் சங்கை செய்து ஸமாதானம் ஸாதிப்பது.

4.ஸ்ரீபாஷ்யத்தில் நான்கு அத்யாயங்களில் பதினாறு பாதங்களின் பொருளை ஒரு ச்லோகத்தால் ஸங்க்ரஹித்து ஸாதிப்பது. இதையே

தமிழிலும் மெய்விரதமாந்மியத்தில் “ சித்தசித்தென விரித்துரைத்த “ எனும் பாசுரம் மூலம் ஸாதிப்பது.

5.பல இடத்தும் அதிகரணங்களின் புனருக்தியை, ஸங்கதியின்மையை பரிஹரிப்பது.

6. ஸோச்நுதே ஸர்வான் காமான் ஸஹ என்னும் ச்ருதிக்கு போக்யஸாஹித்யரீதியில் பொருளைக்குறிப்பிடுவது.

ப்ரஸங்காத் ஒரு விஷயத்தை விண்ணப்பிக்க விரும்புகிறேன்.

தாஸன் பால்யத்தில் ஸ்ரீபாஷ்யஸதஸ்ஸில் ச்ரோதவாக இருக்கும் ஸமயத்தில் ஸதஸ்ஸில் பரீக்ஷாதிகாரியானவர் ஒரு வித்வானை ப்ரச்னம் செய்தார். “ஸத்யம் க்ஞாநமநந்தம் ப்ரம்ஹ” எனும் லக்ஷணவாக்யத்தில் ப்ரஹ்மபதம் ப்ரதமாந்தமா, த்விதீயாந்தமா. லக்ஷணவாக்யங்கள் “கந்தவதீ ப்ருதிவீ” என்பது போல் ப்ரதமாநதமாகவே வரும். அவ்விதம் கூறினால் மேல்வாக்யத்தில் யோ வேத எனும் வாக்யத்தோடு அன்வயம் வராமல் போகும். ஆக த்விதீயாந்தமாக சொன்னால் லக்ஷணவாக்யமாகமுடியாது என. பிறகு வெகுகாலம் கழித்து தாஸன் காலக்ஷேபம் செய்யும் காலத்தில் ஆசார்யரிடம் விண்ணப்பம் செய்ய அவர் ஸாதித்த ஸமாதானம், ப்ரம்ஹவிதாப்நோதி பரம் எனும் வாக்யத்துக்கு மேல் வாக்யங்கள் விவரணரூபமாகும் , ஆதலால், விரோதமில்லை என ஸாதித்தார்.விவரணரூபம் என்பது ஸ்வாமி தேசிகன் ஸாதித்த விஷயமாகும்.

க்ரந்தாரம்பத்தில் ஸார்த்தமந்வர்த்தயாமி என உபக்ரமித்தும் முடிவில் கர்த்ருத்வத்யாகபூர்வகமாக ஸாத்விகத்யாகமாக “தத்வக்தா வாஜிவக்த்ரஸ்ஸஹ மம குருபிர்வாதிஹம்ஸாம்புவாஹைஃ “ ஸ்ரீஹயவதனன் ஸ்ரீபாஷ்யகாரரின் திருவுள்ளப்படி தமது ஆசார்யரான ஸ்ரீஅப்பிள்ளாருடன் கூடி------ஆசார்யன் ரூபத்தில் ஸாதித்ததாக முடிக்கிறார்.

மேலும் பல விஷயங்கள் அனுபவித்தால் மட்டும் பெறமுடியும், ஆசார்யானுக்ரஹத்தால் பல விஷயங்களை அனுபவிக்கமுடிகிறது.

இந்த க்ரந்தத்துக்கு ஸ்வாமி குமாரர் வரததேசிகன் அதிரணசிந்தாமணி எனும் வ்யாக்யானத்தை அனுக்ரஹித்துள்ளார். அதிலும் பல விஷயங்கள் மிகவும் ரஸநீயமாகும். மேலும் ஸ்ரீமதுபயவே, நடாதூர் ஸுந்தரார்யமஹாதேசிகன் அனுக்ரஹித்த ஸஹ்ருதயஹ்ருதய ப்ரகாசிகா எனும் வ்யாக்யானம், ஸ்ரீமதழகியசிங்கர் அனுக்ரஹித்த பதயோஜநை எனும் வ்யாக்யானம், ஸ்ரீமதுபயவே உத்தமூர் ஸ்வாமி அனுக்ரஹித்த வ்யாக்யானம் முதலானவைகள் உள்ளன..

இப்படி மிகவும் உயர்ந்த க்ரந்தமான அதிகாரணஸாராவளியை ஆசார்யநியமநத்தால் காலக்ஷேபகாலத்தில் தினப்படி ஸேவித்து மனனம் செய்து வந்தேன்.தற்சமயம் அநேகம் ஸ்வாமி தேசிகன் க்ரந்தங்கள் காலானுஸ்ருதமாக எல்லோருக்கும் ஸுலபமாக கிடைக்கும் ரீதியில் மின் நூலாக ப்ரகாசனமாகி உள்ளன. அதில் அதிகரணஸாராவளி க்ரந்தம் கிடைக்கப்பெறவில்லை. அதை ப்ரகாசனம் செய்ய எண்ணம் தோன்றியது..பகவதாரானத்தில் கந்தபுஷ்பாதிகளை ஸ்வப்ரயத்நத்தால் ஸம்பாதிப்பது ச்லாக்யம் என்று கூறிய க்ரமத்தில் இந்த க்ரந்த்தத்தையும் தாஸன் ஸ்வப்ரயத்நத்தால் ஸம்பாதிக்க விரும்பி தட்டச்சு செய்தேன்.

சில வருடங்களுக்கு முன்பு 1936 ஆம் வருடம் ப்ரகாசனம் செய்து வந்த வேதாந்ததீபிகையின் ஒரு பாகத்தை வாசிக்க நேரிட்டது. அதில் அக்காலத்தில் ஸ்வாமி தேசிகன் அவதாரஸ்தலத்தில் ஸ்வாமியின் அவதார உத்ஸவத்தை பத்து நாட்கள் விசேஷமாகக்கொண்டாட த்ரவ்யமில்லாமையால் ச்ரமப்பட்டு நடைபெறுவதை ஸ்ரீதேசிகனடியார்களுக்குத் தெரிவித்து ஸ்ரீதேசிகனடியார்கள் த்ரவ்யஸஹாயம் செய்யும்படி ப்ரார்த்தனை செய்தும், ஸ்ரீதேசிகன் உத்ஸவத்தை வாஹனத்துடன், வானவேடிக்கையுடன் நிறுத்தாமல் ஸ்வாமி தேசிகனின் க்ரந்தங்களை ப்ரகாசனம் செய்வதும் ப்ரவசனம்

செய்வதும் மிகவும் ஆவச்யகம் என்று அபிலஷித்துள்ளார்கள்.. அந்த மஹநீயர்கள் ஸ்ரீதேசிகன் திருவடி ஸம்பந்தத்தால் இன்று முக்தர்களானபடியால் ஸத்யஸங்கல்பர்களாக இருந்து அன்று அவர்கள் அபிலஷித்தபடி தற்சமயம் ஸ்வாமி தேசிகனின் அவதார மஹோத்ஸவத்தை ஸ்வமியின் அவதாரஸ்தலத்தில் ஸ்ரீதூப்புலில் விசேஷமாக நடைபெற ஸங்கல்பித்து நடைபெற்று வருகிறது..கடந்த வருடங்களில் ஸ்ரீதேசிகவைபவப்ரகாசிகை, மற்றும் மறை உரைக்கும் பொருள் எனும் புத்தகத்தை ஸ்ரீதேசிகன் உத்ஸவஸமயத்தில் ப்ரகாசனம் செய்தோம். அந்த க்ரமத்தில் இவ்வருடம் அதிகரணஸாராவளி மூலம் மட்டும் ப்ரம்ஹஸூத்ரத்துடன் தினப்படி பாரயணம் செய்ய உபகாரமாக இருக்கும்படி ப்ராகசனம் செய்ய ப்ரார்த்தனை செய்தோம். அடியார்களின் ப்ரார்த்தனையை அங்கீகரித்த எம்பெருமானும் ஆசார்யனும் இதுவரையில் நடத்திவைத்தார்கள்.

க்ருதக்ஞுதாநிவேதனம்.

ப்ராசீந புஸ்தகங்களில் பல இடங்களில் பாசத்தில் ஸம்சயம் உள்ளதால் அஸ்மதாசார்யரான ஸ்ரீமத்வேதமார்கேத்யாதி விசேஷணவிசிஷ்ட திருமலை சதுர்வேத சதக்ரது நாவல்பாக்கம் அய்யா ஸ்வாமி திருவுள்ளம் பற்றிய பாடத்தை ப்ரகாசனம் செய்ய ஸஹகரிக்கும்படியும் அனுக்ரஹஸ்ரீமுகம் அனுக்ரஹிக்கும்படியும் ஸ்ரீமத்வேதமாரகேத்யாதி விசேஷணவிசிஷ்டரான காணியம்பாக்கம் இளையவில்லி தேவநாதாசார்யஸ்வாமியிடம் ப்ரார்த்தனை செய்திருந்தேன். தாஸனின் ப்ரார்த்தனையை க்ருபயா ஸ்வீகரித்து உந்நதமான ஸ்தாநத்தை வஹிப்பதால் வரும் கார்யகௌரவத்தின் மத்தியில் இதை சோதனம் செய்தும் அணிந்துரையையும் அனுக்ரஹித்துள்ளார்.இவர் தாஸனுக்கு கலாசாலையில் ந்யாயசாஸ்த்ரபாடம் சொல்லி வைத்த ஆசார்யனாவார். மேலும் ,ஸ்ரீமத்வேதமார்கேத்யாதி விசேஷணவிசிஷ்ட .தி.ச,ச நாவல்பாக்கம் சடகோபராமானுஜ தாதயார்யமஹாதேசிகன் ஸந்நிதியில்

**அத்யாத்மசாஸ்த்ரம் காலக்ஷேபம் செய்ய ஸ்வாமியிடம் புருஷகாரம் செய்து தாஸனை ஆசார்கடாக்ஷத்துக்கு பாத்ரமாக்கிய ஆத்மஸுஹ்ருத்தவார். ஸ்ரீ.உ.வே.காணியம்பாக்கம் தேவநாதாசார்ய ஸ்வாமிக்கு தாஸனின் க்ருதக்ஞதையை அநேகப்ரணாமத்துடன் தெரிவித்துக்கொள்கிறேன். மேலும் பல தேசிகனடியார்கள் பலவிதமான கைங்கர்யங்களில் ஸஹகரித்து வருகிறார்கள் அவர்களுக்கும் தாஸனின் க்ருதக்ஞதையை ஸப்ரணாமம் தெரிவித்தக்கொண்டு இந்த சிறிய புத்தகத்தை பகவத் ஸமர்பணபூர்வகமாக ஸ்ரீதேசிகனடியார்களுக்கு ஸமர்ப்பிக்கிறேன்.**

**ந தைவம் தேசிகாத் பரம் ந பரம் தேசிகார்சநாத்.**
**ஸ்ரீதேசிகப்ரிய:**
**சடகோபதாத தாஸன்.**

SrI:

## Introduction to Adhikarana SArAvaLi of SvAmi SrI NigamAnta MahAdeSikan

**by**

**VaikuNThavAsi SrI u.ve. Madabhushi SarangarAjan Hari SvAmi**

*** * * ***

Swami deSikan delivered an appoorva grantham known as "Adhikarana SArAvaLi". In a nutshell, the contents of the Brahma SutrAs are summarised by Swami Sri Desikan in his famous and unparalled work, "AdhikArana SArAvaLi". The BrahmaSutrAs are aphorisms composed by Veda Vyasa to explain the Brahma-KAndA. The upanishads which enlighten us regarding the Brahman's swaroopA (reality), roopA (form), gunA (attributes), vibhuthi-aishwaryam (lordship). Shree Bhagavadh RAmAnuja has delivered commentry on BrahmaSutrAs and explained that only Sri VisishtAdhvaithA is Shree Vaishnavam's philosophy. The practice is the purport of the VEda and the philosophy of VEda VyAsA. Swami NigamAntha MahA DEsikan who is an extraordinary AchAryA in our tradition has delivered "Adhikarana SArAvaLi" wherein, he has delivered a hymn for each Adhikarana explained in Shree BhAshyA in a condensed form. Adhikaranam is a sub-section in pAdhA of an AdyAyA in Brahma sutra. Each Adhikaranam has five components. They are Vishayam (Subject), Samsayam (Doubt), Poorva paksham (Opponent view), SidhAntham (Established truth with proof) and PrayOjanam (Benefit of establishing the truth with proof). Each chapter in BrahmaSutrA has sections called pAdhAs and each pAdhA has sub-sections called the AdhikaranAs. Each AdhikaranA has one to many sutrAs. The first chapter is sAmanvayA which deals with establishing Shreeman NArayaNA as Brahman who is the only cause of universe (all living and non-living things), having the universe as his body and he being the soul of the universe. The second chapter is avirOdha, which establishes that the Brahman thus established in the first chapter, cannot be refuted, or rejected by any system. The third chapter is sAdhanA, which deals with the means to attain the brahman's lotus feet. The fourth chapter is phala, which deals with the goal, which is eternal bliss and service to the lotus feet of Lord Shreeman NArayaNA in the Paramapada VaikuntA, which is the transcendental eternal & ultimate place. One sloka (Sanskrit) from Swamy Desikan's Adhikarana SAravaLi (almost in the begining of the work) which explains the meaning of entire Brahma SutrAs is going to be presented along with its meaning as follows: "Srashta Dehi Swanishta: Niravadhi MahimA ApAsta BAdha: SritApta: KAtmA DEhEndriyAdEhE Uchita Jananakrut Samsrwtow Tantra VAhi NirdhOshatvAdi RamyO BhAhu Bhajana Padam SwArha Karma PrasAdya: PApachid Brahma NAdi Gatikrut AthivAhan SAmyadascha Atra Vedya:"

Meaning with chapter-pAdha summary is as follows (in brief):

### CHAPTER 1

PAdhA 1: "Srashta" - Shreeman NArAyaNan is the Brahman who is the creator (& sustainer, destroyer) of the universe

PAdhA 2: "DEhi" - Shreeman NArAyaNan has all the sentient and insentients (chit & achits) as his body & HE is the soul

PAdhA 3: "Swanishta:" Shreeman NArAyaNan is the Supreme Self and is the supporter/controller/sEshi of the universe and is unparalled and unsurpassed

PAdhA 4: "Niravadhi MahimA" - Shreeman NArAyaNan is infinite with infinite supremacy.

## CHAPTER 2

PAdhA 1 : "ApAsta BAdha:" - The supreme self thus established in the first chapter cannot be refuted or rejected by any system like SAnkya, Yoga, CharuvAka, VaishEsika, Bauddha Jaina, Paasupata and others.

PAdhA 2 : "SritApta:" - The supreme self Shreeman NArAyaNA is the only dependable for those who surrender to him as He is the author of Shree PAncharAtrA Agama which alone is recognised by Brahma Sutra to be in accordance with the VEda and equivalent to VEda.

PAdhA 3 : "KAtmA " - Shreeman NArAyaNA is the creator of ether & jIvAtman PAdhA 4: "DEhEndriyAdEhE Uchita Jananakrut" - Shreeman NArAyaNA is the creator of the body of JeevAs and the JeevAs sense organs according to the individual JeevA's anAdhi karmA.

## CHAPTER 3

PAdhA 1: "Samsrwtow Tantra VAhi"-Sriman NArAyaNA is the controler of the entire universe's actions and inactions.

PAdhA 2: "NirdhoshatvAdi RamyO" - Shreeman NArayaNA is identified by ubhaya-lingam - the two identifications namely "Infinite with infinite divine qualities/attributes" and "Untouched by all impurities" though HE is present inside and outside of all chit and achit tatvAs always.

PAdhA 3: "Bhahu Bhajana Padam" - Shreeman NArAyaNA is the goal of all Bhakthi VidyAs mentioned in the upanishads. He alone is meditated upon by people who wish to get liberation (mOkshA)

Paada 4 "SwArha Karma PrasAdya:" -Shreeman NArAyaNA alone grants the results to all as per their karma. HE alone grants all the four purushArthas namely Dharma, Artha, KAma and MOkshA.

## CHAPTER 4

PAdhA 1: "PApachid" - Shreeman NArAyaNA destroys the obstacles (pApa & puNyA) of those who practice Bhakti or Prapatti and purifies them and thus makes them to be qualified for getting MOkshA.

PAdhA 2: "Brahma NAdi Gatikrut" - Shreeman NArAyaNA makes the jIvAtman (who has done Bhakthi or Prapathi) to leave the material body through the "Brahma NAdi" when the JeevA's pApA and puNyA are removed.

PAdhA 3: "Athivahan" -Shreeman NArAyaNA leads the JIvAtman in the ArchirAdhi Gathi to Shree Vaikunta ParamapadA. Paada 4 : "SAmyadascha Atra Vedya:" - Shreeman NArAyaNA grants "SAlOka", "SAroopiya", "SAmeepyA", "SAyujya" to the Mukta JeevA. "SAlOka" - Jeeva reaches the Shree Vaikunta LOka which is trancendental and imperishable. "SAroopiya" -Jeeva gets divine body of SuddhaSatvam as similar to the body of Sriman NArAyaNA. "SAmeepyA" - JeevA goes near Sriman NArAyaNA in the ParamapadA. "SAyujyA" - Jeeva eternally does service to the Lotus feet of Sriman NArAyaNA along with Nitya sUrIs and other muktAs and never returns to the material world. Thus Sriman NArAyaNA who is the Para BrahmA Butha is known from the SAreeraka SAstra which is the Brahma sutra - the purport of entire VEdAs.





# Sri Bhagavad Ramanuja Millennium Foundation Inc.

EIN: 81-3759999

501©(3) Religious, Charitable and Educational Foundation

President , Dr. Oppiliappan Koil Varadachari Sadagopan
Foundation Address: 16 Rockledge Avenue 6B1 , Ossining , NY 10562

SrI:

**HeviLambi varusham, PuraTTAsi SravaNam – October 1st 2017**

Dear Suhrds:

As an integral part of the just concluded sahasrabdhi celebrations for Acharya Ramanuja and the commencement of the 750th avatara jayanthi of Swami Nigamantha Maha Desikan, the Bhagavad Ramanuja Millennium Foundation, the Guru Krupa Foundation of New York, The ViLakkoli Perumal-Thooppul Vedantha Desikan (VPTV) Trust of Kaancheepuram and the Sri Thirunarayanapuram Trust of Melkote are pleased to release the First ebook on "Adhikarana Saaravali" of Swami Desikan in the Sadagopan.org portal.

We are most grateful to Srimad (Dr.) U.Ve. Satakopa Tatachar Swami for assembling the full text of this sacred Sri Sookti. We are blessed to have the technical support of Sriman Srinivasan Narayanan Swami, Srimathi Jayashree Muralidharan, Srimathi Usha Narasimhan and Vidwan Sriman A Narasimhan Swami of Bangalore as well as Sri Balaji Ankem of Hyderabad, the custodian of the Sadagopan.org portal.

On this subha dinam of Hemalambi Purattasi Sravanam, we are also blessed to release the first of the 18 ebooks on Srimad Bhagavad Gita Bhashyam by Vidwan Sri ~~A~~ Narasimhan Swami of Bangalore from his kalakshepams organized by Sri Thirunarayanapuram Trust. These notes cover not only the meanings and commentaries on the majestic Gita Bhashyam of Acharya Ramanuja but also excerpts from Swami Desikan's supportive commentary of Taatparya Chandrika for Bhagavad Ramanuja's moolam. Vidwan Sri A.Narasimhan Swami has covered up to the 15th Chapter of Srimad Bhagavad Gita so far. It will be a treat to have Vidwan Sri Narasimhan Swami's extensive coverage of Srimad Bhagavad Gita Bhashyams available for students and scholars.

Vidwan Narasimhan is supported in this major kaimkaryam by Sri Tirunarayanapuram Trust of Bangalore created in 2000 to commemorate the life-long kaimkaryams of the great Scholar, Professor Srimad U.Ve. V.T. Thirunarayana Iyengar Swami (1903-1995 C.E). Please refer to the informative web site (http://www.tirunarayana.in/profile_page.html) for additional information on the activities of the Trust in general and the online study group on GitA Bhashyams supported by this Trust under the leadership of Vidwan Sri A.Narasimhan of Bangalore in particular. The Hayagriva likhita kaimkarya ghoshti has been active in the last year to assist in bringing out the English version of the 700 Page book, Ramanuja Daya, conceptualized and executed by Srimad U.Ve. Navalpakkam Vasudevachar Swami for the recently concluded Bhagavad Ramanuja Millennium Celebrations. Srimad Bhagavad Ramanuja Millennium Foundation's current work to bring out the Taatparya Chandrika related e-books in the portal of www.sadagopan.org supported by the Guru Krupa Foundation of New York (www.guru-krupa.org). The common goal of these three Non-Proft Foundations is summed up by the primary motto of Sri Tirunarayanapuram Trust: "**Into the future with knowledge from the past**". Here, the Trust is referring to the development of the core content of ancient devotional literature of our Azhwars and Acharyas that exists in Sanskrit, Tamil and Manipravalam. It is our sincere hope that the creation and dissemination of such a knowledge base for the Gita students and scholars through the coverage of the insightful Sri Sookti of Taatparya Chandrika would be of help to the wider community comfortable with English language and access to content through digital platforms.

namo SrI Ramanujaya

Ramanuja dasan
Oppiliappan Koil Varadachari Sadagopan

| | |
|---|---|
| जिज्ञासाधिकरणम् 1 | 7 |
| जन्माद्यधिकरणम् 2 | 15 |
| शास्त्रयोनित्वाधिकरणम् 3 | 16 |
| समन्वयाधिकरणम् 4 | 18 |
| ईक्षत्यधिकरणम् 5. | 20 |
| आनन्दमयाधिकरणम् 6 | 21 |
| अन्तरधिकरणं 7 | 22 |
| आकाशाधिकरणं। 8 | 23 |
| प्राणाधिकरणम्। 9 | 25 |
| ज्योतिरधिकरणम्। 10 | 25 |
| इन्द्रप्राणाधिकरणम् 11 | 26 |
| अथ प्रथमाध्याये द्वितीयः पादः | 28 |
| सर्वत्र प्रसिद्ध्यधिकरणम् 12 | 29 |
| अत्रधिकरणम्। 13. | 30 |
| अन्तराधिकरणम्। 14 | 31 |
| अन्तर्याम्यधिकरणम्।15. | 32 |
| अदृश्यत्वादिगुणकाधिकरणम्। 16 | 33 |
| वैश्वानराधिकरणम्।17 | 33 |
| अथ प्रथमाध्याये तृतीयः पादः | 35 |
| द्युभ्वाद्यधिकरणम्।18 | 35 |
| भूमाधिकरणम्। 19 | 36 |
| अक्षराधिकरणम्। 20 | 38 |
| ईक्षतिकर्माधिकरणम्।21. | 38 |
| दहरादिकरणम्। 22. | 39 |
| प्रमिताधिकरणम् । 23 | 40 |
| देवताधिकरणम् । 24 | 41 |
| मध्वधिकरणम्। 25. | 43 |
| अपशूद्राधिकरणम्। 26. | 44 |
| आकाशोर्थान्तरत्वादि व्यपदेशाधिकरणम् 27 | 45 |
| अथ प्रथमाध्याये चतुर्थः पादः | 46 |
| आनुमानिकाधिकरणम् 28. | 46 |
| चमसाधिकरणम्। 29 | 47 |

संख्योपसङ्ग्रहाधिकरणम्। 30 48
कारणत्वाधिकरणम् 31 49
जगद्वाचित्वाधिकरणम्। 32 50
वाक्यान्वयाधिकरणम्। 33 51
प्रकृत्यधिकरणम्। 34 52
सर्वव्याख्यानाधिकरणम्। 35 54
प्रथमाध्याय चतुर्थपादसंग्रहः 54
द्वितीयाध्याये प्रथमःपादः। 55
स्मृत्यधिकरणम्। 36 57
योगप्रत्युक्त्यधिकरणम्। 37 57
विलक्षणत्वाधिकरणम्। 38 58
शिष्टापरिग्रहाधिकरणम्। 39 59
भोक्त्रापत्यधिकरणम्। 40 59
आरम्भणाधिकरणम्। 41 59
इतरव्यपदेशाधिकरणम्। 42. 61
उपसंहारदर्शनाधिकरणम्। 43. 61
कृत्स्नप्रसक्त्यधिकरणम्। 44 62
प्रयोजनवत्वाधिकरणम्। 45. 63
अथ द्वितीयाध्याये द्वितीयःपादः। 64
रचनानुपपत्त्यधिकरणम्। 46 64
महद्दीर्घाधिकरणम्। 47 67
समुदायाधिकरणम्। 48 69
उपलब्ध्यधिकरणम्। 49 71
सर्वथानुपपत्त्यधिकरणम्।50. 72
एकस्मिन्नसंभवाधिकरणम्। 51 73
पशुपत्यधिकरणम्। 52 74
उत्पत्यसंभवाधिकरणम्। 53 76
अथ द्वितीयाध्याये तृतीयः पादः 78
वियदधिकरणम्। 54 78
तेजोधिकरणम्। 55. 80
आत्माधिकरणम्। 56 81
ज्ञाधिकरणम्। 57 82

कर्त्रधिकरणम्। 58 84
परायत्ताधिकरणम्। 59 85
अंशाधिकरणम्। 60 87
अथ द्वितीयाध्याये चतुर्थः पादः 90
प्राणोत्पत्त्यधिकरणम्। 61 90
सप्तगत्यधिकरणम्। 62. 91
प्राणाणुत्वाधिकरणम्। 63. 92
वायुक्रियाधिकरणम्।64. 92
श्रेष्ठाणुत्वाधिकरणम्। 65 93
ज्योतिराद्यधिष्ठानाधिकरणम्।66. 93
इन्द्रियाधिकरणम्। 67. 94
संज्ञामूर्तिक्लृप्त्यधिकरणम्। 68. 94
अथ तृतीयाध्याये प्रथमः पादः 96
कृतात्ययाधिकरणम्। 70 98
अनिष्टादिकार्यधिकरणम्। 71. 99
तत्स्वाभाव्यापत्त्यधिकरणम्। 72 100
नातिचिराधिकरणम्। 73. 100
अन्याधिष्ठिताधिकरणम्। 74. 101
सन्ध्याधिकरणम्। 75. 103
तदभावाधिकरणम्। 76. 106
कर्मानुस्मृत्यधिकरणम्। 77. 106
मुग्धाधिकरणम्। 78 107
उभयलिङ्गाधिकरणम्। 79. 107
अहिकुण्डलाधिकरणम्। 80 110
पराधिकरणम्। 81 111
फलाधिकरणम्। 82 112
अथ तृतीयाध्याये तृतीयः पादः 114
सर्ववेदान्तप्रत्ययाधिकरणम्। 83 114
अन्यथात्वाधिकरणम्। 84 117
सर्वाभेदाधिकरणम्। 85 118
आनन्दाद्यधिकरणम्। 86 118
कार्याख्यानाधिकरणम्। 87. 120

समानाधिकरणम्। 88 121
सम्बन्धाधिकरणम्। 89 122
सम्भृत्यधिकरणम्। 90 122
पुरुषविद्याधिकरणम्। 91 123
वेधाद्यधिकरणम्। 92 124
हान्यधिकरणम्। 93 124
साम्परायाधिकरणम्। 94 125
अनियमाधिकरणम्।95 126
अक्षरध्यधिकरणम्। 96 127
अन्तरत्वाधिकरणम्। 97 128
कामाद्यधिकरणम्। 98 129
तन्निर्धारणानियमाधिकरणम्। 99 130
प्रदानाधिकरणम्। 100 131
लिङ्गभूयस्त्वाधिकरणम्। 101 132
पूर्वविकल्पाधिकरणम्। 102 132
शरीरेभावाधिकरणम्। 103 133
अङ्गावबद्धाधिकरणम्। 104 134
भूम्नज्यायस्त्वाधिकरणम्। 105 135
शब्दादिभेदाधिकरणम्।106 136
विकल्पाधिकरणम्। 107 137
यथाश्रयभावाधिकरणम्। 108 137
अथ तृतीयाध्यायस्य चतुर्थः पादः 139
पुरुषार्थाधिकरणम्। 109 139
स्तुतिमात्राधिकरणम्। 110 142
पारिप्लवाधिकरणम्। 111 143
अग्नीन्धनाधिकरणम्। 112 143
सर्वापेक्षाधिकरणम्। 113 144
शमदमाद्यधिकरणम्। 114 145
सर्वान्नानुमत्यधिकरणम्। 115 145
विहितत्वाधिकरणम्। 116 146
विधुराधिकरणम्। 117 147
तद्भूताधिकरणम्। 118 147

स्वाम्यधिकरणम्।119 148
सहकार्यन्तरविध्यधिकरणम्। 120 149
अनाविष्काराधिकरणम्। 121 150
ऐहिकाधिकरणम्। 122 150
मुक्तिफलानियमाधिकरणम्। 123 151
अथ चतुर्थाध्याये प्रथमः पादः 154
आवृत्यधिकरणम्। 124 154
आत्मत्वोपासनाधिकरणम्। 125 157
प्रतीकाधिकरणम्। 126 158
आदित्यादिमत्यधिकरणम्। 127 159
आसीनाधिकरणम्।128 160
आप्रयणाधिकरणम्।129 162
तदधिगमाधिकरणम्। 130 162
इतराधिकरणम्। 131 163
अनारब्धकार्याधिकरणम्। 132 164
अग्निहोत्राद्यधिकरणम्।133. 165
इतरक्षपणाधिकरणम्। 134 166
अथ चतुर्थाध्याये द्वितीयः पादः। 167
वागधिकरणम्। 135 168
मनोधिकरणम्। 136 169
अध्यक्षाधिकरणम्। 137 169
भूताधिकरणम्। 138 170
आसृत्युपक्रमाधिकरणम्। 139 170
परसम्पत्यधिकपणम्। 140 172
अविभागाधिकरणम्। 141 172
तदोकोधिकरणम्।142 173
रश्म्यनुसार्यधिकरणम्। 143 174
निशाधिकरणम्। 144 174
दक्षिणायनाधिकरणम्। 145 175
अथ चतुर्थाध्याये तृतीयःपादः। 176
अर्चिराद्यधिकरणम्। 146 177
वाय्वधिकरणम्। 147 177

वरुणाधिकरणम्। 148 178
आतिवाहिकाधिकरणम्। 149 179
कार्याधिकरणम्। 150 180
अथ चतुर्थाध्याये चतुर्थः पादः 182
सम्पद्याविर्भावाधिकरणम्। 151 183
अविभागेनदृष्टत्वाधिकरणम्। 152 184
ब्राह्माधिकरणम्। 153 185
संकल्पाधिकरणम्। 154 186
अभावाधिकरणम्। 155 187
जगद्व्यापारवर्जाधिकरणम्। 156. 190

**श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।**
**वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि।।**

जिज्ञासाधिकरणम् 1

**सूत्रम्- अथातोब्रह्मजिज्ञासा । 1**

**स्वस्ति श्रीरङ्गभर्तुः किमपि दधदहं शासनं तत्प्रसत्त्यै**
**सत्यैकालम्बि भाष्यं यतिपतिकथितं शश्वदध्याप्य युक्तान्।**
**विश्वस्मिन् नामरूपाण्यनुविहितवता तेन देवेन दत्तां**
**वेदान्ताचार्यसंज्ञामवहितबहुवित्सार्थमन्वर्थयामि।।1**

**श्रीमद्भ्यां स्यादसावित्यनुपधिवरदाचार्यरामानुजाभ्यां**
**सम्यक्दृष्टेन सर्वं सह निशितधिया वेङ्कटेशेन क्लृप्तः।**
**सेव्योऽसौ शान्तचित्तैः श्रवणरसनया शान्तिलाभार्थिभिर्वा**
**सिद्धः शारीरकार्थे सहजबहुगुणः स्रग्धरादुग्धराशिः।।2**

**त्रय्यन्तस्वान्तवादिन्यधिकरणगणे पौनरुक्त्योक्तबाधौ**
**मन्दत्वासङ्गतत्वे विशयमफलतां मानबाधं च मन्तॄन्।**
**दिङ्मोहक्षोभदीनान् दिनकरकिरणश्रेणिकेवोज्जिहाना**
**हृद्या पद्यावलीयं हृदयमधिगता सावधानान्धिनोतु।।3**

गम्भीरे ब्रह्मभागे गणयितुमखिलं कः प्रवीणः प्रमेयं
दिङ्मात्रं दर्शयन्नप्यहमिह निपुणैः प्राध्वमध्यक्षणीयः।
मा भून्निश्शेषसिद्धिस्तदपि गुणविदः स्फीतनिस्सीमरत्ने
मध्ये हारं निधेयं महति जहति किं मौक्तिकं लब्धमब्धौ।।4

वेदार्थे न्यायचिन्त्ये प्रथममधिगतः कर्मवर्गः प्रमाणैः
भेदैरङ्गैः प्रयुक्त्या क्रमविरचनयाथाधिकृत्यातिदिष्ट्या।
तत्राशेषैर्विशेषैस्तदनु तदनुवर्त्यूहतः प्राप्तबाधैः
तन्त्रेणाथ प्रसक्त्या तत उपरि चतुर्लक्षणी देवतार्था।।5

प्राग्धर्मेऽल्पास्थिरार्थे प्रशमितविशये तादृशाराध्ययुक्ते
-थातश्शारीरकांशे बहुविधमहिमब्रह्म मीमांसितव्यम्।
कृत्स्नस्वाध्यायसाङ्गाध्ययनसमुदितापातबुध्यैव कर्म
त्यक्त्वादौ ब्रह्मचिन्तां किमिति न कुरुतां तन्त्र
तुल्योक्त्यबाधात्।।6

प्रावण्यं प्राक्त्रिवर्गे सफलयतनतोपासनाङ्गत्वतोपि
व्याख्यारूपेऽत्र शास्त्रे क्रमनियतिरतः स्याच्च मुख्यक्रमेण।
मानत्वादिर्विचार्यः पुरत इह तथा वाक्यवेद्यात्पदार्थः
दृष्टान्तश्चोपमेयाद्यदि मधु सविधे यातु चाद्रिं किमर्थम्।।7

व्याचख्युः केपि तापत्रयहतिमितरे साधनानां चतुष्कं

काण्डेऽस्मिन् पूर्ववृत्तं कथयति निगमः कर्मचिन्ताफलं तत्।
साङ्गाधीतिर्हि सूते विशयमवसरः क्वात्र तन्त्रान्तरादेः
औचित्यस्थापितोयं क्रम इह न पुनश्चोदनासंप्रयुक्तः।।8

नित्यप्राप्तस्य कण्ठस्थितकनकनयात् निर्विशेषस्य लब्धिः
मिथ्याभूतं निवर्त्यं श्रुतिशकलभुवः प्रेक्षणात्तन्निवृत्तिः।
कर्मैवं क्वोपयुक्तं प्रतिभटमपि तद्वृत्ततोक्तिर्मदुक्ते
प्राप्तात्रेति प्रलापे प्रतिवचनगतिर्भाषिता विस्तरेण।।9

मीमांसायाः कबन्धं कतिचन जगृहू राहुकल्पं शिरोऽन्ये
किन्तैरन्तर्विरोधप्रमुषितमतिभिर्बाह्यकल्पैर्भ्रमद्भिः।
स्वाध्यायाध्यायकात्स्न्र्ये स्वविधिपरविधिप्रेरणा तावदास्तां
कृत्स्नापातप्रतीतौ किमिति कृतधियःकृत्स्नचन्तां न कुर्युः।।10

प्राधीतस्यैकरूपप्रयतननियतादेकरूपोपकारात्
विद्यास्थानैक्यसिद्धौ क्रमनियतियुताकाङ्क्ष्यैकप्रबन्ध्यम्।
अध्यायादिष्विवावान्तरविषयफलाद्यन्यतात्राप्यभेत्री
तत्तुल्यःकर्तृभेदः कलिबलकलुषैः कल्पितेऽर्थे विरोधः।।11

तत्तद्वैशिष्ट्यभेदाद्यदगाणि भिदुरा देवता पूर्वभागे
संज्ञावैषम्यमात्रादपि कथमियताधीतयष्टव्यभङ्गः।
उद्देश्याकारभेदोऽस्त्ययमिति हविषामुक्तिभिन्ने प्रयोगे

दौर्बल्यं त्वक्षवेद्यान्मितिचरमतया द्रव्यतो देवतायाः।।12

जैमिन्युक्तं विरुद्धं यदिह बहुविधं दर्शितं सूत्रकारैः
तस्मादत्रैकशास्त्र्यं हठकृतमिति न ब्रह्मसंवाददार्ढ्यात्।
तन्नस्तात्पर्यभेदैर्विहतिपरिहृतिः काण्डवत्काण्डयोस्स्यात्
बाह्याक्षेपार्थगूढाशयवचनभवद्भ्रान्तिशान्त्यादिसिद्धेः।।13

आक्षिप्य स्थापनीयाः कतिचिदिह नयाःपूर्वकाण्डप्रणीताः
केचिद्व्युत्पादनीयाःक्वचिदपवदनं ख्याप्यमौत्सर्गिकस्य।
इत्थं सर्वत्र चिन्ताक्रम इति समतां वीक्ष्य मध्यस्थदृष्ट्या
शास्त्रैक्ये पौनरुक्त्यप्रभृतिपरिहृतिस्सावधानैर्विभाव्या।।14
वृत्तिग्रन्थे तु जैमिन्युपचरिततया षोडशाध्याय्युपात्ता
सङ्कर्षः काशकृत्स्नप्रभव इति कथं तत्त्वरत्नाकरोक्तिः।
अत्र ब्रूमस्सदुक्तौ न वयमिह मुधा बाधितुं किञ्चिदर्हाः
निर्वाहस्तूपचारात् क्वचिदिति घटते ह्येकतात्पर्ययोगः।।15

सौत्री सङ्ख्या शुभाशीरधिकृतिगणना चिन्मयी ब्रह्मकाण्डे
तादर्थ्येऽनन्तरत्वेप्यधिकरणभिदा नाल्पसारैः प्रकल्प्या।
अक्षोर्म्याशाहिकाष्ठाद्विरदमुनिवसूर्म्यद्रितत्त्वातिशक्व-
र्यक्षैरक्षैः प्रयाजैरिह भवति रसैः पादनीतिप्रबन्धः।।16

शास्त्रं त्वेतत्समन्वित्यविहतिकरणप्राप्तिचिन्ताप्रधानैः

अध्यायैः षोडशाङ्घ्रि द्विकयुगभिदुरं षट्कभेदादिनीत्या।
तत्राद्यं वक्ति सिद्धं विषयमपि परं तत्प्रतिद्वन्द्वियुग्मं
स्वप्राप्तेः साधनं च स्वयमिति हि परं ब्रह्म तत्रापि चिन्त्यम्।।17

तत्राद्येऽत्यन्तगूढाविशदविशदसुस्पष्टजीवादिवाचः
पश्चात् स्मृत्यादिकैरक्षतिरहितहतिः कार्यताभ्रेन्द्रियादेः।
दोषादोषौ तृतीये भवभृदितरयोर्भक्तिरङ्गानि चाथो-
-पासारोहप्रभावोत्क्रमसरणिफलान्यन्तिमे चिन्तितानि।।18
स्रष्टा देही स्वनिष्ठो निरवधिमहिमापास्तबाधः श्रिताप्तः
खात्मादेरिन्द्रियादेरुचितजननकृत् संसृतौ तन्त्रवाही।
निर्दोषत्वादिरम्यो बहुभजनपदं स्वार्हकर्मप्रसाद्यः
पापच्छिद्ब्रह्मनाडीगतिकृदतिवहन् साम्यदश्चात्र वेद्यः।।19

विध्युक्त्याधीत्य वेदान् विधिबलविरतावन्यजादेव रागात्
कृत्स्नं मीमांसमानाः क्रमत इति परब्रह्मचिन्तां तरन्ति।
प्राप्ते तुर्ये युगेस्मिन् परिमितबलधीप्राणतद्विघ्नदृष्ट्या
कालक्षेपाक्षमत्वात् कतिचन कृतिनश्शीघ्रमन्ते रमन्ते।।20

रागान्मीमांसते चेत् स्वयमिह यततां किं गुरूक्त्येति चेन्न
ब्रह्मज्ञानाप्तये गुर्वभिगमनविधेस्तेन तत्त्वोपदेशात्।
सद्विद्याचार्यवत्त्वे प्रथयति च परब्रह्मवित्तिं तथान्या-

प्याचार्यादित्यधीतेः नियमविधिरसौ निश्चितो नीतिविद्भिः।।21

सिद्धे व्युत्पत्तिराद्या न भवति न च धीर्लक्षणात् युज्यतेस्मिन्
किं शास्त्रेणान्यसिद्धे न च निशमयितुः सिद्धबोधे फलं स्यात्।
ब्रह्मण्येवं न मानान्युपनिषद इति स्तम्भिते तद्विचारे
शास्त्रारम्भं चतुस्सूत्र्यघटयदुचितैर्न्यायभेदैश्चतुर्भिः।।22
सिद्धे व्युत्पत्त्यभावे स्वरिव फलतया लक्ष्मभङ्गे च लभ्यं
ब्रह्मान्योक्त्यानुमानप्रमितमपि भवत्वंशतः शास्त्रवेद्यम्।
विध्यर्थत्वेप्यबाधात् परविषयवचः स्वार्थमानं भवेदि-
त्यन्वारुह्योक्तिदैन्यं न हि सहत ऋजुः सूत्रकृद्द्रावदूकः।।23

द्वाभ्यामादौ प्रतीतिप्रजननमुदितं सिद्धरूपे परस्मिन्
द्वाभ्यां वैफल्यशङ्का तदनु परिहृता शास्त्रतज्जन्यबुद्ध्योः।
औचित्यानेकभाष्यस्वरसगतिमती प्राक्तनी वर्तनीयं
शास्त्रारम्भार्थमेकं त्रितयमिह परं शास्त्रमित्याहुरेके।।24

यत् तत् सेनेश्वरार्यैरगणि वकुलभृत्किङ्करैरङ्ग्यकारि
व्यासार्यैर्न्यासि च द्विः श्रुतमिति विशदं विष्णुचित्तैर्विवव्रे।
अश्रौषं शेषकल्पादहमपि विदुषो वादिहंसाम्बुवाहात्
अद्धा निर्धार्यतेऽतश्चतुरधिकरणी ब्रह्मचिन्तोद्यमार्था।।25

व्युत्क्रम्यात्राद्यतुर्यावभिदधति नयौ केचिदप्राप्तमेतत्
बोधासिद्धौ कथं तत्फलमिह विमृशेत् सिद्धवत्कारमान्द्यात्।

मध्यौ द्वौ रूपनामप्रजननविषयौ यत् विदुस्तच्च मन्दं
सत्युक्तेऽपेक्षितेर्थे विफलविभजनं नोचितं नीतिसूत्रे।।26

कार्ये व्युत्पत्तिराद्या नियतमिति गिरस्तत्परा एव सर्वाः
नान्या वेदेपि नीतिस्तत उपनिषदामूषरप्रायतैव।
नातस्तद्वेद्यमीमांसनमुचितमिति प्रत्यवस्थीयमाने
सिद्धे व्युत्पत्तिमाद्यां बहुमुखमवयन् ब्रह्म जिज्ञास्यमाह।। 27

अङ्गुल्या निर्दिशन्तः किमपि किमपि तद्वाचकांशैः प्रयुक्तैः
बालान् व्युत्पादयन्ति क्रमभवमिलितज्ञापकत्वं विदन्तः।
सङ्घातास्ते पदानां विदधति च धियं क्वापि सिद्धे विशिष्टे
कर्तव्ये क्वापि चेति क्वचिदिह नियतिः शब्दशक्तेर्न कल्प्या।28

संसारेनादिसिद्धे मुहुरनुभवतः सञ्चिताः संस्क्रियास्स्युः
संस्कारोद्बोधकाश्च स्वयमुपनिपतन्त्यप्रकम्प्यात् प्रवाहात्।
तत्तज्जातीयभेदग्रहणसमुचिता वृत्तयस्तन्निदानाः
तद्वत् स्याच्छिक्षकादिव्यवहृतिषु शिशोरैदमर्थ्यादिबोधः।।29
दक्षैराधोरणाद्यैरनुमितविविधस्वप्रयासोपयोगैः
शिक्षाभेदा विचित्रा गजविहगमुखान् ग्राहयद्भिः प्रयुक्ताः।

तस्मात् सार्थो मनुष्यप्रभृतिषु च तथाभूतशिक्षाविशेषः
कल्पो भाष्योदितोऽयं न यदि कथमसौ कल्पतेऽन्योपि
मार्गः।।30

कस्मैचित्सिद्धमर्थं कमपि कथयितुं चेष्टया चोद्यमानः
तस्मै तं वक्ति तद्धीसमविषयतया शिक्षते तद्वचोन्यः।
आदिष्टो बोधनार्थं यदिह वितनुते तत्तदर्थं हि युक्तं
तद्वाक्यात्सिद्धवेदी प्रयतत इति चेदस्त्वनादेशिकं तत्।।31

पुत्रस्तेऽभून्न सर्पोऽयमिति वचनतः प्रीत्यभीत्यादिलिङ्गैः
तद्योगार्थं तदूह्यं विषयनियतिरासत्तिपूर्वैः क्वचित्स्यात्।
आवापोद्वापभेदात् प्रतिपदनियता शक्तिरप्यत्र सिद्ध्येत्
भूयोदृष्ट्यादिसाहायकमिह वचसः कार्यपक्षाविशिष्टम्।।32

कार्ये व्युत्पत्तिराद्या भवतु तदपि किं शक्तितात्पर्यसिद्धेः
प्राग्व्युत्पत्तिः क्रियायां नृवचसि निगमे त्वन्यथेत्यभ्युपैषि।
स्थाप्यातोऽनन्यथासिद्ध्यनुगमनियतैस्सत्प्रयोगैर्हि शक्तिः
कोऽसौ पाञ्चाल इत्याद्युचितविरतिकं सिद्धमात्रेऽपि वाक्यम्।।

दुःखासम्भिन्नदेशप्रभृतिफलतया चोदनास्वेव सिद्धं
श्रौतत्वादार्थवादिक्यपि भवति फलं रात्रिसत्रे प्रतिष्ठा।

**अङ्गीकुर्मो निषेधानुगुणमिति तथानर्थकृत्त्वं निषेध्ये**
**विध्यर्थैरप्यतस्स्यात् अवितथविषया ब्रह्मधीरर्थवादैः ।।34**

जन्माद्यधिकरणम् 2

**सूत्रम्- जन्माद्यस्य यतः । 2**

**जन्माद्यैश्चेद्विशेष्यं भवति बहुलताऽथोपलक्ष्यं ब्रवीषि**
**ज्ञाताज्ञातादिदौस्थ्यं व्यतिषजति न चालक्षिते स्यात्परीक्षा।**
**उद्दिष्टब्रह्मचिन्ता तत इह कथमित्यत्र हेतुत्वलक्ष्यः**
**पुंसूक्तादिप्रसिद्धो गुणनिधिरघजित् ब्रह्शब्दार्थ उक्तः।।35**

**नाना चेल्लक्षणानि स्वरसभिदुरता ब्रह्मणि स्याद्विशेष्ये**
**खण्डो मुण्डश्च गौरित्यभिलपनसमा धर्मिशब्दैकतात्र।**
**तेष्वेकं चेद्यथान्यत्समुदितमफलं स्याद्व्यवच्छेद्यहानेः**
**खण्डत्वादिक्रमाच्चेत्यसदविहतितः खण्डतादेर्विशेषात्।।36**

**तत्तत्स्वप्रत्यनीकव्युदसननियतं भेदकं नान्यबाधि**
**व्याघातः कालभेदान्न भवति जननस्थापनध्वंसनानाम्।**
**प्रत्येकं लक्षणत्वं सुवचमिह बहूदाहृतिर्धीमहिम्ने**
**संभूयाप्याहुरेके फलमपि च तदाशङ्कितार्थव्युदासः।।37**

**ज्ञातं चेन्नोपलक्ष्यं नच यदि नतरां लक्ष्मयोगाप्रतीतेः**
**ज्ञाताज्ञातांशभेदस्त्विह दुरभिलपो लक्षणेनैव वेद्ये।**
**ब्रह्मत्वं ब्रह्मशब्दान्वितिरपि विदिते ह्यत्र नो चेन्न शङ्का**
**मैवं नानागमोद्यद्विशयशमनतः श्रीमति ब्रह्मतोक्तेः।।38**

**यावल्लक्ष्यावबोधं यदवगतिरतो लक्षणात्तद्विशेष्यं**
**यस्याबोधेपि पश्चाद्यदवगतिरिदं स्यात्तु तेनोपलक्ष्यम्।**
**तस्माद्द्वेधापि भाष्येऽनुमतिरनुचितेत्याशयाज्ञस्य चोद्यं**
**मोक्षार्थोपास्यभेदे ह्युभयमपि समन्वेति विद्याविकल्पात्।।39**

**चन्द्रे शाखेव शान्ते महसि तटगतं लक्षणं कारणत्वं**
**सत्यज्ञानादिवाक्यैरपमृदितगुणं तद्विभातीति डिम्भाः।**
**एकत्रार्थे विशेष्ये प्रतिपदनियतावर्ज्यतत्तन्निमित्त-**
**द्वारावृत्तिं पदानामिह विदुररुणाद्युक्तिवन्न्यायवृद्धाः।।40**

<u>शास्त्रयोनित्वाधिकरणम् 3</u>

**<u>सूत्रम्- शास्त्रयोनित्वात् 3</u>**

**वीतावीतप्रयोगक्रमनियतिमती कार्यता विश्वमेतत्**
**सर्वज्ञेन प्रक्लृप्तं गमयति विफलस्त्वत्र शास्त्रैर्विचारः।**
**इत्युन्नीतौ लघुत्वादनुमितिवशतः कर्मजैश्वर्ययुक्तः**

विश्वामित्रादिनीत्या स्फुरति विभुमिहासूत्रयच्छास्त्रवेद्यम्।।41

क्षित्याद्यं कार्यताद्यैः कटकमकुटवत् कर्तृपूर्वं स कर्ता
सिद्ध्येदत्राण्वदृष्टप्रभृतिजनकदृक् सर्वशक्तिश्च मैवम्।
श्रोत्राद्यैस्सौरभादिग्रहणरुचिरियं तादृशव्याप्त्यभावात्
सर्वं हेतुं न पश्येत् घटकृदिह न चाकर्तृता तावतास्य।।42

कार्यत्वात् स्याद्विवादास्पदमिदमखिलं  सर्ववित्कर्तृपूर्वं
यन्नैवं तद्धि नैवं पुरुषवदिति नानन्यथासिद्ध्यभावात्।
हेतावेतादृशात्मन्यविदुरभिदुरं व्याप्त्यसिद्ध्यादिदौःस्थ्यं
तद्भंगे लक्षणानामगणि गमनिका तत्त्वमुक्ताकलापे।।43

यद्यप्यात्मान्तरादेरनुमितिरनघा लिङ्गभेदैस्तथापि
प्रत्यक्षव्याप्तिशैली न खलु शिथिलिता कुत्रचित्पक्षभेदे।
आम्नाये त्वद्भुतोक्तिर्न भवति वितथा तादृशाप्तोक्तनीत्या
बाधाभावादिसाम्याद्विहतिमतिभवेल्लोकवत् गौणतादिः।।44

नन्वाम्नायप्रधानाः क्वचिदनुकथयन्त्यस्मदादेरशक्यैः
कार्यैः कर्ताऽनुमेयः पर इति तदभिप्रैति जन्मादिवाक्यम्।
तस्मादीशानुमानत्यजनमनुचितं वैदिकस्येति चेन्न
क्वाप्यौचित्योपदेशाद्यत इति च सदाद्युक्तिसिद्धानुवादात्।।45

समन्वयाधिकरणम् 4

**सूत्रम्- तत्तु समन्वयात् 4**

**कर्तव्ये ह्यर्थ उक्ते निशमयितृफलं सिद्धरूपे तु न स्यात्**
**प्रीत्या साफल्यक्लृप्तौ वितथमपि वचः किं न दृष्टं तदर्थम्।**
**विद्यार्थत्वेऽन्यदृष्टेर्विषयवदनृतं तत् परीक्ष्यं न भावीत्या-**
**क्षेपेऽनन्यशेषं निरवधिकसुखे शास्त्रतात्पर्यमाह।।46**

**तात्पर्यं ब्रह्मतत्त्वेप्यविहतिविधिनाप्येकवाक्यत्वपक्षे**
**भेदेपि स्यादसिद्धेर्न भवति बलिभुग्दन्तसङ्ख्योक्तिसाम्यम्।**
**स्वादार्थत्वं मृषात्वक्षममिति न मृषेत्यूहने प्रीत्ययोगात्**
**बालोपच्छन्दनादिष्वपि विषयतथाभावबुद्ध्यैव हर्षः।।47**

**यत्प्रीत्यर्थं वचस्तन्निखिलमनृतमित्यर्भकप्रायवाक्यं**
**सत्योक्त्यानन्ददृष्टेर्न च विहतिरिहाध्यक्षतश्शास्त्रतो वा।**
**तेनानन्यार्थसिद्धोक्त्यनृतविषयताशङ्कनस्तम्भनेन**
**त्रय्यन्तास्सत्यनित्याद्भुतपरमपरब्रह्मनिष्ठाः प्रमाणम्।।48**

**ब्रह्मैके निष्प्रपञ्चीकरणविधिपदं ध्यानविध्यर्थमन्ये**

निर्धर्मद्वैतवाक्योपचरितमितरे सिद्ध्यतीति ब्रुवन्ति।
तेषामेषां स्वपक्षस्ववचनविहतिव्याकुलानेकजल्पः
कल्पोऽयं बाह्यकल्पः कृतमतिपरिषत्पीठमर्दैरमर्दि।।49

अन्य़ार्थो ह्यर्थवादः स्तुतिमुखमुखतः स्थापितः प्रागिदानीं
स्वातन्त्र्येण प्रमाणीक्रियत इति ततः काण्डयोस्स्याद्विरोधः।
न स्यात्सामान्यतो हि प्रथममभिदधे मानतास्थापनार्थं
केषांचित्स्वार्थतोक्ता स्वत इह सुभगे बोधमात्रात्पुमर्थे।।50
त्रेधा सर्वत्र वेदे नियतविभजने चोदनाद्यंशभेदैः
चत्वारोप्यर्थवादा मुनिभिरभिहिता ब्राह्मणांशस्य शेषाः।
अत्रातच्छेषतोक्तौ स्मृतिहतिरिति चेद्विद्धि दत्तोत्तरं तत्
सामान्योक्तिर्हि सेयं तत उपरि यथामन्त्रविध्यन्यतोक्तिः।।51

आम्नातैरैहिकार्थैरविगुणसफलैश्शाकुनज्यौतिषाद्यैः
पारत्रिक्या प्रवृत्याप्यतिनिपुणधियामागमाश्वाससिद्धौ।
शब्दे तस्माच्च बोधे सति परविषये दोषबाधव्यपेते
मानं तत्र स्वतोसौ न कथमितरथा नैगमाध्वापलापः।।52

शास्त्रारम्भोपपत्यै चतुरधिकरणीपेटिकेयं प्रवृत्ता
लक्ष्यस्योक्तं विशेषद्वयमिह घटते वक्ष्यमाणोपजीवि।
सद्ब्रह्माद्युक्तिवेद्यः पर इति हि वदेत्कारणत्वाधिकारे
वक्ष्यत्यस्य द्विलिङ्गाद्यधिकृतिषु पुनस्तादृशानन्दतादीन्।।53

ईक्षत्यधिकरणम् 5.

**सूत्रम् - ईक्षतेर्नाशिब्दम्। 5. गौणश्चेन्नात्मशब्दात्। 6. तन्निष्ठस्य मोक्षोपदेशात् ।7. हेयत्वावचनाच्च। 8. प्रतिज्ञाविरोधात्। 9. स्वाप्ययात्। 10. गतिसामान्यात् । 11. श्रुतत्वाच्च। 12.**

**आत्मन्येवं परस्मिन्नकृत इति मिते विश्वहेतुत्वलक्ष्ये
शास्त्रैकस्थापनीये निरुपधिपरमप्रेमयोग्ये प्रसक्ते।
ईदृक्त्वं स्याद्यथार्हं प्रकृतिपुरुषयोर्नानुमानाद्ययोग्यौ
दुःखास्पृष्टौ च तावित्यथ परकथनं दोधवीति क्रमेण।।54**

**गौणेक्षासाहचर्यान्न तु बहुभवनप्रेक्षणं नैव मुख्यं
दृष्टान्ताद्यैरिहाभात्यनुमितिरचितस्तादृशाज्जन्म युक्तम्।
सच्छब्दस्तेन मूलप्रकृतिमविकृतिं व्याहरेदित्ययुक्तं
श्रुत्यान्येषां निरोधात् त्वदभिमततिरस्कारिलिङ्गादिभिश्च।।55**

**ज्ञाते ह्येकत्र सर्वं विदितमिति भवत्यैक्यसिध्यै प्रतिज्ञा
मृत्तत्कार्यादयश्च त्रय इह कथितास्तस्य दृष्टान्तभेदाः।
तेनाव्यक्तानुमानं कथितमिति वृथोत्कण्ठितं हेत्वनुक्तेः**

**सारूप्यादेश्च हेतोरुपरि परिहृतेरत्र संभावनोक्तेः।।56**

**आदेशात्मस्वशब्दैरनितरशरणैस्त्वं तदैक्योपदेशात्**
**जीवेन स्वेन साहंकरणमनहमोऽचिद्गणस्य प्रवेशात्।**
**एकज्ञानेन सर्वं विदितमिति गिरा सर्वतादात्म्यवाचा**
**शाखाविद्यान्तरादेरपि बहुभविता विश्वविद्विश्वमूर्तिः।।57**

आनन्दमयाधिकरणम् 6

**सूत्रम् - आनन्दमयोऽभ्यासात्। 13. विकारशब्दान्नेति चेन्न प्राचुर्यात्।14. तद्धेतुव्यपदेशाच्च।15. मान्त्रवर्णिकमेव च गीयते।16. नेतरोनुपपत्तेः।17. भेदव्यपदेशाच्च।18. कामाच्च नानुमानापेक्षा। 19. अस्मिन्नस्य च तद्योगं शास्ति। 20.**

**मुख्येक्षा यद्यभीष्टा भवतु तदुचिते सा पुनर्जीवतत्त्वे**
**सद्विद्यायां हि शब्दैस्त्रिभिरुपरि सतस्तस्य जीवैक्यमुक्तम्।**
**इत्यूहादुज्जिहानं प्रशमयितुमथ प्रस्तुतो विश्वकर्ता**
**जीवस्यप्यन्तरात्मा निरुपधिकमहानन्दथुस्स्थाप्यतेत्र।।58**

**दृष्टः पूर्वं विकारे मयडिति चरमेप्येवमस्त्वित्ययुक्तं**
**मध्ये तद्भङ्गदृष्टेः प्रचुरमिह वदेत् प्रत्ययोऽन्यस्य बाधात्।**
**आनन्दप्राचुरी च प्रकृतपरसुखाल्पत्वलब्धावधित्वात्**
**दुःखाल्पत्वानपेक्षा परदुरितभिदश्शासितुस्तद्विरोधात्।।59**

**आत्मा तस्यैष एवेत्युदितमनितरात्मत्वमस्यैव वक्तुं**
**शारीरोक्तिश्च तस्मिन् अखिलतनुतया स्यादसङ्कोचवृत्तिः।**
**शोध्यत्वं तत्तदर्थानुगुणमिति विभोस्तत्प्रसाध्यत्वमात्रं**
**प्राप्येस्मिन् प्राप्तिरूपा परविद उपसंक्रान्तिरानन्दसिन्धौ।।60**

**निर्देहेऽस्मिन् निरंशे न हि भवति शिरःपक्षपुच्छादि किञ्चित्**
**तस्मात्पुच्छं प्रतिष्ठेत्युदितमिह परं ब्रह्म भातीति चेन्न।**
**सोढा पुच्छत्वक्लृप्तिर्यदि कथमितरन्नानुमन्येत कल्प्यं**
**ब्रह्मण्यात्मप्रतिष्ठावचनमनितराधारताख्यापनाय।।61**

<u>अन्तरधिकरणं 7</u>

<u>**सूत्रम् – अन्तस्तद्धर्मोपदेशात्। 21 भेदव्यपदेशाच्चान्यः। 22**</u>

**भूयिष्ठानन्तपुण्योपचयबलसमुद्बुद्धपूर्वोक्तभूम्नां**
**शक्रादिन्यायतस्स्यात् त्रिगुणतनुभृतामीश्वराणां प्रवाहः।**
**तन्नाकर्मोत्थदिव्याकृतिजनिमहिमा शासिता सर्वपुंसां**
**नित्यश्रीर्ब्रध्नबिम्बे श्रुत इति स य इत्युक्त एवैष एकः।।62**

**सर्वेभ्यः कल्मषेभ्यो ह्युदित इति वदत्यन्तरादित्यविद्या**
**तस्माच्छेषाभ्यनुज्ञानयत इति विभोः पुण्ययोगोस्तु मैवम्।**
**आम्नातोऽनन्यशास्यस्स्ववशपरफलस्साधुना नैष भूयान्**
**स्यात्पुण्ये लक्ष्मयोगादिति न सुकृतमित्यादिना पाप्मशब्दः।।63**

**प्रख्यातं शुद्धसत्वं किमपि तदनघं द्रव्यमव्यक्ततोन्यत्**
**तद्रूपं  रूपमैशं दिवि कनति तथा शेषशेषाशनाद्यैः।**
**नित्यं तत्सूरिसेव्यं परतरमजहत्स्वस्वभावस्स देवः**
**पुंसां संसारशान्त्यै विपरिणमयति व्यूहपूर्वैर्विभागैः।। 64.**

**देहत्वात् सप्तधातु त्रिमलमघभवं दुःखकृन्नाशयुक्तं**
**सांशत्वादेव  हेतोरिति यदि तदसत् धर्मिमानोपरोधात्।**
**बाधः शास्त्रैकवेद्ये क्वचिदपि न भवेत् अन्यथातिप्रसङ्गात्**
**यत्तु स्वेच्छावतारेष्वभिनयति तदप्यासुरोपप्लवार्थम्।। 65**

<u>आकाशाधिकरणं। 8</u>

**<u>सूत्रम्--आकाशस्तल्लिङ्गात्। 23.</u>**

इत्थं विद्यात्रयेण स्थिरचरचिदचिद्देहिनः सर्वहेतोः
अव्यक्ताज्जीववर्गादपि समधिकता यद्यपि स्यात्तथापि।
उत्थानद्वारभेदात् क्रमत इह मृदूपक्रमक्रूरनिष्ठान्
अध्यायेस्मिन्निरुन्धन् अधिकरणगणैस्तद्गुणानुद्गृणाति।।66

शब्दैस्सद्ब्रह्ममुख्यैः श्रुतिशिरसि मितं कारणं किञ्चिदेकम्
सङ्कल्पाभ्यासरूपैरतदननुगुणैश्चिन्तितस्तद्विशेषः।
भूताकाशादिशङ्काजननसमुचितैर्नामभिः कारणस्थैः
क्षिप्त्वा तत्पादशेषे श्रुतिसमुदयनासम्भवोक्त्या भुनक्ति।।67

आकाशप्राणशब्दावनितरगतिकौ रूढिभङ्गेन नेयौ
ज्योतिश्शब्दस्तु रूढ्या प्रथयति पुरुषं दिव्यतेजोविशिष्टम्।
प्रख्यातेन्द्रादिशब्दस्तदनु नियमितस्तद्विशिष्टप्रवृत्त्ये-
त्येवं स्यात् पेटिकैषा द्विकयुगलवती शब्दवृत्तिक्रमेण।।68

अत्राकाशस्त्वशेषप्रसवविलयभूः साम्निदृष्टस्स्वनाम्ना
निर्दिष्टस्तैत्तिरीयेप्यनितरजनितः स्वात्मनः संभवोक्त्या।
मैवं सिद्धानुवादो ह्ययमथ च परप्राप्यतादिर्न तस्मिन्
तत्कर्तात्मा विपश्चित् श्रुत इह विहता स्वात्मनस्तत्प्रसूतिः।।69

प्राणाधिकरणम्। 9

**सूत्रम्–अत एव प्राणः। 24**

**प्राणायत्तं हि देहादिकमिह विदितं तेन तत्कारणत्वं**
**श्रुत्युक्तं रूढिशक्त्या सुदृढमिति न तद् व्योमवत् बाधनीयम्।**
**तन्न प्राणस्य काष्ठादिषु महिमहतेः पूर्ववच्चानुवादात्**
**आकाशोक्तेरिवोक्तेर्भगवति निखिलप्राणनस्यापि दृष्टेः।। 70**

ज्योतिरधिकरणम्। 10

सूत्रम्–ज्योतिश्चरणाभिधानात् । 25. छन्दोभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगमात्तथाहिदर्शयति। 26. भूतादिपादव्यपदेशोपपत्तेश्चैवम्। 27. उपदेशभेदान्नेति चेन्न उभयस्मिन्नप्यविरोधात्। 28

**नोक्तिं व्याहन्ति लिङ्गं किमपि भवति तु ख्याततत्त्वानुकूलं**
**शब्दश्चानन्यनिष्ठः श्रुत इति न परो ज्योतिराद्युक्तिवेद्यः।**
**विश्वोत्पत्त्युक्त्यभावेऽप्यवगतमिह तल्लिङ्गमित्याक्षिपन्तं**
**रुन्धेऽथाधिक्रियाभ्यां तदुचितचिदचिद्वर्गवैशिष्ट्ययुक्त्या।। 71**

**कौक्षेयज्योतिषैक्यं कथितमिह परज्योतिषस्तस्यविश्वो-**

**पादानत्वं च विद्यान्तरविदितमतः कारणं वह्निरस्तु।**
**मैवं पुंसूक्तवाक्योदितपरपुरुषप्रत्यभिज्ञप्त्यबाधात्**
**गायत्र्युक्तिस्तु साम्यादपि च निगदितस्तस्य भूतादिपादः।।72**

**उत्थानं ज्योतिरादावधिकरणयुगे कारणव्याप्तलिङ्गात्**
**इत्याभाष्यान्यलिङ्गं स्ववचसि विहितं नेति भाष्यं कथं स्यात्।**
**इत्थं विश्वादिलिङ्गं सदिह न तु पराभीष्टलिङ्गं समस्ती-**
**त्युत्पश्यन् पूर्वपक्षी व्यवहरति तथा व्याहतिस्तत्र शङ्क्या।।73**

<u>इन्द्रप्राणाधिकरणम् 11</u>

<u>**प्राणस्तथाऽनुगमात्। 29. न वक्तुरात्मोपदेशादिति चेत् अध्यात्मसंबन्धभूमाह्यस्मिन्।30. शास्त्रदृष्ट्या तु उपदेशो वामदेववत्। 31. जीवमुख्यप्राणलिङ्गान्नेति चेन्न, उपासात्रैविध्यादाश्रितत्वादिह तद्योगात्। 32.**</u>

**विद्या प्रातर्दनी सा वदति हिततमोपास्तिकर्मेन्द्रमेव**
**ख्यातप्राणेन्द्रचिह्नान्वितमपि तदसौ विश्वकर्तेति चेन्न।**
**ब्रह्म त्रेधा ह्युपास्यं बहुविधचिदचित्कञ्चुकं स्वात्मना च**
**प्राणेन्द्रप्रक्रमोपि प्रबलतरमहावाक्यवैघट्यभग्नः।।74**

यल्लिङ्गं कारणैकस्थितमिति कथितं ज्योतिषीन्द्रे च तत्तु
प्रख्यातान्यैकनिष्ठं प्रथममितमतस्तन्मुखोत्थित्ययोगः।
अप्राप्ते तद्विमर्शे प्रकृतशिथिलता नेति चेत्सत्यमेतत्
विष्णूत्पत्त्युक्तिनीतिक्रमत इह पुरोवादमुत्प्रेक्ष्य शङ्का।।75

ज्योतिःप्राणेन्द्रशब्दाः परतरविषयाः कारणव्याप्तधर्मात्
इत्येतत्साध्वमीषां बहुविहतिमती ख्यातमात्रे तु वृत्तिः।
तत्कौक्षेयानलात्मा कथित इह तथा ध्यानतस्तत्फलाप्त्यै
मुख्यप्राणादिलिङ्गं तदुपहितपरोपासनान्मोक्षणाय।।76

कार्यं यत्कर्मवश्यं यदपि दृढमितं तन्निरूढैस्तु शब्दैः
निर्दिष्टे ब्रह्मणि स्यात्क्वचिदहतिहता रूढिरैन्द्रीनयेन।
तल्लिङ्गानन्यथासिद्ध्यधिगमनबलात्तद्विशिष्टे विवक्षा
स्यादीशे ज्योतिरिन्द्राद्यभिलपनपदेऽहंत्वमादीरिते च।।77

स्वेच्छातस्सर्वहेतुश्शुभगुणविभवानन्तनिस्सीमहर्षः
शुद्धाकर्मोत्थनित्याकृतिरनुपधिकाकाशनादिस्वभावः।
सप्राणाप्राणभेदव्यतिभिदुरजगत्प्राणनो दिव्यदीप्तिः
प्राणेन्द्राद्यन्तरात्मा प्रभुरधिकरणैस्सप्तभिः प्रत्यपादि।।78

<u>इति प्रथमाध्याये प्रथमः पादः</u>

अथ प्रथमाध्याये द्वितीयः पादः

**अत्रायोगान्ययोगव्यपनयननयैर्ब्रह्मपादत्रिपादी**
**भागारूढैर्मृदूपक्रमकठिनपरैः प्राय आद्ये प्रसाध्यम्।**
**कृत्स्नाक्षेपोपशान्त्यै प्रथम इह ततः पाद उक्तस्त्रिपादी**
**क्वाचित्काक्षेपपूर्वाखिलकलहसमुन्मूलनाय प्रणीता।।79**

**अस्पष्टस्पष्टरूपस्फुटतरचिदचिल्लिङ्गवद्वाक्यचिन्ता**
**भाष्ये दीपावतारेप्यगणि नयगणैस्सम्प्रवृत्ता त्रिपाद्याम्।**
**अत्यन्तास्पष्टलिङ्गान्वितविषयमुशन्त्याद्यपादं तु केचित्**
**तत्रेदं तारतम्यं नियतनिजबलैः कर्मतार्तीयमानैः।।80**

**पूर्वत्रासिद्धरूपैस्स्वमतिविरचितोन्नीतिभिः पूर्वपक्षः**
**सिद्धैस्साधारणैरप्युपधिनियमितैः प्रत्यवस्था द्वितीये।**
**स्पष्टासाधारणत्वैरुपरि परमतानूक्तिकल्पैरथेति**
**न्यायैकत्रिंशदत्र प्रतिचरणविभक्त्यन्वितान्वेषणीया।।81**

**विश्वं पादे द्वितीये वपुरिति कथयंश्चिन्त्यते वाक्यवर्गः**
**विश्वाधारस्स आत्मेत्यभिलपनपरस्तर्कणीयस्तृतीये।**
**तुर्ये साङ्ख्यादिपक्षोदितपरिपठनभ्रान्तिरुन्मूलनीये-**

**त्येवं केचित्त्रिपादीं जगदुरयमपि श्रोतृबुद्धेस्समाधिः।।82**

सर्वत्र प्रसिद्ध्यधिकरणम् 12

**सर्वत्रप्रसिद्धोपदेशात्। 33. विवक्षितगुणोपपत्तेश्च । 34. अनुपपत्तेस्तु न शारीरः। 35. कर्मकर्तृव्यपदेशाच्च। 36. शब्दविशेषात्। 37. स्मृतेश्च। 38. अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च। 39. सम्भोगप्राप्तिरितिचेन्न वैशेष्यात्। 40.**

**यस्य प्राणश्शरीरं स खलु हिततमोपास्तिकर्म प्रसक्तः**
**तस्मिन्जीवत्वशङ्कां जगदुपजनके सौति शाण्डिल्यविद्या।**
**पूर्वन्यायाच्च युक्तं दमनमिह महावाक्यतःप्रक्रमस्ये-**
**त्युत्थाने प्रक्रमोक्तानुगुणमिति महावाक्यमेकीकरोति।।83**

**अन्वारुह्यात्र भेदं प्रथममधिकृतिर्भाषिता किंनिमित्तं**
**विद्यैकत्वेऽनुवादः पर इह गुणविध्यर्थमेवेति युक्तम्।**
**सत्यं ब्रह्मानुमत्य क्वचिदुपनिषदि क्वापि कल्प्ये विवादे**
**चिन्तैषोदाहृतिस्स्यात् परमतरचितेत्यर्थसिद्धिस्तु बोद्ध्या।।84**

**सर्वत्वं कर्मभिस्स्वैर्जनिमति घटते ब्रह्मशब्दोऽत्र चैवेत्य-**
**ल्पस्थानोऽल्पमानस्सुखतदितरभुग्जीव एवेति चेन्न।**
**तज्जत्वादेरनूक्तेर्विविधगुणभिदादर्शनात्सर्वतादेः**
**स्वारस्यादप्यणुत्वं ह्युपधिकृतमिहोपास्तये ज्यायसि**
**स्यात्।।85**

अत्रधिकरणम्। 13.

**सूत्रम् - अत्ता चराचरग्रहणात् । 41. प्रकरणाच्च । 42. गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्। 43. विशेषणाच्च। 44.**

**अत्ता खल्वोदनादेर्भवभृदिति कठश्रुत्यधीतोऽप्यसौ स्यात्**
**न स्यात् मृत्यूपसिक्तस्थिरचरनिखिलग्रासतस्तल्लयोक्तेः।**
**जीवव्यावर्तनं च प्रकरणविदितं भोक्तृतोक्तिर्द्वयोस्तु**
**प्रेर्यत्वप्रेरकत्वप्रतिनियतरसाच्छत्रिनीत्याथवा स्यात्।।86**

**सत्त्वं स्वाद्वत्त्यनश्नन् ज्ञ इति विभजनात् पैङ्ग्यधीतं तु सत्त्वं**
**बुद्धिः प्राणोऽथवेति त्वृतमिह पिबतोर्जीव एकस्तयोश्चेत्।**
**मैवं जन्तौ तु सत्त्वश्रुतिरियमुचिता कर्मभुङ्नाप्यनश्नन्**
**तत्प्रश्नप्रक्रमोऽन्याशय इदमपि चाभाषि पूर्वापराद्यैः।।87**

अन्तराधिकरणम्। 14

**सूत्रम्- अन्तर उपपत्तेः । 45. स्थानादि व्यपदेशाच्च। 46. सुखविशिष्टाभिधानादेव च। 47. अत एव च स ब्रह्म। 48. श्रुतोपनिषत्कगत्यभिधानाच्च। 49. अनवस्थितेरसम्भवाच्च नेतरः। 50.**

**यद्वृत्तादेः य एषोऽक्षिणि पुरुष इति श्रूयमाणस्तु जीवः**
**यद्वाऽक्ष्णोर्देवताऽर्कः प्रतिकृतिरथवा तत्र दृश्येति चेन्न।**
**एतद्ब्रह्मैतदेवामृतमभयमिदं कंखमित्याद्यधीतेः**
**संयद्वामत्वमुख्यैः स्थितिनियतिबलादर्चिरादृयुक्तितश्च।।88**

**स्वातन्त्र्योत्तंसितासु श्रुतिषु न फलदस्यैव वेद्यत्व वादः**
**कल्याणालोकनादेरिव विधिबलतो वेदनस्यार्थवत्वात्।**
**तस्मादक्ष्यन्तरस्थप्रतिकृतिपुरुषो युज्यते पूर्वपक्षे**
**सेयं पूर्वापरास्वप्यधिकृतिषु यथासंभवं नीतिरूह्या।।89**

**पूर्वन्यायेऽग्निविद्या पुरत उपनता मध्यमस्त्वत्र तस्मात्**
**तद्वन्न ब्रह्मविद्यानुगतिरिति भवेदक्षिविद्या ततोऽन्या।**
**मैवं विच्छित्तिरङ्गैर्न हि भवति मिता चाङ्गताऽनेकधाऽस्याः**
**प्रोक्तं च ब्रह्मविद्यानुगुणमिह फलं प्राक् च न ब्रह्मदृष्टिः।90।**

अन्तर्याम्यधिकरणम्।15.

**सूत्रम् - अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेसात्। 51. न च स्मार्तमतद्धर्माभिलापाच्च। 52. उभयेपि हि भेदेनैनमधीयते। 53.**

**अन्तर्यामी सजीवो बहुविधकरणायत्तधीवृत्त्यनूक्तेः**
**नान्यो द्रष्टेति चोक्तेरिति यदि न नियन्त्रन्तरस्यव्युदासात्।**
**द्रष्टृत्वाद्यं च तत्तद्विषयघटितधीरूपमीशे हि मुख्यं**
**तद्धर्माः काण्वमाध्यन्दिनपठितिगतास्तस्य चात्मा शरीरम्।।91**

**स्थानैक्यादत्र शाखाद्वयपरिपठितावात्मविज्ञानशब्दौ**
**एकार्थावित्यकम्प्यं तदपि कथयतो बुद्धिमेवेत्यपार्थम्।**
**लोकाम्नायप्रसिद्ध्योरनुगमत इमौ चेतने ह्येकतानौ**
**बाधः केनापि नास्मिन् भवति च स त**
**इत्यादिभिस्सामरस्यम्।।92**

अदृश्यत्वादिगुणकाधिकरणम्। 16

**सूत्रम् - अदृश्यत्वादिगुणको धर्मोक्तेः। 54. विशेषणभेदव्यपदेशाभ्याञ्च नेतरौ।55. रूपोपन्यासाच्च। 56**

**दृश्यत्वादेर्निषेधो विकृतिमति भवत्यक्षरे सन्निकर्षात्**
**पञ्चम्युक्ताक्षरं तत् तदवधिकपरः पञ्चविंशोऽस्तु मा भूत्।**
**सर्वज्ञत्वादिदृष्टेः प्रथमसमुदितं त्वक्षरं ब्रह्म शुद्धं**
**पश्चादुक्तं तु जीवादिकमवधितया भेदतस्तत्परोक्तेः।।93**

वैश्वानराधिकरणम्।17

**सूत्रम् - वैश्वानरस्साधारणशब्दविशेषात्। 57 स्मर्यमाणं अनुमानं स्यादिति। 58 शब्दादिभ्योन्तःप्रतिष्ठानाच्च नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात्पुरुषमपि चैनमधीयते। 59. अत एव न देवता भूतं च। 60. साक्षादप्यविरोधं जैमिनिः। 61. अभिव्यक्तेरित्याश्मरथ्यः। 62. अनुस्मृतेर्बादरिः। 63. सम्पत्तेरितिजैमिनिस्तथा हि दर्शयति। 64. आमनन्ति चैनमस्मिन्। 65**

स्वर्लोकादित्यवाताम्बरसलिलमहीरूपमूर्धादिक्लृप्त्या
ध्येयो वैश्वानरात्मा स्थिरबहुविशयः शब्दलिङ्गादिसाम्यात्।
मैवं ब्रह्मेत्यधीतेर्भुवनतनुतया योगतस्त्वग्निशब्दो
वैशिष्ट्याद्वा क्रियाङ्गं स्ववपुषि परधीर्गार्हपत्यादिधीश्च।।94

अन्यस्मिन्नन्यदृष्ट्या न भवति विदुषां क्वापि निश्श्रेयसाप्तिः
तस्मात् वैश्वानरोसौ न पर इति फलं चान्नसिद्ध्यादि मैवम्।
ब्रह्मैव ह्यन्यदृष्ट्यन्वितघटितमिह ब्रह्मशब्दाद्यबाधात्
सर्वाघध्वंस उक्तः फलमपि परमं ब्रह्म च व्याप्तमन्नम्।95

त्रिष्वत्रोपासितॄणां मितहृदयगुहाक्ष्यन्तरश्चिन्त्य उक्तः
विश्वान्तर्यामितादेर्विपुलपरिमितिश्चिन्तनीयस्त्वयेऽथ।
षट्सु ब्रह्मात्मशब्दौ पुरुषपदमपि क्षेत्रतज्ज्ञप्रपञ्च-
व्यावृत्ते विश्वहेतौ प्रकरणनियमान्नामवृत्त्या नमन्ति।।96

तज्जत्वादेर्हि सर्वं जगदभिगदितं ब्रह्मभावेन पूर्वं
सर्वान्तर्यामिता च प्रभवितुरुदिता सर्वतद्देहता च।
तस्मात् विश्वैक्यबाधप्रभृतिबहुविधापार्थबम्भ्रम्यमाण-
क्षुद्रक्षीबोक्तिजालं निखिलमिह नयैः सूत्रकारो निरास।।97
स्वाधीनाशेषसत्तास्थितियतनतया सर्वभावेन तिष्ठन्
ग्रस्ताशेषोऽक्षिनित्यस्थितिरखिलतनुः कल्पिताग्न्यादिगात्रः।
स्वर्लोकाद्यङ्गवैश्वानरमतिविषयो लक्षणस्यादिमस्य

**प्रोक्तः पादे द्वितीये श्रुतिनिकरशिरश्शेखरः श्रीनिवासः।।98**

**इति प्रथमाध्याये द्वितीयः पादः**

अथ प्रथमाध्याये तृतीयः पादः

**स्पष्टैर्जीवादिलिङ्गैर्युतमिह हि वचः साध्यते ब्रह्मनिष्ठं**
**मध्येऽत्राधिक्रियोक्तिस्त्रिषु किमिति न तत् तत्प्रसङ्गात् तदुक्तेः।**
**किञ्चास्यामर्धलोकायतिकनिरसनं प्रस्तुतार्थोपयुक्तं**
**ब्रह्मोत्कर्षश्च सिद्ध्येत् गलति दिविषदां कारणैक्यभ्रमश्च।।99**

**न्यायाः सप्तैव साक्षात् परविषयतया सङ्घटन्तेऽत्र पादे**
**सर्वाधारः स  आत्मा स्वमहिमनिलयस्तत्र तात्पर्यभूमिः।**

**तत्सिद्ध्यै शासनाद्यं कथितमिह मिथस्स्यूतमालोचनीयं**
**सर्वेशत्वं च षष्ठप्रमितनयमितं पश्चिमन्यायरक्ष्यम्।।100**

द्युभ्वाद्यधिकरणम्।18

**सूत्रम्-- द्युभ्वाद्यायतनं स्वशब्दात्। 66.**
**मुक्तोपसृप्यव्यपदेशाच्च। 67. नानुमानमतच्छब्दात्**

**प्राणभृच्च। 68. भेदव्यपदेशात्। 69. प्रकरणात् । 70. स्थित्यदनाभ्याञ्च। 71.**

**सिद्धं प्रागेव मुण्डोपनिषदि परमं ब्रह्म तद्धर्मभेदैः
भेदोक्तेश्चेत्यकाण्डे किमिति पुनरिमां पिष्टपेषं पिनष्टि।
सत्यं क्षेत्रज्ञधर्मैः पटुभिरुपनता प्रक्रियाभेदशङ्का
प्रख्याप्य प्रत्यभिज्ञामपुनरुदयमुन्मूल्यते शब्दपूर्वैः।।101**

**यस्मिन्नोतं मनोऽन्यैस्सह करणगणैर्जायते यश्च नाना
नाड्याधारश्च योऽन्तश्चरति स करणी कर्मभोक्तेति चेन्न।
विश्वाधारात्मभावादमृतवितरणान्मुक्तसृप्यत्ववादात्
प्रागुक्तप्रक्रियैक्यात् अनशनसहितात्
काशनाच्चान्यसिद्धेः।102।
व्याप्तेस्मिन्नक्षमोतं यदि किमिह ततो जन्म चास्येच्छयोक्तं
नाडीचक्रस्य नाभिर्भवति च स परो हार्दरूपेण तिष्ठन्।
निष्कम्पव्यापिनोऽन्तश्चरणमपि शुभैर्विग्रहैरस्ति लोके
सौबालाम्नातवद्वा चरममिदमपि स्यादधिष्ठानमात्रम्।।103**

भूमाधिकरणम्। 19

**सूत्रम्- भूमा संप्रसादादध्युपदेशात्। 72. धर्मोपपत्तेश्च। 73.**

आत्मज्ञानाभिलाषादनुपरतशुचे नारदाय प्रयुक्तं
प्राणे सानत्कुमारं विरमति वचनं हिम्सनार्हस्सजीवः।
अल्पप्रत्यर्थिभूमा निरवधिकसुखोऽप्येष एवेति चेन्न
प्राणाख्यात् सत्यशब्दोदितमधिकतयोपास्यमत्र
ह्युपात्तम्।।104

नामाद्याशान्तवेद्ये प्रतिवचनवशात् प्रश्नतश्चाधिकोक्तेः
प्राणे विश्रान्तिदृष्ट्या भवतु तदवधिः प्रस्तुतात्मोपदेशः।
मैवं जातो हि नामादिवदिह परमादात्मनः प्राण उक्तः
स्वस्मादित्यत्र तत् स्यादिति न विघटनात् स्वारसिक्या
विभक्तेः।।105
प्राणद्रष्टातिवादी तदनुवदनतश्चोदितः सत्यवादः
तस्मात् सर्वाहमर्थः सकलजनयिता प्राण एवेति चेन्न।
एष त्वित्यन्यतोक्तेरतिवदनकृतः प्राक्तनादस्य तद्वत्
न त्वन्योऽस्त्यग्निहोत्री स्वमहिमनिलये ह्यत्र धर्मोपपत्तिः।।106

नामादौ वाक् च तस्योपरि तदनु मनश्चाथ सङ्कल्पनामा
चित्तं ध्यानं च तस्मात् परमपि च बलं स्याच्च विज्ञानपूर्वम्।
अन्नं तोयं च तेजो गगनमपि ततो मन्मथः स्यात् तथाशा
प्राणस्सत्यः परात्मा सकलनियमिता गम्यते भूमवाक्ये।।107

अक्षराधिकरणम्। 20

**सूत्रम् – अक्षरमम्बरान्तधृतेः। 74. सा च प्रशासनात्। 75. अन्यभावव्यावृत्तेश्च। 76.**

**प्रख्याताकाशपूर्वस्वविकृतिवहनादक्षराख्यं प्रधानं**
**तस्याप्याकाशतोक्तौ धृतनिखिलजगत् क्षेत्रितत्वं तु तत् स्यात्।**

**मैवं द्रष्टृत्वपूर्वैरनितरनियतैः शासनायत्तधृत्या**
**किञ्च द्रष्ट्रन्तरस्य व्युदसनमिह तत्तुल्यतद्द्रष्ट्रपोहः।।108**

ईक्षतिकर्माधिकरणम्।21.

**ईक्षतिकर्मव्यपदेशात्सः। 77.**

**लक्षीभूतोयमेकः खलु पुरुष इह ध्यायतेरीक्षतेश्च**
**क्षेत्रज्ञः सोयमण्डाधिप इतरपरात् स्वान्यजीवात् परोसौ।**
**नो चेत् भौमादिभोगप्रकरणविहतिर्बोभवीतीत्ययुक्तं**
**तस्मिन् शान्तामृतत्वप्रभृतिपरगुणख्यात्यनूक्त्योरयोगात्।।109**

**नन्वत्रोङ्कारमात्रात्रयफलगणनारूढभूम्यन्तरिक्ष-**
**प्रत्यासत्या निवासः सरसिजवसतेर्ब्रह्मलोकोऽस्तु मैवम्।**

**पापोन्मुक्तेन लभ्यो ह्ययमिह कथितः सूर्यसम्पत्तिपूर्वं**
**सोढव्यो मध्यलोकैर्व्यवधिरिति समस्तत्समाधानमार्गः।।110**

दहरादिकरणम्। 22.

**सूत्रम् - दहर उत्तरेभ्यः। 78. गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च। 79. धृतेश्च महिम्नोस्यास्मिन्नुपलब्धेः। 80. प्रसिद्धेश्च। 81. इतरपरामर्शात् स ति चेन्नासम्भवात्। 82. उत्तराच्चेदाविर्भूतस्वरूपस्तु। 83. अन्यार्थश्च परामर्शः। 84. अल्पश्रुतेरितिचेत्तदुक्तम्। 85. अनुकृतेस्तस्य च । 86. अपि स्मर्यते। 87.**

**दह्रं हृत्पुण्डरीके गगनमभिहितं तैत्तिरीयश्रुतौ यत्**
**छन्दोगैस्तत्र गीतं यदपि च दहराकाश इत्येतदेकम्।**
**भूताद्यं तत् प्रसिद्धेर्महिमत इति न प्रत्यनीकैरनेकैः**
**श्रौती च स्यात् प्रसिद्धिर्भगवति बलिनी लिङ्गवर्गैस्सनाथा।।111**

**बाह्याकाशश्च यावानयमपि हि तथेत्येतदक्लिष्टमीशे**
**सत्यात्मब्रह्मशब्दा नभसि न कथमप्यन्वयं प्राप्नुवन्ति।**
**कामाधारश्च योसौ समगणि दहराकाशवाचात्र नित्यः**
**तस्यैव ह्येष आत्मेत्यनुवदनमतस्तद्गुणाश्चिन्त्यकामाः।।112**

**सर्वेशाधारतोक्त्या भवतु च हृदयव्योम तद्वाज्यधीतं**
**छान्दोग्यस्थो निषादस्थपतिनयपदं ब्रह्मलोकादिशब्दः।**
**आपस्तम्बश्च वैभाजनपुरमवदद्ब्रह्म सर्वात्मभूतं**
**पूस्तस्य प्राणिनस्स्युस्तदपि तदपि हि स्यात्पुरं सर्ववासात्।।113**

**जीवस्तर्ह्येष आत्मा गुणगणघटनात्तत्परामर्शदृष्टेः**
**अल्पत्वाद्युक्तितश्चेत्यसदनुपधिकात्सत्यसङ्कल्पतादेः।**
**विश्वैकाधारतादेरपि स खलु परो दह्रतौपाधिकी स्यात्**
**प्राजापत्यात्तु वाक्यात् परसमदशया तद्गुणोक्तिर्विमुक्ते।।114**

**दह्राकाशोऽपवर्गप्रद इति गदितुं संप्रसादोक्तिरत्र**
**प्राजापत्ये तु वाक्ये परपरिपठनं प्राप्यनिष्कर्षणार्थम्।**
**आकाङ्क्षाद्यैस्तदेवं परतदितरयोरन्विते वाक्ययुग्मे**
**युक्तं नान्योन्यबाधप्रभृतिकमिति तत्सामरस्यं हि सौत्रम्।।115**

<u>प्रमिताधिकरणम् । 23</u>

**<u>सूत्रम्--शब्दादेव प्रमितः। 88. हृद्यपेक्षया तु मनुष्याधिकारत्वात्। 89.</u>**

**प्राणेशोऽङ्गुष्ठमात्रः क्वचिदनुकथितस्सञ्चरन् कर्मभिस्स्वैः**
**अन्यत्राङ्गुष्ठमात्रं पुरुषमपि यमो निश्चकर्षेति दृष्टम्।**
**तस्मादेतत्प्रमाणप्रमितमुपनिषज्जीवमाहेत्ययुक्तं**
**वाक्यस्थेशानतादेर्नरहृदयपरिच्छित्तितस्तद्धि मानम्।।116**

**नह्यङ्गुष्ठप्रमाणं  हृदयमखिलजन्त्वाश्रयं तत् परस्मिन्**
**व्याप्ते तन्मानतोक्तिः क्वचिदिति मनुजाधिक्रियोक्तिप्रसङ्गे।**
**सूत्रद्वन्द्वद्वयान्तस्त्रिभिरधिकरणैश्चिन्त्यते तद्विशेषः**
**तार्तीयैस्स्थापनीय त्ववजिगमिषिता नेतिकर्तव्यतात्र।।117**

<u>देवताधिकरणम् । 24</u>

<u>**सूत्रम्  -  तदुपर्यपि बादरायणस्सम्भवात्।  90.  विरोधः कर्मणीतिचेन्न अनेकप्रतिपत्तेर्दर्शनात्।  91.  शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्।  92.  अतएव च नित्यत्वम्।  93.  समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च। 94.**</u>

**शब्दात्मा लौकिकार्थाकृतिरियमथवा देवतातो न तस्याः**
**ब्रह्मोपासेत्यनार्षं श्रुतपरिहरणं कल्पनं चाश्रुतस्य।**

विश्वस्रष्टा  च मा भूदनुमितिविषयस्तत्परैस्त्वेष शास्त्रैः
निर्बाधैस्स्थापितः प्राक् स्वयमपि विभुना नैव
शक्यापलापः।।118

सामर्थ्यं देवतानामुचिततनुभृतामर्थिता तापभाजां
सम्पद्येतेति तासामपि भवति परोपास्तिवर्गाधिकारः।
ख्यातं मन्त्रार्थवादप्रभृतिषु निखिलं बाधदोषाद्यभावे
मिथ्येत्युद्घोषयन्तस्स्वत इह कथितां मानतां विस्मरन्ति।।119
द्वेधा वृत्तिः स्तुतौ स्यात् स्वपरगुणमुखी प्राक्तनी तावदर्थ्या
निर्धार्यैःपश्चिमायामपि निपुणधिया मुख्यधर्मैकदेशः।
रुच्यर्थायां च तस्यामनृतकथनतो रोचना न ह्यमुग्धे
भूतार्थे का स्तुतिस्स्यादिति मुनिगदितं गौणतादेर्निवृत्त्यै।। 120

नानादेहाप्तिशक्ताः कथमिह युगपत्कर्मसन्निध्यनर्हाः
तत्तद्वृत्तान्तसत्त्वे श्रुतिषु भवति नानित्ययोगः प्रवाहात्।
काण्डादौ कर्तृवादः प्रवचननियतो वेदनित्यत्वसिद्धेः
ईशः प्राचीनकल्पक्रमत उपदिशेत् वर्णसर्गेपि वेदान्।।121

वेदानामीशबुद्ध्या क्रमनियमहतिः कल्पभेदे यदीष्टा
मन्त्रांशानां तथा स्यान्न खलु तदुचितं व्रीहिसोमादिसाम्यात्।
इत्थं विध्यार्थवादक्रम इति नियते पाक्षिके वा तथात्वे

**पक्षोऽसावाक्षपादः परमतपरिषत्कोटिमाटीकतां नः।।122**

**सौक्ष्म्यात् तुल्याभिघारात्  सहकृदपगमात् छादकादान्यपर्यात्**
**अत्यासत्त्यादिदूरात् बलवदभिभवानुद्भवाक्षोपघातैः।**

**नेक्ष्यन्ते   वर्तमानान्यपि हि सुरगणस्तद्वदन्तर्द्धिशक्तेः**
**प्रख्यातास्सिद्धिभेदा अपि जननतपोयोगमन्त्रौषधीभ्यः।।123**

मध्वधिकरणम्। 25.

**सूत्रम्  -  मध्वादिष्वसम्भवादनधिकारं जैमिनिः। 95**
**ज्योतिषि भावाच्च। 96.  भावं तु बादरायणो अस्ति हि। 97.**

**स्यादेवं देवमात्रे मनुज इव परोपास्तिमात्रं तथापि**
**स्वस्यैवाराध्यभावस्स्वपदमपि फलं यत्र नात्राधिकारः।**
**मैवं सर्वान्तरात्मा स्वतनुभृदिति चोपासते मुक्तिकामाः**
**कामादावर्तते तु स्वपदमपि फलं कल्पमन्वन्तरादौ।।124**

अपशूद्राधिकरणम्। 26.

**सूत्रम्  -  शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि। 98.  क्षत्रियत्वगतेश्च। 99.  उत्तरत्र चैत्ररथेन लिङ्गत् ।  100. संस्कारपरामर्शात्तदभावाभिलापाच्च। 101. तदभावनिर्धारणे च प्रवृत्तेः। 102. श्रवणाध्ययनार्थप्रतिषेधात्। 103. स्मृतेश्च। 104. कम्पनात्। 105.  ज्योतिर्दर्शनात्।  106.**

**जैमिन्युक्तापशूद्राधिकरणसरणेर्नास्ति विद्याग्निलब्धिः
शूद्रादीनां तथापि स्मृतपरभजनाधिक्रिया जाघटीति।
श्रौतृत्वात् भारतादेस्स्वजनिसमुचितैः कर्मभिश्चेत्ययुक्तं
प्राप्ते ब्रह्मोपदेशे ह्युपनयनपरामर्शनादि प्रसिद्धम्।।125**

**शूद्रादीनां भारतादेः  श्रवणमनुमतं पापशान्त्यादिसिद्धयै
वोदार्थापातबुद्धिर्यदनधिकरणा नोपबृंह्येत तैस्सः।
विद्यास्थानानि शूद्रैर्मुरभिदकथयत् पाण्डवायद्विसप्ता-
प्यस्प्रष्टव्यानि तस्मान्न हि विकलधियां
स्यादुपासाधिकारः।।126**

**गीतं शूद्रादिकानामपि परभजनं केवलं  स्वार्हधर्मैः**
**धर्मव्याधस्तुलाधृक् विदुर इति च ते प्राग्भवाभ्याससिद्धाः।**
**वक्ता शूद्रेति जानश्रुतिमभिमुखयन् शोकमस्य व्यनक्ति**
**क्षत्तृप्रैषादिलिङ्गैः स्फुटतरविदितं क्षत्रियत्वं हि तस्य।।127**

आकाशोर्थान्तरत्वादि व्यपदेशाधिकरणम् 27

**सूत्रम्  -  आकाशोर्थान्तरत्वादिव्यपदेशात्।  107.**
**सुषुप्त्युत्क्रान्त्योर्भेदेन।  108. पत्यादि शब्देभ्यः। 109.**

**धृत्वेति प्राच्यवाक्यप्रकृत इह भवेन्मुक्त आकाशनामा**
**बद्धोसौ नामरूपे  वहति तदनु च ब्रह्मभावे जहाति।**
**इत्यन्याय्यं पुरोक्तः पुनरयमभिसंभाव्य एवह्युपात्तः**
**ब्रह्मत्वं न ह्यवस्था श्रुतिषु च युगपत् ज्ञाज्ञतादिर्विभक्तः।।128**

**विश्वात्मानन्तभूमा  नियमनधृतिकृन्मुक्तभोग्यस्वभावो**
**दह्रस्वाधारसर्वो हृदयपरिमितावस्थया सर्वयन्ता।**
**देवादीनामुपास्यो वसुमुखविबुधैः स्वात्मभावेन सेव्यः**
**शूद्राद्योपास्त्यनर्हः प्रभुरिह बुबुधे नामरूपैककर्ता।।129**

**इति प्रथमाध्याये तृतीयःपादः**

अथ प्रथमाध्याये चतुर्थः पादः

**निर्णीतं वाक्यजातं परविषयतया स्पष्टजीवादिलिङ्गं**
**तत्तच्छायानुसारि प्रथयति तु वचस्तत्परं तुर्यपादे।**
**षड्भिर्द्वाभ्यां च तत्र प्रशमयति नयैःसांख्ययोगोत्थशङ्कां**
**घट्टो जाघट्ट इत्थं कथितनिगमनं त्वष्टमं केचिदूचुः।।130**

**द्वाभ्यां क्षेप्यं प्रधानं कपिलमतमथ त्वेकतोऽन्योक्तसंख्या**
**तुर्येणाव्याकृतोक्तेरपि विभुरवधिः स्थाप्यते द्वारवृत्त्या।**
**शुद्धाशुद्धौ च जीवावधिकरणयुगेऽनन्तरं वारणीयौ**
**शेषं तन्त्रान्तरोक्तेश्वरनिरसनकृत् तुर्यपादाष्टकेऽस्मिन्।।131**

आनुमानिकाधिकरणम् 28.

**सूत्रम् - आनुमानिकमप्येकेषामितिचेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च। 110. सूक्ष्मं तु तदर्हत्वात्। 111. तदधीनत्वादर्थवत्। 112. ज्ञेयत्वावचनाच्च। 113. वदतीति चेन्न प्राज्ञो हि प्रकरणात्।**

**114. त्रयाणामेव चैवमुपन्यासः प्रश्नश्च। 115. महद्वच्च। 116.**

**अक्षाद्यव्यक्तनिष्ठं जडमथ पुरुषं तत्त्वकाष्ठां विवच्य**
**ब्रूते वल्ली कठानां परमतपठितां प्रक्रियामित्ययुक्तम्।**
**तत्रस्थानेकवाक्योदितविविधवशीकार्यमुख्यक्रमोक्तेः**
**शान्तात्मा विष्णुरुक्तः पुरुष इह परः प्रत्यभिज्ञाप्यते च।।132**

**न ह्यर्था इन्द्रियाणां प्रकृतिरथ मनो हेतुरेषां न चेष्टं**
**बुद्धिश्चैतन्न सूते न च महति महान् जायते बुद्धिसंज्ञः।**
**भोक्तुर्युक्तं महत्त्वं महति च न भवेदात्मता पारिशेष्यात्**
**अव्यक्तोक्तिः शरीरे तदिह न कपिलप्रक्रियाप्रत्यभिज्ञा।।133**

चमसाधिकरणम्। 29

**सूत्रम् - चमसवदविशेषात्। 117. ज्योतिरुपक्रमा तु तथाह्यधीयत एके। 118. कल्पनोपदेशाच्चमध्वादिवदविरोधः। 119.**

**स्वातन्त्र्येण ह्यजाया निखिजनकता सूच्यते क्वापि वाक्ये**
**बद्धोऽजस्तत्र शेते त्यजति पुनरिमां भुक्तभोगामजोन्यः।**
**इत्युक्तेस्तान्त्रिकी सा त्वियमिति यदि नाजात्वमात्राभिधानात्**
**अस्वातन्त्र्यप्रसिद्धेः सृजतिरपि परप्रेर्यतां नोपरुन्ध्यात्।।134**

संख्योपसङ्ग्रहाधिकरणम्। 30

**सूत्रम् - न संख्योपङ्ग्रहादपि नानाभावादतिरेकाच्च। 120. प्राणादयो वाक्यशेषात्। 121. ज्योतिषैकेषामसत्यन्ये। 122.**

**यस्मिन् पञ्चेतिमन्त्रे परपरिगणता विंशतिः पञ्चयुक्ता**
**प्रोक्ता सप्तम्यधीतस्त्विह पुरुषगणोऽऽनन्यनिष्ठोऽस्तु मैवम्।**

**आकाशस्य स्वनाम्ना पृथगनुकथनात् सप्तविंशत्यबाधात्**
**षड्विंशो ह्यत्र  सर्वाश्रय इति विदितोऽनूद्यते ब्रह्मताद्यैः।।135**

**संज्ञोपाधिः समासो ह्ययमिह निगमो सप्तसप्तर्षिनीत्या**
**प्राणाद्यं तन्मनोन्तं प्रकरणविदितं पञ्चकं धीन्द्रियाख्यम्।**
**ज्योतिश्शब्देन शाखान्तरविदितमिदं न्यूनवादस्तु पूर्यः**

**घ्राणं वक्त्यन्नशब्दो रसनमपि सह प्राणशब्दस्त्वगर्थः।।136**

कारणत्वाधिकरणम् 31

**सूत्रम् - कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः। 123.**

**समाकर्षात्। 124.**

**विश्वोपादानवक्त्री श्रुतिषु सदसदव्याकृतोक्तिः परोक्ते**
**ह्यव्यक्तेऽन्वेति तस्मात् तदितरदखिलं नेयमत्रेति चेन्न।**
**यत्रासत्वादि दृष्टं प्रकरणविदितं तत्र सर्वज्ञताद्यं**
**लिङ्गं स्यादित्यधीतं स्थिरमपि तदिहाबाध्य**
**आत्मादिशब्दः।।137**

**आसीदग्रे त्वसद्वा इदमिति विलयावस्थतामात्रमुक्तं**
**नैवासीत् किञ्चनेत्याद्यपि विलयपरं शून्यतादेर्निषेधात्।**
**सर्वस्याव्याकृतत्वं विभजनविरहात् तादृशावस्थतत्तत्**
**द्रव्यस्तोमान्तरात्मा तदिह सदसदव्याकृताद्युक्तिवाच्यः।।138**

जगद्वाचित्वाधिकरणम्। 32

**सूत्रम् - जगद्वाचित्वात्। 125. जीवमुख्यप्राणलिङ्गान्नेति चेत् तद्व्याख्यातम्। 126. अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपिचैवमेके। 127.**

**यस्यैतत् कर्म वेद्यः स इति वचनतः कर्मवश्यप्रतीतेः**
**कर्ता पुंसां स एव स्वकृतपरिणतेरित्युपक्रान्तिभग्नम्।**
**बालाक्यज्ञाततत्त्वान्तरमुपदिशतः स्यादिहाजातशत्रोः**
**तज्ज्ञातोक्तिर्निरर्था जगति कृततया कर्मशब्दोत्र मुख्यः।।139**

**एवं जीवातिरिक्ते प्रकरणनियते तत्र यज्जीवमुख्य-**
**प्राणाख्यानं न तेन क्षतिरिह न तथा तद्विशिष्टे ह्युपासा।**
**प्राणस्य प्राणभाजोऽप्यधिकरणतया वाजिवाक्योक्तरीत्या**
**ब्रह्मज्ञप्त्यै तदन्यप्रकथनमिति हि स्थापना सार्वभौमी।।140**

वाक्यान्वयाधिकरणम्। 33

**सूत्रम् - वाक्यान्वयात्। 128. प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः। 129. उत्क्रमिष्यत एवंभावादित्यौडुलोमिः। 130. अवस्थितेरिति काशकृत्स्नः। 131.**

**पत्यादीनां प्रियत्वं श्रुतिरनुवदति ह्यात्मनः कामसिद्ध्यै
तेनासौ पुण्यपापोदितफलभुगिति प्रक्रमादिप्रतीपम्।
तत्तद्भोगप्रदातुः प्रथयति हि विभोः कामतस्तत्प्रियत्वं
द्रष्टव्यश्चैष मुक्त्यै श्रुतिनिकरमितः प्रत्यभिज्ञाप्यतेत्र।।141**

**व्युत्पत्त्या ह्यात्मशब्दः प्रथयति परमं ब्रह्म यद्वा समानात्
स्वार्थोऽयं जीवशब्दो वदति च परमं द्वारवृत्त्येति पक्षः।**

**व्यक्त्यैक्यात् आश्मरथ्यो निरुपधिकदशाद्वैततश्चौडुलोमिः
तत्स्थत्वात् काशकृत्स्नः निरवहदिह साध्वात्मशब्दं
परस्मिन्।।142**

**भेदोपाधिव्यपाये भवभृदयमियात् ब्रह्मतामित्ययुक्तं**

**नित्यं तद्भेददृष्टेरतिपतितभवे साम्यसाधर्म्यशब्दात्।**
**मृत्तत्कार्यक्रमश्च श्रुतिशतविहतस्तेन जीवोक्तिमीशे**
**तत्स्थत्वात् काशकृत्स्नो यदिह निरवहत् व्याससिद्धान्त**
**एषः।।143**

प्रकृत्यधिकरणम्। 34

**सूत्रम् - प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधात्। 132. अभिध्योपदेशाच्च। 133. साक्षाच्चोभयाम्नानात्। 134. आत्मकृतेः। 135. परिणामात्। 136. योनिश्च हि गीयते। 137.**

**मृत्पिण्डादेः कुलालप्रभृतिरिह पृथक् तद्वदेवादिकर्ता**
**नोपादानं विकारैर्विरहत इति न द्वारमात्रे विकारात्।**
**मृद्दृष्टान्तादिमात्रात् न च विकृतिरसौ स्यात् परस्य स्वरूपे**
**देहद्वारोर्णनाभिप्रभृतिविकृतिवत् व्यापृतेर्दर्शितत्वात्।।144**

**स्वज्ञानाद्यं स्वजन्यं भवति सृजति च स्वान्यसंयोगमीशः**
**संयोगे मूर्तनिष्ठे प्रकृतिरपि हि तत् स्यान्निमित्तं क्रियातः।**

एकस्यादौ बहुस्यामिति बहुभवनं सौभरिन्यायसिद्धं
भेदाभेदश्रुतीनामविहतिरिह च स्यात् विशिष्टैक्ययोगात्।।145

कार्यैक्ये हि प्रतिज्ञा तदनुगुण उदाहारि दृष्टान्तवर्गः
स्रष्टुः स्यामित्यभिध्यां श्रुतिरिह वनतां वृक्षतादिञ्च वक्ति।
आत्मानं चैष एव स्वयमकुरुत तद्भूतयोनित्वमुक्तं
तस्मात् कर्तापि देवः प्रकृतिरपि भवेत् सर्वतत्त्वान्तरात्मा।।146

नोपादानं निमित्तं किमपि तदितरत् कारणं तद्धि विद्मः
यद्वा सिद्धं निमित्तं न भजति तदुपादानतामित्ययुक्तम्।

इष्टादाकारभेदात् उभयघटनतो लोकवेदानुरोधे
सिद्धे स्वच्छन्दलक्ष्मप्रणयनकुसृतिः पाकचिन्ताविपाकः।।147

उक्त्वा तत्त्वान्तराणां विलयमथ तमस्येकतामात्रमुक्तं
प्रोक्तञ्चानादितादि प्रकृतिपुरुषयोर्वेदतद्वेदिवाक्यैः।
लीयेते तौ परस्मिन्निति तु लयवचः  स्यादयस्तोयनीत्या
तेनासौ भोक्तृभोग्यप्रभृतिकवचितात् विश्वसृष्टिः समीची ।।148

सर्वव्याख्यानाधिकरणम्। 35

**सूत्रम् - एतेन सर्वे व्याख्याता व्याख्याताः। 138**

**अग्रे संवर्तनं भात्यवितथवचसि क्वापि हैरण्यगर्भे**
**ग्रस्ताशेषस्वकार्ये तमसि च शिव एवेति केचित् पठन्ति।**
**एतादृग्वाक्यवर्गस्फुटभवदधिकाशङ्कनस्थापनार्थं**
**प्रागुक्तान् नीतिभेदान् अतिदिशति परं**
**शिष्यशिक्षैकचित्तः।।149**

**विश्वेशः श्रीपतिश्चेत् भवतु कथमसौ त्राणमात्राधिकारी**
**दूरं गत्वापि दुख्याद्विधिशिवतुलया घट्टकुट्यां प्रभातम्।**
**मैवं मत्स्यादिभावेष्विह निजविभवानुक्रियानाट्यमेतत्**
**ब्रह्मेशस्रष्टरि स्यान्निरवधिकबृहत्पौरुषे पूरुषे नः।।150**

प्रथमाध्याय चतुर्थपादसंग्रहः

**सांख्योक्तप्रक्रियोक्तेः तदभिमतसृजेः तत्प्रसंख्यानक्लृप्तेः**
**तत्प्रोक्ताव्याकृतैक्यात् स्ववृजिनवचनात् तत्फलावद्ययोगात्।**

**भेदात् कर्तृप्रकृत्योर्द्रुहिणशिवमुखानेकहेतुश्रुतेश्च**
**क्षिप्तं पादत्रयोक्तं श्रुतिहृदयसमुद्घाटनादन्वरक्षत्।।151**

**जिज्ञास्यत्वेन सिद्धे स्थिरचरचिदचिद्देहिनि ब्रह्मतत्त्वे**
**श्रुत्याद्यैरेव सूक्ता स्वरसगतिरियं कारणाम्नायवाचाम्।**
**बाधं रोधञ्च बाह्यान्तरमिह बहुधा वर्णयन्तो मुसल्याः**
**निष्काल्येरन् परस्तान्निषदुपनिषदां निश्चलत्व प्रसिद्ध्यै ।।152**

**आदौ जिज्ञास्यतास्तां बहुविहतिहता सह्यतां लक्षणोक्तिः**
**मृष्यामः शास्त्रयोनिप्रलपितमपि वः स्तात् समन्वित्यपोक्तिः।**
**सूत्रैरेतैः स्फुटार्थैः सविषयवचनैर्निर्विशेषैक्यपक्षे**
**मुख्येक्षाद्यैः स्वधर्मैः प्रकृतिपुरुषतो भेदवादः कथं स्यात्।।153**

<u>द्वितीयाध्याये प्रथमःपादः।</u>
**तत्तादृक्तर्कतन्त्रक्रमनिपुणमहाबुद्धिसन्तोषसिद्धिः**
**यद्यप्युक्तेन लभ्या तदपि मृदुधियां हैतुकास्कन्दशङ्की।**
**स्थूणाखातक्रमेण स्थिरयति कथितं ब्रह्मणः कारणत्वं**
**कार्यत्वं  यस्य यादृक् श्रुतिभिरवगतं तस्य तत् तादृशं च।।154**

पादद्वन्द्वं द्वितीये परिहरति परे कारणे बाह्यपीडां
कार्यद्वारेण पादान्तरयुगमुदयत्यान्तरक्षोभशान्त्यै।
हेतुत्वायोगभङ्गः प्रथममिह विभोस्तस्य सार्वत्रिकत्वा-
योगक्षेपः परस्तात् फलति स च भवेच्छ्रौतनित्यं विहाय।।155

तन्त्रच्छायानिदाने स्वयमुपनिषदामान्यपर्ये निषिद्धे
तन्त्रेभ्यो दुर्बलत्वात् तदनुसरणमित्युज्जिहीते परोऽद्य।
इत्थं सत्यत्र तत्तत्स्मृतिनयपृतनातिक्रमं  तत्तदर्हैः
प्रत्यस्त्रैर्वारयित्वा द्रढयति चलितं पादतः प्राच्यमर्थम्।।156

निर्णीतं कर्मकाण्डे स्मृतिनयविहतौ निश्चलत्वं श्रुतीनां
चर्चा तत्सिद्धयेऽसौ पुनरिति विफलस्स्यात् द्वितीयाद्यपादः।
मैवं गम्भीरनानाश्रुतिशिखरपरिच्छेद्यदुर्बोधतायां
आप्तोक्त्या तर्कतश्च क्षममनुसरणं पश्यतो ह्यत्र भङ्गः।।157

द्वाभ्यां स्मृत्या विरोधं परिहरति ततस्त्वष्टभिस्तर्कबाधं
तेनोपादानभावं द्रढयति तु विभोः कर्तृतां तद्द्वयं च।
तत्तत्क्षेपात् तुलाग्रद्वयनमनसमुन्नामनीत्या प्रवृत्ते
शङ्कावर्गे परीक्षासमनिहितमतिः पक्षपातं रुणद्धि।।158

## स्मृत्यधिकरणम्। 36

**सूत्रम् - स्मृत्यनवकाशदोषप्रङ्गादितिचेन्न अन्यस्मृत्यलवकासप्रसङ्गात्। 139. इतरेषाञ्चानुपलब्धेः। 140.**

**स्मर्ता श्रुत्यैव गीतः कपिलऋषिरसौ वासुदेवांशभूतः**
**ख्यातो रामायणादौ प्रणिधिनिपुणधीर्वक्ति वेदान्ततत्त्वम्।**
**तस्मादस्मद्विदूरे श्रुतिशिरसि तदुक्त्यैव निष्कर्षणं स्यात्**
**न स्यादेकार्थमन्वाद्यनघबहुगिरा तत्र तत्त्वार्थसिद्धेः।।159**

## योगप्रत्युक्त्यधिकरणम्। 37

**सूत्रम् - एतेन योगः प्रत्युक्तः। 141.**

**वेदान् पूर्वं विधातालभत भगवतः सर्वविद्यानियुक्तः**
**वागीशश्चैष तस्मात् तदुदितविहतौ कम्पनं वेदमूर्ध्नः।**
**मैवं तस्यापि वेदापहृतिमुखविपद्दर्शनात् क्षेत्रिभावात्**
**भ्रान्त्यादिः संभवेदित्यगतिकविषये पूर्ववन्निर्वहामः।।160**

विलक्षणत्वाधिकरणम्। 38

**सूत्रम् - न विलक्षणत्वादस्य तथात्वञ्च शब्दात्। 142. अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्। 143. दृश्यते तु। 144. असदिति चेन्न प्रतिषेधमात्रत्वात्। 145. अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्।146. न तु दृष्टान्तभावात्। 147. स्वपक्षदोषाच्च148.तर्काप्रतिष्ठानादपि। 149. अन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः। 150**

**विश्वं त्रैगुण्यवत्त्वात् त्रिगुणत उदितं नासमादित्ययुक्तं**
**सर्वाकारेण साम्यं क्वचिदपि न भवेत् केनचित् साम्यमिष्टम्।**
**भग्ना हेतुव्यवस्थोचितगुणसमता गोमयाद्वृश्चिकादौ**
**स्थूलत्वं याति चेशः प्रकृतितनुरतः सर्वचोद्योपमर्दः।।161**
**ईक्षा तादृक् बहु स्यामिति सति पठिता तेजसोऽपाञ्च दृष्टा**
**सालक्षण्यं ततः स्याज्जगत इति मृदुप्रज्ञपार्श्वस्थचोद्ये।**
**तत्तन्मूर्तेः परस्येक्षणमिदमिति तद्वाक्यभावापलापी**
**सामान्येनाभिमानिव्यवहरणमिदं व्याहरत्पूर्वपक्षी।।162**

शिष्टापरिग्रहाधिकरणम्। 39

**सूत्रम् - एतेन शिष्टापरिग्रहा अपि व्याख्याताः। 151.**

**संवादादाक्षपादक्षपणककणभुग्भिक्षुपक्षेष्वणूनां**
**विश्वं तद्धेतुकं स्यादिति मृदुमतिभिः श्वावराहक्रमोक्तौ।**
**अन्योन्यव्याहतार्थस्थपुटितकुहनायुक्तिदोषापनुत्त्यै**
**भाति त्रय्यन्तसूर्यः प्रतिमततिमिरस्तोमकुक्षिम्भरिर्नः।।163**

भोक्त्रापत्त्यधिकरणम्। 40

**सूत्रम् - भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्। 152.**
**एको यस्यास्ति देहः स भवति विविधानन्तदुःखैकभोक्ता**
**विश्वं देहः प्रभोश्चेत् स कथमतिपतेत् विश्वदुःखानुभूतिम्।**
**इत्थं जीवेशसीमामपलपितुमनाः क्रोशभाजं श्रुतीनां**
**सम्राड्भृत्यादिनीत्या शममिह लभतां साम्यवैषम्यदर्शी।।164**

आरम्भणाधिकरणम्। 41

**सूत्रम् - तदनन्यत्वं आरम्भणशब्दादिभ्यः। 153. भावे चोपलब्धेः। 154. सत्वाच्चापरस्य। 155. असद्व्यपदेशान्नेति**

**चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेश्शब्दान्तराच्च।156.**
**पटवच्च। 157. यथा च प्राणादिः। 158.**

कार्यं धर्मैर्विरुद्धैः घट इव शकटात् कारणद्रव्यतोऽन्यत्
व्यापारः कारकाणां विफल इतरथेत्यर्धवैनाशिकोक्तौ।
द्रव्यैक्येप्यस्तु सर्वं तदभिमतदशाभेदतोऽसच्छ्रुतिश्चे-
त्यध्यक्षाल्लाघवाच्च श्रुतिकथितजगद्ब्रह्मतादात्म्यमुक्तम्।।165

मायोपाधिस्वशक्तिव्यतिकरित परब्रह्ममूलः प्रपञ्चः
येषां तेऽप्यद्वितीयश्रुतिमवितथयन्त्यत्र तत्तद्विशिष्टे।
अप्राधान्यात् तथा नः प्रकृतिपुरुषयोरन्तरात्मप्रधाने
वाक्येऽस्मिन् स्थूलसूक्ष्मान्वय इति
जगतोऽनन्यभावोपपत्तिः।।166

विश्वारम्भे विवर्तं शकलपरिणतिं शक्तिशेषस्य सूतिं
व्यक्त्युल्लासौ विसृष्टिं विकृतिमनियतां तत्त्वपङ्क्तौ च सृष्टिम्।
तत्तद्वाक्यैकदेशस्वरस इति मुधा कल्पयन्तस्तु मुग्धाः
सर्वश्रुत्यैकरस्यप्रणयिभिरधरीचक्रिरे तत्त्वविद्भिः।।167

## इतरव्यपदेशाधिकरणम्। 42.

**सूत्रम् - इतरव्यपदेशाद्धिताकरणादि दोषप्रसक्तिः। 159. अधिकन्तु भेदनिर्देशात्। 160. अश्मादिवच्च तदनुपपत्तिः। 161**

**उक्तानन्यत्वपक्षे चिदपि परिणतिर्ब्रह्मणः स्यात् ततस्त-**
**ज्जीवैक्यं तत्त्वमस्याद्यवगतमहतं दुःखसिन्धुश्च जीवः।**
**अभ्रान्तस्तु स्वदुःखं न सृजति न च तत् क्रीडयाप्यस्तु मैवं**
**तात्स्थ्येनानन्यतोक्तेः तदपि चिदचितोस्तच्छरीरत्वसिद्धेः।।168**

## उपसंहारदर्शनाधिकरणम्। 43.

**सूत्रम् – उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि। 162. देवादिवदपि लोके। 163.**

**शक्तौ कर्तृप्रकृत्योरुपकरणगणोपस्थितौ कार्यकृत्त्वं**
**तस्मादग्रे सदेकं किमुपकरणयेदित्यसत् शक्तिभेदात्।**

**क्षीरायस्कान्तलूतात्रिदशमुनिमुखान् वीक्ष्य तोष्टव्यमस्मिन्**
**सङ्कल्पादेव जीवो नुदति निजवपुर्विश्वरूपस्तथेशः।। 169**

कृत्स्नप्रसक्त्यधिकरणम्। 44

**सूत्रम् - कृत्स्नप्रसक्तिर्निरवयवत्व शब्दकोपो वा। 164. श्रुतेस्तु शब्दमूलत्वात्। 165. आत्मनि चैवं विचित्राश्च हि। 166. स्वपक्षदोषाच्च। 167. सर्वोपेता च तद्दर्शनात्। 168. विकरणत्वान्नेति चेत्तदुक्तम्। 169.**

**कृत्स्नं कार्यात्मना चेत् परिणमति परं नावशिष्येत किञ्चित्**
**यद्यंशात् निष्कलत्वश्रुतिविहतिरिदं स्यात् विशिष्टेपि तस्मिन्।**
**ब्रह्मोपादानतैवं न घटत ति चेन्न स्वपक्षेषु साम्यात्**
**तन्मानात् तद्गृहीतौ श्रुतिमितमपि तल्लोकवत्**
**स्वीकुरुष्व।।170**

**संयोगाख्यं हि कार्यं विभुतदितरयोः स्यादणूनां मिथो वा**
**कार्त्स्न्येनांशेन वा तद् विहतमिति वदन् शून्यवादे निमज्जेत्।**

**साङ्ख्योपि प्राह विभ्वीं प्रकृतिमिति कथं न्यूनसृष्टिस्ततस्स्यात्**
**मायादिष्वेवमूह्यं निगमनिगदिता त्वक्षता पद्धतिर्नः।।171**

प्रयोजनवत्वाधिकरणम्। 45.

**सूत्रम् - न प्रयोजनवत्वात्। 170. लोकवत्तु लीलाकैवल्यम्। 172. वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति। 173. न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च। 174. सर्वधर्मोपपत्तेश्च। 175.**

**आत्मार्थं विश्वसृष्टिः कथमपि सततावाप्तकामस्य न स्यात्**
**कारुण्याद् दुःखसृष्टिर्न भवति न च सा सर्वशक्तेश्चिकित्सा।**
**सर्वज्ञःस्वात्मतृप्तस्तदिह न जगतो हेतुरित्यन्धचोद्यं**
**लीलासौ लोकवत् स्यात् अभिमत समये**
**सिद्धितस्त्वाप्तकामः।।172**

**विश्वं दुःखैकतानं विषममपि सदा निर्मिमाणस्य लीला**
**सञ्जायेतासमञ्जक्रमत इति भवेन्निर्दयत्वादिदोषः।**
**मैवं बीजाङ्कुरादिक्रमविषमभवानादिकर्मौघभाजां**
**जीवानां सौति तत्तत्फलमिति करुणासाम्ययोरप्रहाणात्।।173**

**दृष्टन्यायेन विश्वप्रजनकचिदचित्तत्त्वभेदप्रक्लृप्तौ**
**स्वेष्टप्रत्यर्थिधर्मोपनयननियतव्याप्तिवैयाकुली स्यात्।**
**अत्यन्तादृष्टमर्थं भणितुमधिकृतात् शास्त्रतः सर्वकर्तुः**

**सिद्धौ बाधाद्यनर्हप्रमितिपरवती सर्वधर्मोपपत्तिः।।174**

**साङ्ख्यस्मृत्या विरोधात् विधिमतविहतेः कार्यवैरूप्यतोऽस्मिन्**
**एकार्थानेकतन्त्रोदितविहततया देहभोगाविवियुक्त्या।**
**कार्योपादानभेदात् स्वहितविहतितः कारकस्तोमहानेः**
**कृत्स्नांशाद्यूहबाधात् कृतिविफलतयाप्युत्थितं**
**प्रत्यविद्ध्यत्।।175**

**इति द्वितीयाध्याये प्रथमःपादः।**

अथ द्वितीयाध्याये  द्वितीयःपादः।

रचनानुपपत्त्यधिकरणम्।  46

**सूत्रम्  -  रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च।  176.**

**पयोम्बुवच्चेत् तत्रापि।  177.**

**व्यतिरेकानवस्थितेश्चानपेक्षत्वात्।  178.  अन्यत्राभावाच्च न**

<u>तृणादिवत्। 179. पुरुषाश्मवदिति चेत्तथापि। 180. अङ्गित्वानुपपत्तेश्च। 181. अन्यथानुमितौ च ज्ञशक्तिवियोगात्। 182. अभ्युपगमेप्यर्थाभावात्। 183. विप्रतिषेधाच्चासमञ्जसम्। 184.</u>

बाधाभावादकम्पे स्थितवति निगमैः ब्रह्महेतुत्ववादे
भूयः किं वीतरागो वदति परपरीवादमत्रेत्ययुक्तम्।
प्रख्यातप्राच्यनैकप्रतिसमयभवन्मन्दसन्देहशान्त्यै
तुल्यत्वभ्रान्तिसिद्धा प्रकरणसमता तर्कपादेन वार्या।।176
षड्विंशालम्बि साङ्ख्यं स्फुटतरपठितं भारते योगतुल्यं
तत्स्थत्वात् पञ्चविंशस्त्विति च निगदितःसर्वतत्त्वान्तरात्मा।
तस्मात् सेशानतन्त्रं श्रुतिसमधिगतं स्थापयित्वाथ सूत्रैः
पक्षं त्वीशानपेक्षं प्रतिवदति नयैरुत्कटप्रत्यवायम्।।177

अव्यक्तादीन् पदार्थान् अनुमितिमुखतः स्थापयन्तः स्वबुद्ध्या
षट्त्रिंशत्तत्त्ववादप्रभृतिषु न कथं सङ्गमिच्छन्ति साङ्ख्याः।
तुल्याक्षेपोपपत्तीः श्रुतिनियतिमुचां कल्पनाः सम्मृशन्तो
दृष्टं नापह्नुवीरन् लघुमनुमिनुयुः शेषमिच्छन्ति शास्त्रात्।।178

कार्ये किञ्चित् कुविन्दप्रभृतिविरचितं दृश्यतेऽन्यच्च सर्वं

कर्त्रायत्तं श्रुतं तत् क्वचिदपि न पराधीनताभङ्गदृष्टिः।
पङ्ग्वन्धक्षीरपाथस्तृणजलदतटिद्वाय्वयस्कान्तपूर्वैः
दृष्टान्तैर्न त्वदिष्टं फलति तदखिलं चेतनाधिष्ठितं नः।।179

नन्वत्राचेतनानां स्वसमुचितविधौ कर्त्रधीनत्वमुक्तं
शास्त्रारम्भे विधातुर्व्यनुददनुमितिं किंपरस्सूत्रकारः।

पृच्छेयं नातितुच्छा शृणु तदवहितः सर्वकृन्नानुमातुं
नापह्नोतुं च शक्यस्तदुभयनियमादर्शनादित्यमंस्त।।180

सत्त्वाद्यान् द्रव्यभेदान् त्रिगुणमिति समाहारतः कल्पयन्तः
तेषां नित्यं विभुत्वे समविषमदशाद्यत्र कीदृक् वदेयुः।
अन्योन्याध्यासक्लृप्तिः प्रकृतिपुरुषयोर्भोगमोक्षोपपत्त्यै
छायापत्त्यादिनीत्या कथमियमुभयाचेतनत्वे घटेत।।181

पुंसां भोगापवर्गप्रभृति फलमिदं तच्च सर्वं प्रधाने
द्रष्टृत्वादेश्च क्लृप्तिः पुरुष इह पृथक् द्रष्टृतादिश्च बुद्धौ।
मुक्त्यै बद्धस्य शास्त्रं मुनिरकृत ततो नित्यमुक्तोऽस्मि चेत्या-
द्यन्योन्यव्याहतोक्तिं वृषलपरिणये जैनभक्ता जपन्तु।।182

महद्दीर्घाधिकरणम्। 47

**सूत्रम् - महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्। 184. उभयथापि न कर्मातस्तदभावः। 185. समवायाभ्युपगमाच्च साम्यादनवस्थितेः। 186. नित्यमेव च भावात्। 187. रूपत्वादिमत्वाच्च विपर्ययो दर्शनात्। 188. उभयथा च दोषात्। 189. अपरिग्रहाच्चात्यन्तमनपेक्षा। 190.**

**कल्प्योपादानमेके परममहदधिक्षिप्य नानाविधाणू-**
**पादानौघस्य दृष्टात् समधिकवपुषः कल्पनेऽनिष्टमाह।**
**प्राज्ञाधिष्ठानशून्यप्रकृतिपरिणतिः प्राङ्निरस्ताऽथ सेशं**
**सूक्ष्माणुद्रव्यमूलद्व्यणुकमुखजगत्सृष्टिपक्षं पिनष्टि।।183**

**प्रागेवारम्भणोक्तावपहतविषया प्रागसद्द्रव्यक्लृप्तिः**
**काणादानामिदानीं क्षिपति बहुमुखं कारणप्रक्रियांशम्।**
**त्रेधा हेतौ विभक्ते ह्यनुमितिशरणैस्तत्तदंशे यथार्हं**
**व्याघातादीन् विकल्पक्रमविविधगतीन् व्याहरत्यत्र सूत्रैः।।184.**

**दृष्टस्याणोःप्रसूतिं द्व्यणुकमणुमपि स्थापयन्तोऽनुमित्या**
**दृष्टाकारानुसारान्न निरवयवताद्यत्र वक्तुं क्षमेरन्।**

सर्वं सह्येत सूक्ष्मे प्रमितिपरवतां जालकालोकलक्ष्ये
तद्भागान् ख्यापयेद्वा स्मृतिरफलतया त्वान्यपर्येण नेया।।185

विश्रान्तिर्न क्वचिच्चेत् अवयवनिवहानन्त्यतो मानसाम्यं
माषक्षोणीभृतोः स्यादिति यदि तदसत् तारतम्यादनन्ते।
वैषम्यं पक्षमासप्रभृतिषु नियतं न ह्यनन्तेष्वनिष्टं
पारापर्यञ्च जात्योर्न किमनुकथितं व्यक्त्यनन्तत्वसाम्ये।।186

नादृष्टं किञ्चिदन्यत्  श्रुतिसरणिजुषां देवतानुग्रहादेः
अन्यत्वे तस्य तज्ज्ञैरधिकयतनवत्क्लृप्तिरादौ व्युदस्ता ।
यत्ने यत्नानपेक्षां न किमनुमनुते स्याददृष्टेऽपि तद्वत्
भूतस्थादृष्टवादे व्द्यणुकृदणुगतादृष्टकल्पोऽत्र लूनः।।187

नित्यं संबन्धमेके निजगदुरपृथक्सिद्धसर्वानुवृत्तं
नित्यं नित्येष्वनित्येष्वपि कतिचिदिमं तावदायुष्कमाहुः।
तत्तद्द्वन्द्वस्वभावप्रतिनियतिमुचां स्यान्न तेन व्यवस्था
गुर्वी त्वन्यस्य क्लृप्तिः कथमधिकजुषां नानवस्थादिदोषः।।188

निर्धूते सूत्रकारैरवयविपरमाण्वात्मके द्रव्यवर्गे
विश्वं व्याप्त्येकलक्ष्यं परममहदसत् स्यादथाद्रव्यमेव।

**मैवं दृष्टाणुतत्संहतितदुभयसम्बन्धसिद्धेरबाधात्**
**आगन्तुक्षोणिताद्यैः श्रुतिरपि जगदारम्भणं बम्भणीति।।189**

समुदायाधिकरणम्। 48

**सूत्रम् - समुदाय उभयहेतुकेपि तदप्राप्तिः। 191 . इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न संघातभावानिमित्तत्वात्। 192. उत्तरोत्पादे च पूर्वनिरोधात्। 193. असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा। 194. प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्। 195. उभयथा च दोषात्। 196. आकाशे चाविशेषात्। 197. अनुस्मृतेश्च। 198. नासतो दृष्टत्वात्। 199. उदासीनानामपि चैवं सिद्धिः। 200.**

**बाह्योक्ताचारभागः श्रुतिविहतिवशाज्जैमिनीये निरस्तः**
**तत्त्वांशं तर्कितं तैः प्रतिवदति गुरुर्जैमिनेरत्र पादे।**
**निर्धूते तत्र पूर्वं निरुपधिकनयैरर्धवैनाशिकोक्ते**
**पक्षान् वैनाशिकानां जिनगिरिशमतक्षेपतः प्राक्**
**क्षिणोति।।190**
**बुद्धोसौ स्वावतारैः सह परिगणितः श्रीधरेण स्वशास्त्रे**

सर्वज्ञो नैव मुह्येन्न च  निखिलसुहृत् विप्रलिप्सेत कश्चित्।
तस्मात् बुद्धोक्तभङ्गे भजति भिदुरतां सात्वतादीति चेन्न
स्वाभीष्टप्रत्यनीकप्रमथनमनसा मोहनादिप्रवृत्तेः।।191

दुर्वारा मोहनेच्छा निखिलजनयितुः केन मोहोऽन्यथा नः
तस्मात् कर्मानुरूपं दिशति फलमसौ तत्त्वबोधं भ्रमं वा।
स्वोक्त्यादेः सिद्धमेतत् निरुपधिविषमो नैष तस्मात् समोक्तिः
कारुण्याद् विप्रलिप्सा न यदि वृजिनजं नेशनिघ्नं फलं
स्यात्।।192.

कल्प्यो बोद्धेति सर्वे सुगतमतविदो बोध्यमध्यक्षमेके
बुद्ध्याकारानुमेयं  कतिचन कतिचित् बोध्यमिथ्यात्वमाहुः।
तत्तुल्यन्यायतोऽन्ये धियमपि जगदुः संवृतेरेव सिद्धां
तान् सर्वान्  तर्कमानैर्द्यति दितिजगुरूनत्र
वैभाषिकादीन्।।193

एकद्व्यादिस्वभावैर्यदणुभिरथवा तत्तदेकस्वभावैः
क्षोणीदेहादिपुञ्जप्रभृतिरिति समाभाषि वैभाषिकेण।
ज्ञानादानादि  तत्र क्षणभिदुरतया बोध्यबुध्योर्न सिद्ध्येत्
निर्बाधा प्रत्यभिज्ञाप्यनुमितिमथनी शेषमन्यत्र सूक्तम्।।194

**बोधेष्वाकारभेदं निजमुपरितनेष्वर्पयन् प्राक्तनोऽर्थः**
**तद्वैचित्र्यानुमेयः क्वचिदपि न तदध्यक्षतेति प्रजल्पन्।**
**प्राक् पश्चाच्च प्रवृत्तैर्विहतिबहुलतां गौरवञ्च ब्रुवाणैः**
**शिक्षादक्षैः सयूथ्यैर्दमित उपशमं यातु सौत्रान्तिकाख्यः।।195**

उपलब्ध्यधिकरणम्। 49

**सूत्रम् - नाभाव उपलब्धेः। 201. वैधर्म्याच्च न स्वप्नादिवत्। 202. न भावोऽनुपलब्धेः। 203.**

**न ग्राह्यग्राहकौ स्तः क्वचिदपि विविधानादिसन्तानचित्रः**
**बुद्ध्यात्मा त्र्यात्मकोऽद्य स्फुरति भवदशातिक्रमे स्वात्मनैव।**
**योगाचारोक्तिरित्थं विषयविषयिणोर्बोधबाधौ समानौ**
**मन्वानैर्वारणीया स्वपरविभजनाद्यत्र न क्वापि सिद्ध्येत्।।196**

**बुद्ध्यैक्यं बोध्यबोद्ध्रोर्न घटत इह ते सत्ययोरन्ययोर्वा**
**भिन्नत्वे ग्राह्यलक्ष्मक्षतिमभिमनुषे नात्र चित्रैक्यमर्थ्यम्।**
**चित्रं द्रव्यं गुणं वा किमपि न च विदुः केऽपि भिन्नैकरूपं**

**तेनात्मख्यातिवादः स्थितिमिह भजतु स्वप्रकाशत्वमात्रे।।197**

<u>सर्वथानुपपत्त्यधिकरणम्।50.</u>

**<u>सूत्रम् - सर्वथानुपपत्तेश्च। 204.</u>**

**सत्वेऽसत्वे द्वये च द्वितयपरिहृतावप्यनिष्टप्रसङ्गैः**
**सर्वं शून्यं चतुष्कोट्यतिगतमिति नामानतः स्वेष्टवादात्।**
**अक्षोभ्यं तत्प्रहाणे परमतमसती संवृतिर्नार्थसिद्ध्यै**
**तस्मादित्थं निषेधो निरुपधिक इह क्वाप्यदृष्टो न कल्प्यः।।198**

**प्राक् पश्चात् सत्त्वहानेर्गगनकुसुमवत् स्यान्न मध्येपि कार्यं**
**मैवं तत्रैव दृष्टेः न यदि कथमसौ मध्यकार्यादि शब्दः।**
**कार्यारम्भे निदानं विकृतिमत् उत नेत्यादिचिन्तापि वन्ध्या**
**सामग्र्या कार्यसिद्धेर्भजति च गुणतां कारणस्यानवस्था।।199**

**साध्यं हेतुस्तदङ्गप्रभृति च यदि वः संवृतेरेव सिद्ध्येत्**
**अस्मद्वाक्यानुरोधादिह न कथमसिद्ध्यादिदोषा भवेयुः।**
**तत्र प्रामाण्यबुद्धिर्न यदि पठत तन्मानमित्यस्मदुक्तिं**
**वस्तुस्थित्या न मानं तदिति यदि समं त्वन्मतस्थापकेऽपि।।200**

**अख्यातिस्त्वन्यथाधीःविषयरहितधीश्चानधिष्ठानबुद्धिः**
**बाह्यार्थाकारयोगः सदसदितरधीः शून्यधीरात्मधीश्च।**
**भ्रान्तौ सर्वत्र तत्तत्परमतकथकैराद्दताः पक्षभेदाः**
**प्रायो बुद्धिर्यथार्था श्रुतिविदभिमता क्वापि भेदाग्रहादि।। 201**

<u>एकस्मिन्नसंभवाधिकरणम्। 51</u>

**<u>सूत्रम् - नैकस्मिन्नसंभवात्। 205. एवंचात्माकात्स्न्र्यम्। 206. न च पर्यायादप्यविरोधो विकारादिभ्यः। 207. अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः। 208.</u>**

**संवादात् क्वापि भागे जिनमुनिवचसः शेषमप्यस्तु मानं**
**तस्मात् तेनोपरोध्योपनिषदिति कचोल्लुञ्छनानां दुराशा।**
**वैघट्यस्यापि द्दष्टेः न यदि सुगतवागेवमेवास्तु सत्या**
**तेनान्योन्यं निरोधात् पुरुषवचनयोरप्रकम्प्या श्रुतिर्नः।।202**

**सच्चासच्च द्वयञ्च द्वितयसमधिकं तच्च पूर्वैस्सहेति**
**स्यादस्तीत्यादिवाचा परिहितगगनैर्गीयते सप्तभङ्गी।**
**व्याघातस्तैर्यदीष्टः स्वसमयविहतिर्यद्यनिष्टः परोक्तेः**
**तद्वाक्यैर्न क्षतिः स्यान्न च निरुपधिकः**

**क्वाप्यसत्त्वादियोगः।।203**

**वृद्धिह्रासौ यथार्हं प्रतितनु भविनां देहभङ्गे विमानं**
**मुक्तौ नित्योर्ध्वयानप्रभृति गुरुतया नित्यपातं क्षमादेः।**
**धर्मादेर्व्यापकत्वं गगनवदथवा तादृशं पुद्गलत्वं**
**दुस्तर्कैः कल्पयन्तः श्रुतिनयकुशलैर्दूरमुत्सारणीयाः।।204**

पशुपत्यधिकरणम्। 52

**सूत्रम् - पत्युरसामञ्जस्यात्। 209. अधिष्ठानानुपपत्तेश्च। 210. करणवच्चेन्न भोगादिभ्यः। 211. अन्तवत्वमसर्वज्ञता वा। 212.**

**सर्वं जानाति रुद्रः श्रुतिषु च महितः सत्यवादी च दृष्टः**
**प्रख्यातं तद्गतञ्च क्वचिदुपनिषदीत्यस्तु मानं तदुक्तिः।**
**मैवं देवेन दैत्यप्रमथनरुचिना मोहशास्त्राणि कुर्वि-**
**त्यादिष्टो ह्येष तन्त्रं निजमकृत ततस्तन्न शिष्टोपजीव्यम्।।205**

**प्राजापत्ये हि वाक्ये प्रकटमुपनिषत् प्राह देहात्मवादं**
**चक्रे लोकायतं तत् सुरगुरुरभजन्मोहनत्वं मुकुन्दः।**

कण्वस्थाने च लोकायतिकपरिबृढाः भारतेऽपि प्रगीताः
कार्यार्थो विप्रलम्भस्तदिह पशुपतेस्तद्वदेवोपपन्नः।।206

शैवाद्याख्याविशेषैः पशुपतिसमयः स्याच्चतुर्धान्यथा वा
श्रुत्यान्योन्यञ्च बाधः स्फुट इह तदसौ शापदुष्टार्ह उक्तः।
अग्राह्यान् वैदिकानामनुसृतनिगमाः सस्मरुस्तत्प्रविष्टान्
तत्वेऽप्यत्रान्यथात्वं सुगतजिनमतानन्तरोक्तिः क्रमाप्ता ।।207

निष्ठा सर्वेषु नारायण इति वचनात् हेत्वहन्तव्यतोक्तेः
मानत्वोक्त्या च तन्त्रान्तरमपि महितं वेदवद् भारतादौ।
नातो बौद्धादिवत् तन्निरसनमिति चेत् सत्यमंशे तु बाधः
स्यान्नासौ पञ्चरात्रे क्वचिदपि तदिह स्वीकृतिर्वेदतुल्या।।208

दृश्यन्ते संगृहीता जगति हि समयास्ते च राज्ञानुपाल्याः
तस्मान्नः पक्षपातः क्वचिदनुचित इत्यर्भकप्रायचोद्यम्।
मुग्धैरन्ये गृहीताः भवतु समयसंरक्षणोक्तिश्च धर्म्ये
निष्ठैक्योक्तिस्तदन्यग्रहविहतिपरा तद्विरुद्धोक्तिदृष्टेः।।209

उत्पत्यसंभवाधिकरणम्। 53

**सूत्रम् - उत्पत्यसंभवात्। 213. न च कर्तुः करणम्। 214. विज्ञानादिभावे वा तदप्रतिषेधः। 215. विप्रतिषेधाच्च। 216.**

**प्रामाण्यं कर्मकाण्डे स्मृतिनयवशतः सात्वतस्यापि सिद्धं**
**पादेस्मिन् संगतिश्च प्रतिमतदमने नास्त्यमुष्येति चेन्न।**
**प्रत्यर्थित्वं विरोधभ्रममपनयता पञ्चरात्रस्य वार्यं**
**दुस्तर्काद्युत्थितोक्त्या तदितरसमयेष्वित्यनुस्यूतिसिद्धिः।।210**

**दृष्टास्मिन् वेदनिन्देत्यनभिमतमृषेःसात्वते वैदिकत्वं**
**मैवं वैशद्यमूलस्तुतिपरवचने वेदवैरस्यहानेः।**
**संगृह्याम्नायसारं प्रणयति भगवान् तद्धि भक्तानुकम्पी**
**श्रौतस्मार्तादिवच्च व्यभजदिह विभुर्वैदिकं तान्त्रिकञ्च।।211**
**वेदानां मानतोक्तेस्तदनुसरणतः स्वस्य तन्मूलतोक्त्या**
**व्यावृत्तिर्भाति बाह्यागमत इति न तत्तुल्यभावोक्तिरार्षी।**
**का हानिः क्षुद्रविद्याशबलमिति यथा तादृशे वेदभागे**
**मोक्षस्य प्रत्ययार्थं त्वगणिषत परं सात्वते सिद्धिभेदाः।।212**
**जीवस्योत्पत्तिमाह प्रथयति च मनो जीवतत्त्वप्रसूतं**
**तच्चाहङ्कारहेतुं व्यपदिशति ततःपञ्चरात्रं न मानम्।**

मैवं जीवादिवाचो ह्यभिदधति विभोर्व्यूहभेदानिह त्रीन्
तत्तत्तत्त्वाभिमानान्नियतिमधिगता तेषु तत्तत्समाख्या।।213

जीवोत्रानाद्यनन्तः कथित इति तदुत्पत्तिपक्षो नहीष्टः
शब्दस्सङ्कर्षणादिर्न कथमपि समन्वेति जीवादिमात्रे।
श्रौतस्सृष्टिक्रमश्च स्वयमनुपठितस्तद्विरुद्धं न कल्प्यं
तस्मात् श्रुत्या मिथो वा न विहतिरिह तत्तन्त्रतात्पर्यदृष्टेः।।214

साङ्ख्या वैशेषिकाश्च श्रुतिपरिपठितं धर्ममैच्छन्न तत्त्वं
तत्त्वाचारौ तु बुद्धक्षपणकपशुपत्युक्तिषु श्रुत्यपेतौ।
वेदोपस्कारिविष्णुस्मृतिवदवितथं पञ्चरात्राख्यतन्त्रे
तत्त्वं त्रय्यन्तसिद्धं चरणमपि समं गृह्यभेदादिनीत्या।।215

स्मर्यन्ते पञ्चयज्ञा मुनिभिरपि नमस्कारमन्त्रेण शूद्रे
तत्राधीतं हविष्कृत्प्रभृतिपदमिहाप्यंशतोस्याधिकाराः।
योज्या दक्षोक्तकालक्रमगतिरभिगत्यादिभेदे तदुक्ते
ग्राह्यं पश्विष्टिसोमप्रभृतिवदखिलं युक्तितस्सङ्कलय्य।।216

जातावाचार्यशब्दः क्वचिदिति न तथाचार्यदेवो भवेत्या-
द्याम्नाते तत्प्रतीतिः स्मृतिषु नियमिताल्लक्षणात् तत्प्रवृत्तेः।
तद्वत् स्यात् सात्वतादावगतिकविषये रूढिभङ्गो न दोषः

**विप्रादेरत्र शास्त्रे स्थितिरपि बहुधा भारतादौ प्रसिद्धा।।217**

**योगाः साङ्ख्यव्युदासात् कणचरदमनादक्षपादानुयाताः**
**बौद्धोन्माथेन लोकायतमुषितधियो जैनभङ्गात्तदुत्थाः।**
**पत्युस्तन्त्रे पशूनां प्रकटितविहतौ तादृशापष्ठुनिष्ठाः**
**ध्वस्तास्तत्तुल्यतर्कागमशरणतया साकमस्मिन् कुदृग्भिः।।218**

**पादेस्मिन् कापिलस्थैः कणभुगनुगतैर्वृद्धवैभाषिकाद्यैः**
**योगाचाराभिधानैः सुगतमतरहश्शून्यवादप्रसक्तैः।**
**अर्हत्सिद्धान्तभक्तैः पशुपतिसमयस्थायिभिश्चोपरोधं**
**क्षिप्त्वाथो पञ्चरात्रं श्रुतिपथमवदत् पञ्चमाम्नायदर्शी।।219**

**इति द्वितीयाध्याये द्वितीयः पादः**

अथ द्वितीयाध्याये तृतीयः पादः

वियदधिकरणम्। 54

**सूत्रम् - न वियदश्रुतेः। 217. अस्ति तु। 218. गौण्यसंभवाच्छब्दाच्च। 219. स्याच्चैकस्य ब्रह्मशब्दवत्। 220. प्रतिज्ञाहानिरव्यतिरेकात्। 221. शब्देभ्यः। 222.**

यावद्विकारन्तु विभागो लोकवत्। 223. एतेन मातरिश्वा व्याख्यातः। 224. असंभवस्तु सतोनुपपत्तेः। 225.

सर्वं साङ्ख्यास्तु नित्यं क्षणिकमखिलमप्यत्र वैभाषिकाद्याः
नित्यानित्यं समस्तं जिनपरिपठितां सप्तभङ्गीं पठन्तः।
नित्यानित्ये विभज्याप्यभिदधति विपर्यस्य वैशेषिकाद्याः
श्रुत्युत्थान् तान्निरुन्धन् श्रुतिभिरथ वियत्प्राणपादौ
युनक्ति।।220

पूर्वत्राधिक्रियायां पुरुषजनिवचो नित्यतोक्त्या निरूढं
व्योमोत्पत्तौ तथैव स्थितिरिति वचसोर्व्याहतौ वक्ति कश्चित्।
सिद्धान्ती व्योमसृष्टिर्निगमशतमिता नान्यथासिद्धिरस्यां
वायुव्योमामृतोक्तिर्जनिविधिविहतेत्युक्तिवैषम्यमाह।।221

तेजः प्राथम्यदृष्टेरमृतवचनतोऽनंशकद्रव्यभावात्
व्योमन्युत्पत्तिवाक् स्यादुपहितविषयैवात्मनीवेति चेन्न।
प्राथम्यस्याश्रुतत्वात् प्रथमपठनतः कल्पनेऽन्येन बाधात्
किञ्चामर्त्योक्तितुल्यं
त्वमृतपदमिहानेकवाक्यैककण्ठ्यात्।।222

**युक्तस्सत्कार्यवादश्श्रुतिभिरनुमतो नावयव्यस्ति सृज्यः**
**तत्तद्द्रव्येषु नामान्तरभजनसहावस्थया सृष्टिवादः।**
**इष्टाः शब्दाद्यवस्थास्तव निरवयवद्रव्यवर्गेपि तस्मात्**
**व्योमन्युत्पत्तिरुक्ता श्रुतिषु तदितरोत्पत्तितुल्या न बाध्या।।223**

तेजोधिकरणम्। 55.

**सूत्रम् - तेजोतस्तथाह्याह। 226. आपः। 227. पृथिवी। 228. अधिकाररूपशब्दान्तरेभ्यः। 229. तदभिध्यानादेव तु तल्लिङ्गात् सः। 230. विपर्ययेण तु क्रमोत उपपद्यते च। 231. अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्न विशेषात्। 232. चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्। 233.**

**कूटस्थात् ब्रह्मणः स्याज्जगदखिलमिदं पुत्रपौत्रादिनीतेः**
**एतस्मात् प्राण इत्याद्यपि सुगममिहेत्यादिरूहोत्र मोहः।**
**प्राणस्वान्तादिपाठक्रमत इतरसंक्षोभणेऽतिप्रसङ्गात्**
**ईक्षानुस्यूतिदृष्टेः प्रथममिव परं सौति तत्तच्छरीरी।।224**

आत्माधिकरणम्। 56

**सूत्रम् - नात्मा श्रुतेः नित्यत्वाच्च ताभ्यः। 234.**

**द्रव्यं सर्वं हि नित्यं कथितमवयविद्रव्यभङ्गेन पूर्वं
नित्यत्वं सूत्रकारः पुनरपि पुरुषे किं विशिष्याभिधत्ते।
सत्यं नामान्तरार्हामिह नुदति दशां चेतनस्यानुपाधेः
प्रत्यक्त्वज्ञत्वधर्मौ तदिह नियमितौ शाश्वतौ क्षेत्रिणोऽपि।।225
सच्छब्दार्थातिरिक्तं जनिमदखिलमित्यैतदात्म्यादि सिद्धं
प्रोक्ता सृष्टिश्च जीवे निरवयवनयस्त्वम्बरादौ निरस्तः।
जीवोत्पत्तिस्ततस्स्यादिति न सत् अकृताभ्यागमादिप्रसङ्गात्
नित्यत्वाजत्वकण्ठोक्तिभिरपि जननं त्वस्य देहादियोगः।।226**

**देहात्मत्वे जनिः स्यात् तदिह न घटते जातमात्रस्य रागात्
ज्ञाने किण्वादि मेघोपलशबलपटप्रक्रियात्यन्तदुस्स्था।
देहे गेहादितुल्या ममकृतिरनघा दोषतस्त्वैक्यमोहः
क्षिप्तं चैक्यानुमानं बलवदनुमितिः शास्त्रतस्तर्कतश्च।।227**

**देहे देहातिरेके तदवधिनियतप्राणबुद्ध्यक्षरूपं
धीसन्तानञ्च नित्यं प्रलयविलयिनं स्थास्नुमप्यापवर्गात्।
डिण्डीराभं सदब्धाववितथविकृतौ जीवमिच्छन्त इत्थं**

**निर्धूता दूरमत्र श्रुतिभिरितरवत् बाधदोषोज्झिताभिः।।228**

<u>ज्ञाधिकरणम्। 57</u>

**<u>सूत्रम् - ज्ञोत एव। 235. उत्क्रान्ति गत्यागतीनाम्। 236. स्वात्मना चोत्तरयोः। 237. नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्। 238. स्वशब्दोन्मानाभ्यां च। 239. अविरोधश्चन्दनवत्। 240. अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमात् हृदि हि। 241. गुणाद्वाऽऽलोकवत्। 242. व्यतिरेको गन्धवत्तथाच दर्शयति। 243. पृथगुपदेशात्। 244. तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्। 245. यावदात्मभावित्वाच्च न दोषः तद्दर्शनात्। 246. पुंस्त्वादिवत्तस्य सतोभिव्यक्तियोगात्।247. नित्योपलब्ध्यनुपलब्धिप्रसंगोन्यतर नियमोवान्यथा। 248.</u>**

**कैश्चित् ज्ञानत्वमात्रं कथितमुपधिजा ज्ञातृतैवात्मनोन्यः<br>तत्र श्रुत्यादिबाधं प्रथयति विविधं ज्ञोत इत्यादिसूत्रैः।<br>पूर्वन्यायादमुष्मिन् जनिलयरहिते नित्यबोधेत्र चोक्ते<br>सङ्कोचाद्यर्हबुद्धेर्विकृतिवचनमप्यस्य सद्वारकं स्यात्।।229**

ज्ञातृत्वं  ज्ञानता च श्रुतिभिरभिदधे नात्र पक्षे पतामः
सर्वत्रात्मा न भायात् किमिति न निगमैर्देहिनोणुत्वसिद्धेः।

स्वाभासैकस्वमूर्तेरविशदमहसस्सर्वदा भानमिष्टं
धीसङ्कोचात् सुषुप्तिप्रभृतिषु विशदोल्लेखमात्रोपरोधः।।230

धर्मस्थे त्वेवकारे त्रिविधमपि भवेत् तद्व्यवच्छेदकत्वं
धर्मिण्यस्यान्वये स्यात् तदितरविषये तस्य धर्मस्य हानिः।
जानात्येवेत्यबोद्धा न भवति जडता ज्ञानमात्रोक्तिवार्या
ज्ञानालोपादिवाक्यानुगुणविषयतां यात्यसावेवकारः।।231

उत्क्रान्ति स्पन्दनाणूपमिति वचनतोऽणीयसः शक्तिलाभे
धीभूम्ना यौगपद्यं त्ववयवनयतोऽनेकमूर्तिग्रहेऽपि।
यत्राम्नातं विभुत्वं परविषयमिदं भाति तात्पर्यलिङ्गैः
जीवे व्यापित्ववादो मतिमहिमपरः स्वच्छताद्याशयो वा।।232

कर्त्रधिकरणम्। 58

**सूत्रम् - कर्ता शास्त्रार्थवत्वात्। 249. उपादानाद्विहारोपदेशाच्च। 250. व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः। 251. उपलब्धिवदनियमः। 252. शक्तिविपर्ययात्। 253. समाध्यभावाच्च। 254. यथा च तक्षोभयथा। 255.**

**ज्ञातृत्वं पुंस इत्थं भवतु तदपि नामुष्य कर्तृत्वसिद्धिः**
**श्रुत्याद्यैस्तन्निषेधात् विकृतिविरहतश्चेत्यसत् दृष्टबाधात्।**
**कर्तृत्वापह्नवोक्तेरविकृतिवचसोप्यान्यपर्यं हि गीतं**
**कर्ता शास्त्रार्थवत्वात् तदयमिह न च स्यादबोद्धुर्नियोगः।।233**

**किञ्च स्वोक्त्यादिभग्नो निगदितुरहमः कर्तृताया निषेधः**
**यद्यन्यस्याहमर्थात्तदिदमुपनिषद्वेदिनः सिद्धसाध्यम्।**
**भोक्तृत्वस्याप्यभावे प्रसजति वितथं बन्धमोक्षादिशास्त्रं**
**प्राणादानात् विहारात् प्रकृतिसमधिकोऽस्मीति योगाच्च कर्ता।।234**

**व्यापारज्ञानवाञ्छाप्रशकनयतनायोगयुक्तिस्तु मन्दा**

**कार्ये सामग्र्यपेक्षे विधितदितरयोर्लोकसिद्धा प्रवृत्तिः।**
**सार्थं शास्त्रं हितोक्त्या नियतिनियमिता शास्त्रयोग्या दशा सा**
**ज्ञाता कर्ता च भोक्ता तदयमिह पुमान् भाति सर्वैः**
**प्रमाणैः।।235**

परायत्ताधिकरणम्। 59

**सूत्रम् - परात्तु तच्छ्रुतेः। 256. कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः। 257.**

**कर्ता न ह्यन्यतन्त्रः स्मरति खलु तथा पाणिनिश्चान्यथा चेत्**
**आज्ञा कुर्यान्न कुर्यादिति तु निगलिते धावनादेशवत् स्यात्।**
**मैवं कर्माक्षकालप्रभृति परवशे कर्तृतां तत्फलञ्च**
**स्वीकृत्यात्मेशमात्रे श्रुतिशतविदिते द्वेष इत्थं दुरन्तः।।236**

**साधारण्येन हेतुः सलिलमिव विभुः सर्वकार्याङ्कुराणां**
**वैषम्यं त्वाविरिञ्चात् प्रतिनियतफलैः प्राणिनां कर्मबीजैः।।**
**साम्यं स्वस्य स्वगीतं श्रुतमपि तदिहाधोनिनीषादिभेदः**
**तादृक्कर्मानुरूपं फलमिति नियतोऽनादिरेष प्रवाहः।।237**

**काले दुःखोपशान्तिं जनयति भगवान् व्याजमात्रावलम्बी**
**या दुःखापाचिकीर्षा परहितमनसः सैव तस्यानुकम्पा।**

दत्ते देहादियोगं दिशति च निगमं वक्ति वेदान्तसारं
निस्सीमानन्दयोगं निरुपधिसमये सौति पुंसां तथैव।।238
दोषस्स्यान्निग्रहांशो यमयितुरिति चेन्नोपमर्दासहत्वात्
नानिष्टं नेश्वरे हि प्रसजति न परानिष्टमस्य प्रतीपम्।
कारुण्यं सावकाशं क्वचिदिति कथितं साक्षिताद्यञ्च सुस्थं
दृष्टे चैतत्स्वभावे फलद इति धिया युज्यते तत्प्रवृत्तिः।।239

प्रत्यङ्ङात्माहमर्थःप्रमितिपरवतां कर्तृतादिश्च तस्मिन्
स्वेच्छापूर्वप्रवृत्तेरयमचिदधिकस्तावतेशानतुल्यः।
ईशस्तु स्वेच्छयैव प्रयतत इति तन्निघ्नमन्यत्समस्तं
सारथ्यादिक्रमेण प्रतिनियतगतिस्स्यात् त्रयाणां प्रवृत्तिः।।240

कर्तृत्वं स्यात् कदाचित् करणवति परप्रेरणानिर्व्यपेक्षं
नो चेत् तन्निग्रहाद्यं कथमिति यदि न स्वेष्टपक्षेऽपि साम्यात्।
स्वेनापथ्यप्रवृत्तं न हि पुनरपि तत् कारयेयुर्दयार्द्राः
तच्चेदस्य स्वभावात् इतरदपि न किं निष्फलोऽधीतभङ्गः।।241

क्षेत्रज्ञानां समानां विषमयतनता तादृशादृष्टभेदात्
नादृष्टं त्वन्यदिष्टं नियमनभिदया शासितुस्तत्र भाव्यम्।

साक्षित्वाद्यञ्च नेतुः समनिगममितं प्रेरकत्वं न रुन्धे

**भाष्यादिग्रन्थलेशोप्यवहितमनसामैदमर्थ्यं भजेत।।242**
**कर्ता देवः फलानां न तु करणभृतः प्रेरकश्चेत्ययुक्तं**
**सर्वश्रुत्यादिकोपात्त्र भवति न फलं कर्मणः पापचर्या।**
**कर्माधीनं तु चिन्ताद्यपि हि भवभृतो भाषितं भाष्यकारैः**
**जन्तूनां देवतानामपि करणगणाधिष्ठितं वक्ष्यतीत्थम्।।243**

## अंशाधिकरणम्। 60

**सूत्रम् - अंशो नानाव्यपदेशादन्यथापि दाशकितवादित्वमधीयत एके। 258. मन्त्रवर्णात्। 259. अपि स्मर्यते।260. प्रकाशादिवत्तु नैवं परः। 261. स्मरन्ति च। 262. अनुज्ञा परिहारौ देहसम्बन्धात् ज्योतिरादिवत्। 263. असंततेश्चाव्यतिकरः। 264. आभास एव च। 265. अदृष्टानियमात्। 266. अभिसन्ध्यादिष्वपि चैवम्। 267. प्रदेशभेदादिति चेन्नान्तर्भावात्। 268.**

**जीवाद्यत्यन्तभिन्नः पर इति बहुधा व्याहरत् सूत्रकारः**
**भेदाभेदश्रुतीनां घटकनिगमतः शात्रवञ्च व्यपोढम्।**
**उक्ताक्षेपे समाधावपि न समधिको हेतुरत्रास्ति सत्यं**

पादांशाद्युक्तिमुह्यद्बहुकुमतिमतक्षिप्तये त्वंशचिन्ता।।244

अंशत्वं रामकृष्णप्रभृतिषु घटतां विग्रहांशावतारात्
जीवे ब्रह्मांशतोक्तिर्न तु निरवयवं ब्रह्म वक्तुर्घटेत।
ब्रह्मातश्चित्समष्टिः प्रतिपुरुषमिह त्वंशता चेत्ययुक्तं
विश्वस्रष्टुर्बहुस्स्यामिति बहुभवनध्यातुरेकत्वसिद्धेः।।245

व्योमैकं स्यात् घटाद्यैः पृथक् उपधिगणैर्ब्रह्म बह्वंशमेवं
तत्रोपाधिव्यपाये भवभृदयमियात् ब्रह्मतामित्ययुक्तम्।
स्वानर्थारम्भदौस्थ्यात् प्रतिनियतगुणप्रत्यभिज्ञाद्यदृष्टेः
छिन्नाच्छिन्नांशचिन्तोदितबहुविहतेः साम्यशब्दाच्च मुक्तौ।।246

मायोदन्वत्यपारे प्रतिफलति मृषावीचिषु ब्रह्मचन्द्रः
छायांशास्तस्य जीवा इति कतिचिदुशन्त्येतदालोचनीयम्।
न ब्रह्म द्रष्टृ तेषामचिदपि हि तथा स्वेन कल्प्यो न जीवः
क्लृप्तेः प्राक् स्वात्महानेः त्रितयसमधिकः कल्पकस्त्वत्र
मृग्यः।।247

सन्मात्रं ब्रह्म सर्वानुगतमिह पुनर्नित्यसिद्धास्त्रयोंऽशाः
जीवेशाचित्प्रभेदादिति च कतिचनेदञ्च नोदञ्चनीयम्।
सत्तामात्रानुवृत्तेस्तदधिकवपुषश्शासितुर्ब्रह्मतोक्तेः

ब्रह्मत्रैविध्यवाक्यं निरवयवतया निश्चितेऽन्याशयं स्यात्।।248

मेरोरंशः किरीटप्रभृतिरिति नयान्नित्यभिन्नेंऽशतोक्तिः
साजात्याल्पत्वमूला गमयितुमुचितेत्यागमासन्नपक्षे।
अंशोक्तिः स्यादमुख्या स हि निपुणधियामेकवस्त्वेकदेशः
तस्माज्जीवो विशिष्टे भगवति गुणवत् तत्प्रकारोंऽश
उक्तः।।249

उक्तं नित्योपलब्धिप्रभृति परमते पूर्वमेव ह्यनिष्टं
भूयस्तादृक् प्रसङ्गः प्रकथित इह किं भोगसङ्कीर्णतादेः।

मैवं पूर्वं हि बाह्यप्रसृतिमशमयत् साम्प्रतं ब्रह्मवाद-
व्याजोत्सिक्तान् कुदृष्टीन् परिहृतिरिति च स्यात्
भविष्यन्नयेषु।।250

मिथ्याज्ञानादिचक्रे मरुति भगणवत् घूर्णमानस्य जन्तोः
प्रत्यक्तत्त्वप्रबोधात् भवपरिहरणे सर्वतन्त्राविगीते।
शुद्धात्मज्ञानगर्भां परभजनभिदामङ्गभेदांश्च वक्ष्यन्
मीमांसारम्भसिध्यद्वपुषमपि पुनश्शोधयामास जीवम्।।251

**क्लृप्तिर्व्योमादिकेऽपि क्रमभुवि च विभोः प्राच्यतत्त्वैर्विशिष्टात्**
**जीवस्यौपाधिकौ तु प्रजननविलयौ चिद्घनज्ञातृतास्य।**
**कर्तृत्वं पारतन्त्र्यं गुणतनुनयतो विश्वरूपांशता चे-**
**-त्याम्नायान्य़ोन्यबाधव्यपनयनवियत्पादसाध्यानि सप्त।।252**

**इति द्वितीयाध्याये तृतीयः पादः।**

अथ द्वितीयाध्याये चतुर्थः पादः

प्राणोत्पत्त्यधिकरणम्। 61

**सूत्रम् - तथा प्राणाः। 269. गौण्यसम्भवात् तत्प्राक्च्छ्रुतेश्च। 270. तत्पूर्वकत्वाद्वाचः। 271.**

**अक्षाद्युत्पत्यनूक्तौ न हि फलं अधिकाशङ्कनं त्वत्र मन्दं**
**तत्संख्यादेः परीक्षाप्यनुकृतबलिभुग्दन्तचिन्तेति चेन्न।**
**एतेष्वब्रह्मकार्यं किमपि कथयतां बाधनेनार्थवत्वात्**
**तत् साक्षात् सङ्गतिः स्यात् प्रथमचरमयोः मध्यमानां**
**प्रसङ्गात्।।253**

**अष्टावत्राधिकाराः प्रथम इह वियन्नीतिरुक्तेन्द्रियाणां**
**तेजोबन्नोक्तनीतिं द्रढयति चरमे व्यष्टिभेदस्य सृष्टौ।**
**संख्यामानादिचिन्तास्वपि तदुपहितोपासनाद्यैःफलं स्यात्**
**प्राणादिभ्यः प्रमाता पृथगिति विशदीकर्तुमप्येष पादः।254**

**अग्रे सत्तामृषीणां श्रुतिरभिदधती प्राणतां वक्ति तेषां**
**नात्र ब्रह्मैव वाच्यं बहुवचनहतेस्तेन नित्याक्षसिद्धिः।**
**मैवं तत्सृष्टिदार्ढ्यात् बहुवचनमिदं पाशनीत्यैव नेयं**
**प्राणर्षित्वे परात्मन्यपि हि सुघटिते तन्निरुक्त्यादिसाम्यात्।।255**

<u>सप्तगत्यधिकरणम्। 62.</u>

**<u>सूत्रम् - सप्तगतेर्विशेषितत्वाच्च। 272. हस्तादयस्तु स्थितेतो नैवम्। 273.</u>**

**सप्त प्राणाश्चरन्तीत्युदितमभिहितास्ते विशिष्यापियोगे**
**तस्मात् सप्तेन्द्रियाणीत्यसत् अधिकवचोदृष्टितोऽत्रान्यपर्यात्।**
**लक्ष्मैषां सात्विकाहङ्करणपरिणतिद्रव्यता चाविशिष्टा**
**भेदेनोक्तिः प्रधाने मनसि फलवती कर्मबोधेन्द्रियेभ्यः।।**256

**देहव्याप्येकमक्षं कतिचिदकथयन् भागतो भिन्नकृत्यं**

**केचित् कर्मेन्द्रियाणि श्रुतिपथविमुखास्तत्यजुः क्षुद्रतर्कैः।**

**क्षेत्रज्ञस्याहुरेके सह करणगणं बुद्ध्यहङ्कारचित्तैः**
**अन्ये तं चित्तवर्जं निजगदुरिति तान् अर्थतोऽत्र व्युदास।।**257

प्राणाणुत्वाधिकरणम्। 63.

**सूत्रम् - अणवश्च। 274. श्रेष्ठश्च। 275.**

**सर्वेष्वानन्त्यवादात् परिमितिनियमानुक्तितश्चेन्द्रियाणां**
**व्याप्तिस्सिद्धेति चेन्न प्रयदखिलतनूत्क्रान्तिगत्यागतिभ्यः।**
**वृत्त्या दूरस्थधीः स्यात् भजनविधिपरेऽनन्ततोक्तिः स्वकार्यैः**
**कन्दस्थानाञ्च तत्तत्तनुषु विकृतिमद्द्रव्यभावात् पृथुत्वम्।।258**

वायुक्रियाधिकरणम्।64.

**सूत्रम् - न वायुक्रिये पृथगुपदेशात्। 276. चक्षुरादिवत्तु तत्सहसृष्ट्यादिभ्यः। 277. अकरणत्वाच्च न दोषस्तथा हि दर्शयति। 278. पञ्चवृत्तिर्मनोवद्व्यपदिश्यते। 279.**

**प्राणः प्रागुक्तनीत्या परजनित इति स्थापितो वायुमात्रं**

**देहान्तस्तत्क्रिया वा स इति न पृथगुत्पत्तिवादात् सहास्य।**
**द्रव्यत्वं द्रव्यवर्गे पठनत उचितं नैष तत्वान्तरं स्यात्**
**तेजस्त्वे वाय्ववस्थात्यजनवदिह तत्त्यागहानेः कदापि।।259**

श्रेष्ठाणुत्वाधिकरणम्। 65

**सूत्रम् - अणुश्च। 280.**

**उक्तः प्राणस्त्रिलोक्या सम इति स जगद्व्यापकोस्त्वित्ययुक्तं**
**जीवाक्षन्यायतस्तत्सहपठिततदुत्क्रान्ति गत्याद्यबाधात्।**
**स्तुत्यर्था सर्वसाम्यश्रुतिरिह करणक्षेत्रधृत्यादिहेतौ**
**देहेऽनल्पोपकारः स्फुरति च दशधा वृत्तिभेदैर्विभक्तः।।**260

ज्योतिराद्यधिष्ठानाधिकरणम्।66.

**सूत्रम्-- ज्योतिराद्यधिष्ठानं तु तदामननात् प्राणवता शब्दात्। 281. तस्य च नित्यत्वात्। 282.**

**भोक्तृणां देवतानामपि तनुकरणाधिष्ठितिर्नेशतन्त्रा**
**तत्स्वातन्त्र्यप्रदानादिति न तनुभृतस्तच्छरीरं हि सर्वे।**
**नित्ये तत्पारतन्त्र्ये क्वचिदपि न भवेत् राजसामन्तनीतिः**

**प्राणन्यायात् प्रभुत्वं  तदिह परवशं चेतनानां स्वशक्ये।।261**

<u>इन्द्रियाधिकरणम्।  67.</u>

<u>**सूत्रम्  -    त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्।  283.**</u>

<u>**भेदश्रुतेर्वैलक्षण्याच्च।  284.**</u>

**प्राणोपि स्याद्धृषीकं भृशमुपकरणात्तेषु मुख्यत्ववादात्**
**उत्क्रान्त्यादौ च साह्यादिति यदि न पृथक्शब्दनैस्तस्य भेदात्।**
**कण्ठोक्तादिन्द्रियत्वान्मनसि तु घटते गोबलीवर्दनीतिः**
**न प्राणे सात्विकाहङ्करणविकृतिता शब्दसाम्यादि मन्दम्।।262**

<u>संज्ञामूर्तिक्लृप्त्यधिकरणम्।  68.</u>

<u>**सूत्रम्  -  संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्।  285.**</u>

<u>**मांसादि भौमं यथाशब्दमितरयोश्च।  286.  वैशेष्यात्तु**</u>

<u>**तद्वादस्तद्वादः।  287.**</u>

**मन्वाद्यैः स्मर्यतेऽसौ सरसिजवसतिर्व्यष्टिनामादिकर्ता**
**जीवेनानुप्रविश्येत्यपि कथितमतः  प्रेष्यकृत्यक्रमोत्र।**

तन्नैको हि प्रवेष्टा त्रिवृतमकृत च व्याकरोदित्यधीतः
तत्तज्जीवान्तरात्मा सृजति च भगवान् तादृशं कार्यजातम्।।263

या जीवेनात्मनेति श्रुतिरियमपि न ब्रह्मजीवैक्यमाह
प्रागेवैकोऽन्तरात्मा वपुरितर इति स्थायिभेदाभिधानात्।
तेनेशस्तद्विशिष्टस्वकरणकतयानुप्रवेशेऽपि कर्ता
जीवे तत्कर्तृतायामिह न हि घटते त्वाश्रुतिः कर्तृभेदात्।।264

अग्न्यादावण्डमध्यस्थितिमति कथितं रूपभेदैस्त्रिवृत्त्वं
तेजोऽबन्नाशितोक्तावपि विशदमिदं तेन वेधास्त्रिवृत्कृत्।
मैवं ब्रह्माण्डसृष्टिर्भवतु कथमसावत्रिवृत्कारपूर्वा
भुक्तेन्नादौ त्रिधोक्ता परिणतिरितरत् सन्निकृष्टे प्रदृष्टिः।।265

अक्षाणां जन्मसंख्यापरिमितय इह प्राणवायोस्स्वरूपं
तत्सौक्ष्म्यं देवतादेस्तदुभयविषयाधिष्ठितौ पारतन्त्र्यम्।
प्राणस्यानिन्द्रियत्वं बहुविधचिदचिद्व्यष्टिनामादि चाऽऽद्यात्
पञ्चीकर्तुः स्वनाभिप्रभवकवचितादूचिरे प्राणपादे।।266

नित्यत्वं व्योम्नि वाताद्यणुषु च पुरुषेप्यज्ञतादीन् अपार्थान्
श्रोत्रादौ भूतताद्यं मनसि च विभुतां नित्यतत्वान्तरत्वम्।

**प्राणेष्वात्मादिभावं स्वपदनियमनस्वैरितां स्वर्गिबृन्दे**
**वेधस्युन्मुक्तयन्त्रक्रममपि वदतां पादयुग्मेऽत्र भङ्गः।। 267**

**तर्कैरापातसत्यैरविहतिकथने व्याहतिः स्थपिता स्यात्**
**सम्यग्भिर्वस्तुवृत्या तदिति यदि तदा स्वाभिमानोपरोधः।**
**तेनाध्यायो विरोधप्रशमनकृदसौ बौद्धबन्धोर्विरुद्धः**
**सौत्री तर्काप्रतिष्ठा श्रुतिपथविमुखस्वैरवादेषु योज्या।। 268**

**इति द्वितीयाध्याये चतुर्थः पादः**

अथ तृतीयाध्याये प्रथमः पादः

**साध्या मुक्तिर्नचेत् स्यात् प्रसजति विफला साधनाध्यायक्लृप्तिः**
**साध्या चेत् नश्वरी स्यात् कथमिह पुनरावृत्तिशून्योपवर्गः।**
**मैवं ब्रह्मानुभूतिः परभजनवता प्रागसिद्धैव साध्या**
**धीसङ्कोचप्रणाशस्त्वियमिति च भवत्युत्तरावध्यतीता।।269**

**पादाभ्यामत्र पूर्वं जनयति भविनां ब्रह्मविद्याधिकारं**
**पश्चात् तेषामुभाभ्यां वदति बहुविधां तामशेषैस्सहाङ्गैः।**
**ऐश्वर्यादौ विरक्तिं निरवधिविभवे पूरुषे चाभिलाषं**
**विद्याभेदावलम्बं तदुपकरणमप्याह पादैः क्रमेण।।270**

**संसारोद्विग्नचेतास्तनुभृदधिकरोत्यत्र शारीरकांशे**

वैराग्यार्थस्तु पादः किमिति पुनरसौ सूत्रकारैर्निबद्धः।
सत्यं प्राप्यान्तराणां निरयगणतुलारोपणं मुक्त्युपाय-
प्रारम्भेऽभ्यर्हितं स्यात् त्वरत इह खलु स्पष्टदृष्टस्वदोषः।।271

देहाद्यं भोग्यनीत्या दिवि भुवि च गतौ तत्र तत्रैव लभ्यं
प्राणाद्यैर्भूतसूक्ष्मैरपि किमिह मुधा पूर्वदेहात् गृहीतैः।
जीवस्याणोर्गतिञ्च स्वयमुपजनयेदीश्वरः प्राणनीत्या
मैवं स्वच्छन्दकृत्ये श्रुतिमितनियतौ गौरवोक्तेरयुक्तेः।।272

नानाजातीयराशिं व्यपदिशति जनो भूयसोंऽशस्य नाम्ना
प्राचुर्यादेवमापः पुरुषवचस इत्युच्यते भूतवर्गः।
व्यष्टिं पञ्चीकृतैस्तैस्सृजति हि स विभुस्तारतम्यं पुनश्च
श्रद्धाशब्दस्त्विहापः कथयति निगमे तत्समाख्यावदुक्तेः।।273

द्यौः पर्जन्योथ पृथ्वी तदनु च पुरुषो योषिदित्येवमेतान्
पञ्चाग्नीन् कल्पयित्वा परिकरसहितांस्तेषु पञ्चाग्निविद्या।
श्रद्धाख्यं भूतसूक्ष्मं क्रमपरिणतितस्सोमवर्षान्नरेतो
रूपं हव्यं सजीवं तनुधरमरुतो जुह्वतीति ब्रवीति।।274

कृतात्ययाधिकरणम्। 70

**सूत्रम् – कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च। 295. चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः। 296. आनर्थक्यमिति चेन्न तदपेक्षत्वात्। 297. सुकृतदुष्कृते एवेति तु बादरिः। 298.**

**इष्टापूर्तादिरूपं तनुभृदिह शुभं कर्म यत्किञ्च कुर्यात्**
**भुक्त्वा कृत्स्नं तदन्ते पुनरवनिमियादित्यसत् दृष्टबाधात्।**
**कात्स्न्येनेत्यश्रुतत्वात् सुकृतफलतया जातिभोगाद्यधीतेः**
**तस्मात् प्रारब्धशेषैस्तदितरसहितैरापतेत् स्वर्गपान्थः।।275**

**धूमं रात्रिञ्च पक्षं तिमिरकलुषितं दक्षिणावृत्तिमासान्**
**पश्चाल्लोकं पितृणां गगनमपि मृतश्चन्द्रमभ्येति कर्मी।**
**प्रत्यावृत्तौ तु चन्द्रात् गगनसततगौ धूममभ्रञ्च मेघं**
**व्रीह्यादीन् याति रेतस्सिचमथ जननीं यातनाचक्रवर्ती।।276**

**आचारांशस्य साध्यं चरणवचनतो जातिभोगादिकं स्यात्**
**कर्माचारौ विभक्तौ श्रुतित इति न सत् गत्यभावात् तथोक्तेः।**

**मुख्यं वृत्त्या हि कर्मण्यपि चरणवचो नैकदेशे निरोध्यं**
**जात्यादिः कर्मभेदप्रभव इति मिते चिन्त्यमाचारसाध्यम्।।277**
**प्राप्ताचारातिवृत्तौ प्रतिपदमृषयः सस्मरुः प्रत्यवायान्**
**प्राचीनांहःप्रणाशं तदनुसरणतः पुण्यकर्मार्हताञ्च।**
**नातः सत्कर्ममात्रात् त्रिदिव इति धिया तत्परित्यागशङ्का**
**न ह्याचारप्रहीणे श्वदृतिजलसमः शोधको वेदवर्गः।।278**

अनिष्टादिकार्यधिकरणम्। 71.

**सूत्रम् - अनिष्टादिकारिणामपि च श्रुतम्। 299. संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्। 300. स्मरन्ति च।301. अपि सप्त। 302. तत्रापि तद्व्यापारादविरोधः। 303. विद्याकर्मणोरिति तु प्रकृतत्वात्। 304. न तृतीयोपलब्धेः। 305. स्मर्यतेपि च लोके। 306. दर्शनाच्च। 307. तृतीयशब्दावरोधः संशोकजस्य। 308.**

**सर्वेषां देहपाते सति नियमवती चन्द्रमःप्राप्तिरुक्ता**
**तस्मात् पापोत्तराणां निरयगतिपुरस्कारिणी सेति चेन्न।**

**लोकः संपूर्यते तैर्न पर इति गिरा संकुचेत् सर्वशब्दः**
**तेऽतस्तद्यातनान्ते तत इह सहसा कुत्सितां यान्ति**
**योनिम्।।279**

**जन्म प्राप्तिर्जरायुप्रभृतिषु भविनां कर्मपाकैर्विचित्रा**
**भूयिष्ठैः पुण्यपापैरपवदनवती पञ्चमाहुत्यपेक्षा।**
**तद्वत् धूमादिमार्गः कति कति च शुभैरुत्कटैर्देहपाते**
**दिव्यं रूपं विमानादिकमपि सपदि प्राप्य याताः प्रसिद्धाः।।280**

<u>तत्स्वाभाव्यापत्त्यधिकरणम्। 72</u>

<u>**सूत्रम् - तत्स्वाभाव्यापत्तिरुपपत्तेः। 309.**</u>
**आहुत्योर्देहवत्वं प्रथमचरमयोर्निर्विवादं तथा स्यात्**
**जन्मैवाकाशवायुप्रभृतिषु भवतेरन्वयादित्यसारम्।**
**रेतस्सिग्भावनीत्या पृथगभिलपनानर्हतामात्रमेव**
**द्युभ्वोः पुण्यप्रसाध्यं फलमिह पठितं नास्ति भोगश्च मध्ये।।280**

<u>नातिचिराधिकरणम्। 73.</u>

<u>**सूत्रम् - नातिचिरेण विशेषात्। 310.**</u>

**व्योमादिस्थित्यवस्था चिरमचिरमिति व्यक्तनिर्देशहानेः**
**शुक्लावस्थानयात् स्यात् अनियतिरिति न स्वारसिक्याः प्रवृत्तेः।**
**व्रीह्यादिभ्यो हि दुर्निष्प्रपतरमिति तु श्रूयते तेन पूर्वं**
**शीघ्रं तत्तद्दशायास्त्यजनमिति परिज्ञायते वाक्यशक्त्या।।282**

<u>अन्याधिष्ठिताधिकरणम्। 74.</u>

**<u>सूत्रम् - अन्याधिष्ठिते पूर्ववदभिलापात्। 311. अशुद्धमिति चेन्न शब्दात्। 312. रेतस्सिग्योगोथ। 313. योनेश्शरीरम्। 314.</u>**

**जन्म व्रीह्यादिनाम्ना श्रुतमिह तदिदं देवमर्त्यत्ववत् स्यात्**
**नैरात्म्यं स्थावराणां न च निगमविदः स्थापयन्तीति चेन्न।**

**पुण्यस्यैव प्रवृत्ते फलपरिगणने स्थावरत्वोक्त्ययोगात्**
**रेतस्सिग्वर्ष्मणीव ह्युपचरति जनिं स्थावरेऽप्यन्यदेहे।।283**

**हिंसायोगादशुद्धं श्रुतिविहितमपि न्याय्यमिष्टादिकं तत्**
**पापांशं व्रीहिभावप्रभृतिषु सुकृती भुङ्क्त इत्यप्ययुक्तम्।**
**उक्ता मन्त्रार्थवादैः पशुहितमिति सा तच्चिकित्सावदेषां**

ब्रूते यज्ञे वधोऽसाववध इति मनुः स्तौति निन्दा
त्विहान्यत्।।284

कर्तुर्दोषं दिशेत् संज्ञपनमिह पशोस्तत् क्रतोश्चोपकुर्यात्
तस्मादस्मिन्निषेधं क्षिपति न विधिरित्यब्रुवन् सांख्यभक्ताः।
निर्धूते पश्वनर्थे न खलु तदुचितं पिष्टपश्वादिकल्पः
तत्तत्कालाधिकारिप्रतिनियत इति क्वापि न स्यात् विरोधः।।285

किञ्चोत्सर्गापवादक्रममिह जहतः कीदृशी नित्यहिंसा
शुद्धं न क्वापि सिद्ध्येत् तव हि विधिपदं स्पृष्टतत्तन्निषेधम्।

यत्रासत्यादि वैधं तदनु च विहिता निष्कृतिस्तन्निमित्ता
तत्रागत्या तथा स्यादितरवत् अथवा केवलं तन्निमित्तम्।।286

अश्लिष्टं विग्रहाद्यैर्नभ इव मुसलैः क्षेत्रिणं केचिदाहुः
कर्माकर्तारमेवं फलमपि विविधोपाधिभेदैकनिष्ठम्।
अव्यक्तस्यापवर्गं भवभुजमपि चानादिमुक्तस्वभावं
तेषामित्थं मनीषां बहिरकृत नयैरेष वैराग्यपादः।।287

पादे त्वर्थाः षडस्मिन् वपुरिह विजहत् भूतसूक्ष्मैस्सहेयात्

**भुक्तस्स्वर्गोऽवरोहेदनुशयसहितो मात्रया भिन्नमार्गः।
चन्द्रावाप्त्यादि न स्यान्निरयपथजुषां अम्बरादौ सदृक्त्वं
तस्माच्छीघ्रोवरोहः परवपुषि चिरं व्रीहिपूर्वे तु योगः।।288**

**इति तृतीयाध्याये प्रथमः पादः**

सन्ध्याधिकरणम्। 75.

**सूत्रम् - सन्ध्ये सृष्टिराह हि। 315. निर्मातारं चैके पुत्रादयश्च। 316. मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्। 317. पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ। 318. देहयोगाद्वा सोपि। 319. सूचकश्च हि श्रुतेराचक्षते च तद्विदः। 320.**

**ब्रह्मैव स्वैः स्वभावैर्बहुमुखमवदत् प्राक्तनाध्याययुग्मे
तस्येहाकृष्यचिन्ता किमिति पुनरसौ साधनाध्याययुग्मे।
मैवं विद्याः प्रभेत्तुं विशदयति परं तद्धि तद्रूपभेदात्
सिद्धोपायादिभावं प्रथयति च विभोः प्राप्यतृष्णाप्रथिम्ने।।289**

**नैर्गुण्यं ब्रह्मणश्चेत् वितथ इह गुणैर्ब्रह्मविद्याविभागः**

सोऽस्त्वेतैः कल्पितैश्चेत् श्रुतिमतविहतिः नात्र दृष्टिक्रमोऽपि।
निर्दोषत्वञ्च नित्यं यदि वदसि मुधा दोषशान्त्यर्थयत्नः
कल्प्यं चेत् दुष्टता स्यात् प्रकृतिरिति परिक्षिप्तये चैषपादः।।290

किञ्चादौ चिन्त्यभावः प्रमितिविषयता स्वप्रभत्वं सुखत्वं
विश्वाधिष्ठानता च स्वबहुभवनधीर्निर्विशेषे कथं स्यात्।
सर्वश्रुत्यर्थहानं स्ववचनविहतिःसर्वमानैश्च बाधः
मायावैयात्यभाजामिति सगुणदशोपास्तिपादश्च दुस्स्थः।।291
त्यक्तं दोषैर्गुणाढ्यं यदि पुनरिह तद् ब्रह्म चिन्त्येत पादे
जीवस्वप्राद्यवस्थामननमथ कथं संघटेतेति चेन्न।
स्वप्नार्थस्रष्टृभावप्रभृतिबहुविधब्रह्ममाहात्म्यसिद्ध्यै
जन्तोरस्य स्वमुक्तावतिपरवशताज्ञप्तये चैतदत्र।।292

पादस्यास्याद्यमर्धं कतिचिदधिजगुः पूर्वपादस्य शेषं
पश्चादर्धञ्च साक्षादनुघटितमुपास्त्यर्थतत्तद्गुणोक्तेः।
एतन्नातीव हृद्यं शबलितकथने चातुरीवैपरीत्यात्
ब्रह्मोक्तौ जीवदोषग्रह इह तु मुखं तत्प्रतिद्वन्द्विबुद्धेः।।293

स्वप्नेऽर्थाः सन्तु सृष्टास्तदपि बहुविधा दुस्त्यजा भ्रान्तिरत्र
प्रध्वस्तानामिदानीन्तनवदनुभवात् स्थायितादिभ्रमाच्च।
सत्यं श्रुत्यादिसिद्धे श्रुतपरिहरणायोगतः सृष्टिमात्रं

स्वीकृत्यांशे तु बाधात् भ्रममपि हि यथाजागरं न क्षिपामः।।294

कश्चिद्योगप्रभावान्निजपरभवनस्वैरसञ्चारनीत्या
निष्क्रान्तः पूर्वदेहात् विशति परवपुः पूर्वमाप्नोति भूयः।

इत्थं स्वप्नेऽप्युदन्तस्थितिरिति कतिचित् श्वासवृत्यान्यथान्ये
चित्तोद्यद्धीप्रसृत्येतरतनुभजने सौभरिन्यायसिद्धेः।।295

उक्तं पत्या प्रजानां भविनि दहरवत् सत्यसङ्कल्पताद्यं
पुत्रादेश्चैष कर्ता प्रकृत इह सृजेत् स्वाप्नमर्थञ्च मैवम्।
मुक्तौ तादृग्गुणोक्तेरनभिमतसमुत्पादनादेरयोगात्
स्वप्नानां सूचकत्वादपि निखिलजगत्कर्तुरेषा हि सृष्टिः।।296

कामं कामं विधातेत्यपि णमुलुचितोऽनूद्यते चेश इत्थं
सोऽयं सुप्तेषु जागर्त्यपि विशदमिदं सम्परिष्वङ्गवाक्यात्।
तत्तत्कालावसानाःकतिकति नियता जागरेऽप्यर्थभेदाः
तत्तत्कर्मानुरूपं फलवितरणमित्येतदप्युक्तमाप्तैः।।297

मायामात्रोक्तिलाभात् श्रुतिमुखसुगता विश्वमिथ्यात्वमाहुः

**शास्त्रारम्भे तदेभिः कथितमिह ततोऽसङ्गतत्वादिदुस्स्थम्।**
**मायाशब्दो न मिथ्यावचन उपचरत्वन्ततःकिं ततस्स्यात्**
**सत्येस्त्रादौ प्रयोगादुचितनियमने सोयमाश्चर्यतार्थः।।298**

<u>तदभावाधिकरणम्। 76.</u>

**<u>सूत्रम् - तदभावो नाडीषु तच्छ्रुतेरात्मनि च । 321. अतः प्रबोधोस्मात्। 322.</u>**

**स्थानं जन्तोः सुषुप्तौ श्रुतिरनियमतो वक्ति नाड्यः पुरीतत्**
**हार्दं ब्रह्मेति तस्मादिह भवतु मिथो नैरपेक्ष्यात् विकल्पः।**
**तत्र प्रासादखट्वाशयनवदुपकृत्यन्तरैर्योजितानां**
**पक्षे पक्षे विकल्पः क्रमघटितचतुर्दोषयुक्तो न युक्तः।।299**

<u>कर्मानुस्मृत्यधिकरणम्। 77.</u>

**<u>सूत्रम् - स एव तु कर्मानुस्मृतिशब्दविधिभ्यः। 323.</u>**

**मुक्तिर्ब्रह्ण्यपीतिर्जहदसुखगणा तादृशीयं सुषुप्तिः**
**श्रुत्यैव ख्याप्यतेतस्तदनु तनुभृदुद्बुध्यमानस्ततोऽन्यः।**
**मैवं कर्मानुवृत्तेः स्मरणनियमतः पूर्व एवेति शब्दात्**
**मोक्षोपायादिशिष्टेः स्वपदनुवदनात् प्राच्य एव प्रबुद्धः।।**300

**जीवानादित्वमूचे दृषदनुकरणं क्षेप्स्यते चापवर्गे**
**स्वर्गाद्यर्थप्रवृत्तिः श्रुतिनयविदिता सौगताद्याश्च भग्नाः।**
**कल्पान्तेऽप्येकतोक्तिःनियमितविषया नामरूपप्रहाणात्**
**भूयश्चिन्ता सुषुप्तेः प्रलयसमदशासञ्जिहासादिसिद्ध्यै।।301**

मुग्धाधिकरणम्। 78

**सूत्रम् – मुग्धेर्धसम्पत्तिः परिशेषात्। 324.**

**जाग्रत्स्वप्नौ न बाह्यावगमविरहितौ श्वासपूर्णा सुषुप्तिः**
**तस्मात् मुग्धिर्मृतिस्स्यात् प्रशमितकरणप्राणवर्गेति चेन्न।**
**मृत्यादेर्हेतुभेदात् स्थितिमृतिविशयात् उत्थितेरानियत्यात्**
**मर्तुं प्रक्रम्य मध्ये विरमति विधिनेत्यत्र तुर्यार्धभावः।।302**

उभयलिङ्गाधिकरणम्। 79.

**सूत्रम् - न स्थानतोपि परस्योभयलिङ्गं सर्वत्र हि। 325.**
**भेदादिति चेन्न प्रत्येकमतद्वचनात्। 326. अपि चैवमेके।**
**327. अरूपवदेव हि तत्प्रधानत्वात्। 328.**

<u>प्रकाशवच्चावैयर्थ्यात्। 329. आह च तन्मात्रम्। 330. दर्शयति चाथोऽपि स्मर्यते। 331. अतएव चोपमा सूर्यकादिवत्। 332. अम्बुवदग्रहणात्तु न तथात्वम्। 333. वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च। 334. प्रकृतैतावत्वं हि प्रतिषेधति ततो ब्रवीति च भूयः। 335. तदव्यक्तमाह हि। 336. अपि संराधने प्रत्यक्षानुमानाभ्याम्। 337. प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्। 338. अतोनन्तेन तथाहि लिङ्गम्। 339.</u>

जन्तूनां जागरादिस्थितिषु भवति यत् वैशसं दर्शितं तत्
तत्तत्स्थानेषु योगेऽप्यनघशुभगुणं ब्रह्म संशोध्यतेऽत्र।
संसर्गैक्यादिमूलान् परिहरति ततो दोषवर्गान् उभाभ्यां
हीनत्वौदार्यहानी परमपनयते नीतियुग्मेन नेतुः।।303

नैर्गुण्यं निर्गुणोक्तेर्गुणवचनमिहाविद्यधर्मार्थवादः
नैर्दोष्यं वस्तुवृत्या तदितरदखिलं स्वाप्नभोगादितुल्यम्।
इत्थं जीवेशभूमापहरणकुहनावादमोमुह्यमानान्
क्षेप्तुं न स्थानतोऽपीत्यधिकरणमथारभ्यतेऽनेकशृङ्गम्।।304

हेयं  वस्तु स्वतो यत् स्थितिरिह हि भवेत् दुःखकृत् स्वेच्छयापि
त्याज्यत्वं नान्यथा स्यादिति न निरुपधेर्हेयभावस्य हानेः।
नित्यस्वातन्त्र्यभाजो भविन इव दशाभेदतो नाप्यवद्यं
श्रुत्यैवैकत्र देहे परतदितरयोः शुद्ध्यशुद्धी ह्यधीते।।305

ब्रह्मक्षत्रादिदेहेष्वणुरिव विभुरप्यात्मभावेन तिष्ठन्
तत्तच्छब्दाभिलप्यस्तदिह स न कथं तत्तदादेशवश्यः।
मैवं न ज्ञाप्यतेऽसावविदितविरहात् शासितृत्वान्न शास्यः
किञ्चिज्ज्ञो ह्यन्यतन्त्रो जगति हितविदा बोध्यते प्रेर्यते च।।306

उत्सर्गेणापवादं न खलु नयविदः क्षोभणीयं क्षमन्ते
तस्मात् ब्राह्मे गुणादौ विधिविषयमतिक्रम्य तिष्ठेन्निषेधः।
एवं शान्ते विरोधे न हि समविषयापच्छिदान्यायसिद्धिः
दृष्टो नित्यं निषेधः पर इह च ततः स्यादुपक्रान्तिनीतिः।।307

सत्त्वं कार्यस्य गोपायति कथमसतः सद्भवेत् इत्यधीतिः
द्रव्यान्यत्वं हि कार्ये व्यपनयति परं मृत्तिकेत्येव शब्दः।

अन्तर्भावात् विशिष्टे भगवति जगतो नेह नानेति युक्तं
निर्दिष्टेयत्वशङ्कां प्रशमयति परे नेतिनेतीति चोक्तिः।।308

**तत्तद्वस्तु प्रदेशे सकलगुणतया पूर्णदृश्यः परात्मा**
**वृद्धिह्रासादिभेदोज्झित इति हि जलाधारसूर्योपमोक्तिः।**
**अस्पर्शोदाहृतिश्चेत् न हि घटकरकाकाशदृष्टान्तयुक्तिः**
**तस्मात् ब्रह्म द्विलिङ्गं द्विविधविभवमित्येव वेदान्तपक्षः।।309**

अहिकुण्डलाधिकरणम्। 80

**सूत्रम् – उभयव्यपदेशात्वहिकुण्डलवत्। 340. प्रकाशाश्रयवद्वा तेजस्त्वात्। 341. पूर्ववद्वा। 342. प्रतिषेधाच्च। 343.**

**विश्वस्रष्टुः स्वदुःखप्रजननमिह न स्वांशतोऽचित्वक्लृप्तौ**
**मृत्तत्कार्यादिकञ्च स्वरसमिह बहूदाहृतं सप्रतिज्ञम्।**

**तस्मादव्याकृतादिर्विहरणनियता विक्रियैवेति चेन्न**
**स्वांशे मौढ्यं वितन्वन् विहरति भगवानित्यनर्थानपोहात्।।310**

**कश्चिन्नित्योऽचिदंशो विविधविकृतिमान् ब्रह्मणीत्याहुरेके**
**फेनादिन्यायतोऽन्ये सति विकृतिवशाद् ज्ञाज्ञसर्वज्ञभागान्।**

**चन्द्रज्योत्स्नादिनीत्या कतिचिदिह जगद्ब्रह्मणोरैकजात्यं**
**सर्वे ते सर्वदेहस्वरसगतिहतेरत्र वित्रासनीयाः।।311**

<u>पराधिकरणम्। 81</u>

**<u>सूत्रम् – परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः। 344. सामान्यात् तु। 345. बुध्यर्थः पादवत्। 346. स्थानविशेषात् प्रकाशादिवत्। 347. उपपत्तेश्च। 348. तथान्यप्रतिषेधात्। 349. अनेन सर्वगतत्वमायामशब्दादिभ्यः। 350.</u>**

**सेतुं तीर्त्वेत्यधीतेः परिमितिवचनात् प्राप्यसम्बन्धितोक्तेः**
**अन्याधिक्यश्रुतेरप्यतिवहननयात् कारणं प्रापकं स्यात्।**

**प्राप्यं त्वन्यत् भवेदित्यसत् अनवधिके कारणे प्राप्यतोक्तेः**
**सेतुत्वाद्युक्तिरस्मिन् बहुभिरविहतां वृत्तिमङ्गीकरोतु।।312**

**सेतुत्वं सेतुतुल्यात् विधरणनियमात् बन्धनाद्वात्र युक्तं**
**व्याप्तेऽप्यस्मिन्नुपाधेः परिमितिवचनं सार्थकं सूत्रितं प्राक्।**
**चातुष्पद्यं च तत्तच्छ्रुतिभिरनुगुणं कल्प्यतेऽनन्तभूम्नः**
**स्वस्येत्येवामृतस्येत्यभिहितमथवा मुक्तिरेवामृतं स्यात्।।**313

**अन्यस्याधिक्यवादे परममवधितया कारणं यत्र दृष्टं**
**तत्र ह्यव्याकृतादिःतदवधिः इतरापेक्षयासौ परश्च।**
**यस्मादन्यत् परं नेत्यभिहितविषये तत्परोक्तेरयुक्तेः**
**एवन्त्वादित्यनूक्तिस्तत इति यदि वा व्याप्यमुक्तं तदस्तु।।**314

फलाधिकरणम्। 82

**सूत्रम् - फलमत उपपत्तेः। 351. श्रुतत्वाच्च। 352. धर्मं जैमिनिरतएव। 353.पूर्वं तु बादरायणो हेतुव्यपदेशात्। 354.**

**आराध्यः कर्मकाण्डस्थितनयनिवहस्थापितानां क्रियाणां**
**अध्यक्षो देवतानामनुपधिमहिमा मध्यकाण्डोदितानाम्।**
**अत्राप्येतावतोक्तो भवभयचकितप्राप्त्युपास्त्येकलक्ष्यं**
**तत्तच्छास्त्रार्थयोग्यं दिशति फलमिति**
**स्थाप्यतेऽथात्युदारः।।315**

**कृष्यादेर्मर्दनादेरपि भवति फलं द्वारतो वान्यथा वा**
**धर्माणां साधनत्वं श्रुतिभिरवगतं दोषबाधोज्झिताभिः।**

तस्मादीशप्रसादात् फलमिति तु वचस्तत्प्रशंसेति चेन्न
श्रौताराध्यप्रसादत्यजनकदनतोऽपूर्वक्लृप्तेरयोगात्।।316

यद्यप्याराध्यमूलं फलमिति फलितं देवताधिक्रियायां
कर्मापेक्षा तथोक्ता फलजननपरप्रेरणादौ तथापि।
साक्षित्वानादरत्वप्रभृतिपरगुणान् प्रेक्ष्य तत्प्रीणनादौ
शङ्कातङ्कैर्निरुद्धांस्त्वरयितुमधुना तादृशोदारतोक्तिः।।317

सम्राजः सानुकम्पात् पितुरुचितविदः साम्यभाजो वदान्यात्
स्थाने विन्दन्ति पुत्रा नियतरुचिभिदा यन्त्रितास्तंतमर्थम्।
तत्र प्राप्यं स्वतो यत् विहतिरिह यतः तत्प्रशान्तिश्च यस्मात्
देयं यच्चाविशेषात् दमनमपि यथालोकमत्रापि तत् स्यात्।।318

शुद्धानन्दे तदित्थं शुभगुणजलधौ सत्यनित्यस्वदेहे
देवीभूषायुधाद्यैरतिशयिनि कनद्भोगलीलाविभूतौ।
शेषित्वाधारभावप्रभृतिबहुविधस्थास्नुसंबन्धदीप्ते
दृष्टिः स्वर्गापवर्गप्रसवितरि हरौ निर्निमेषा श्रुतिर्नः।।319

पादे स्वप्नार्थहेतुस्तदयमिह सुषुप्त्याधृतिः सुप्तगोप्ता

**मुग्धोद्बोधादिकर्ता त्वनघशुभगुणोऽचिद्भिरंशी स्वदेहैः।**
**पारम्यस्यैकसीमा सकलफलद इत्युच्यते भक्तिभूम्ने**
**सत्ये त्वेवं गुणादावथ परभजने रूपभेदादि चिन्त्यम्।।320**

**इति तृतीयाध्याये द्वितीयः पादः।**

## अथ तृतीयाध्याये तृतीयः पादः

सर्ववेदान्तप्रत्ययाधिकरणम्। 83

**सूत्रम् - सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्। 355. भेदान्नेति चेदेकस्यामपि। 356. स्वाध्यायस्य तथात्वे हि समाचारेधिकाराच्च सववच्च तन्नियमः। 357. दर्शयति च ।358.उपसंहारोर्थाभेदाद्विधिशेषावत्समाने च। 359.**

**तत्त्वज्ञानानुविद्धं हिततममनघं मोक्ष्यमाणस्य वक्तुं**
**तत्त्वे निर्धूय तर्कज्वरजनितमहासन्निपातप्रलापान्।**
**निष्पन्ने तत्त्वबोधे न किमपि विदुषा साध्यमित्युद्गृणद्भ्यः**
**यावज्जीवानुवर्त्यं मुररिपुभजनं मुक्तिलाभाय वक्ति।।321**

भीमाभ्यो यातनाभ्यः पितृपथगमनावर्तनादेश्च बिभ्यत्
तृष्णां कृष्णामृताब्धौ परिणयति परां यावता तावदुक्तम्।

इत्थं  लब्धाधिकारः परमधिकुरुते साधने यत्र साङ्गे
पादद्वन्द्वे परस्मिन् तदिह बहुभिदा बर्बरं निर्ब्रवीति।।322

एकस्मिन्नेव पादे निपुणनयकृता न द्वयोस्तर्कणं स्यात्
भेदोऽभेदश्च नैको विषय इह भवेदन्यहानप्रसङ्गात्।
तस्मादस्मिन् प्रकीर्णा नयविततिरिति प्रेक्षितग्रन्थचोद्ये
वेद्यावच्छिन्नविद्यानियमकृदयमित्यैदमर्थ्यं समर्थ्यम्।।323

आख्यावन्तं गुणानां निजगदुरुपसंहारतः पादमेतं
विद्यैक्यार्थे तदस्मिन् अपवदनतया भेदचिन्ता प्रसक्ता।
इत्थं शुश्रूषुशङ्कामिह शिथिलयितुं भाषितं भाष्यकारैः
तद्भेदाभेदमीमांसनमिह विषयस्त्वत्र चोक्तोऽनुवृत्तः।।324

निस्सीमानन्दनाडिन्धमनिरुपधिकानन्तसम्पद्गुणौघे
विद्याभेदैर्विभज्य प्रणिधिरिह यदि प्राप्तिरप्यंशतस्स्यात्।
मैवं तैरेव धर्मैः तदितरसहितैः पूर्णकामस्य पूर्णं

प्राप्यं ब्रह्मैव नान्यत् किमपि फलमतः
तत्क्रतुन्यायसिद्धिः।।325

भेदः शब्दान्तराद्यैर्विधिषु नियमितः कर्मकाण्डद्वितीये
संयोगाद्यैक्यतोऽन्यः समुदयनियतात् सैव विद्यासु नीतिः।
आदौ तेनैव शाखान्तरनयमुदितं चोदनादेरभेदात्
श्रुत्यैवाक्षिप्य भूयः प्रतिसमधित तं भेदकान्यर्थतोक्त्या।।326

शाखासु प्रक्रियान्या श्रवणमपि पुनर्दृष्टमत्राविशेषं
विद्याभेदस्ततः स्यादिति न तदुभयं युक्तमध्येतृभेदात्।
तेषामेवेति वाक्यात् क्वचिदुपजनिता भेदशङ्का त्वयुक्ता
स्वाध्याये ब्रह्मविद्यापदमिह हि भवेत्
तद्व्रतेनान्वयोक्तेः।।327

रूपैक्यादैक्यसिद्धौ किमितरदुपसंहार्यं अन्यो गुणश्चेत्
भेदो न स्यात् विकल्प्यं तदिह किमफला तेन चिन्तेति चेन्न।
वेद्याकारैक्यमैक्यं दिशति तदधिकं किञ्चिदाकृष्यतेऽङ्गं
कर्मण्यप्येवमेव ह्युपहृतिविषयो भेदकांशातिरिक्तः।।328

अन्यथात्वाधिकरणम्। 84

**सूत्रम् - अन्यथात्वं शब्दादिति चेन्नाविशेषात्। 360. न वा प्रकरणभेदात्परोवरीयस्त्वादिवत्। 361. संज्ञातश्चेत्तदुक्तमस्ति तु तदपि।362.व्याप्तेश्च समञ्जसम्। 363.**

**प्राग्वत् शाखाविभेदेप्युपशमितभिदा तादृगुद्गीथविद्या**
**स्यादेका चोदनाद्यैः तदसदुभयथा रूपभेदोपलब्धेः।।**
**गाता गेयञ्च गेये सकलमसकलञ्चेति वैषम्यसिद्धौ**
**शेषाभेदोप्यभेदं न गमयति भिदा त्वेकभेदेपि सिद्ध्येत्।।329**

**छन्दोगोद्गीथशब्दस्तदवयवपरः प्रक्रमादिप्रसिद्धेः**
**कृत्स्नोद्गीथाभिधायी प्रकरणनियमाभावतो वाजिनां स्यात्।**
**उद्गीथोक्तिश्च नैषामुपचरणवती गातरि प्रक्रमस्था**
**तत्कर्त्रा साधनीये द्विषदुपशमने तत्फलत्वोक्त्यबाधात्।।330**
**यद्यप्यब्रह्मविद्या परपरिभवनाद्यैहिकार्थप्रयुक्ता**

**न ग्राह्या मोक्षशास्त्रे तदपि समतया तत्परीक्षेति केचित्।**
**काम्या विद्याप्यनिष्टव्यपनयनमुखैर्ब्रह्मविद्योपयुक्तैः**

**तत्तत्साध्यप्रभेदैर्भवति समुचितालोचनेत्याहुरेके।।331**

**अज्ञातब्रह्मतत्त्वः कथमिव विमृशेत् कुत्रचित् ब्रह्मदृष्टिं**
**तस्मात् तत्तादृशीनां समुचितमगतेरत्र मीमांसनं स्यात्।**
**आदध्युः कर्मणाञ्च स्वफलवितरणे वीर्यवत्वातिरेकं**
**ब्रह्मध्यानार्थकर्मातिशयजननतः प्रस्तुतापेक्षितं तत्।।332**

<u>सर्वाभेदाधिकरणम्। 85</u>

**<u>सूत्रम् – सर्वाभेदादन्यत्रेमे। 364.</u>**

**ज्यैष्ठ्यश्रैष्ठ्यादिसाम्ये क्वचन समधिकं भाति वासिष्ठ्यपूर्वं**
**तेनेत्थं रूपभेदात् बहुनिगमगता भिद्यतां प्राणविद्या।**
**मैवं वागादितत्तद्गुणपरवशतावर्णनस्याविशेषात्**
**वागाद्यैः स्वस्वधर्मोपचरणमकृतं तावता स्यान्न भेदः।।333**

<u>आनन्दाद्यधिकरणम्। 86</u>

**<u>सूत्रम् – आनन्दादयः प्रधानस्य। 365.</u>**
**<u>प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे। 366. इतरे</u>**

<u>त्वर्थसामान्यात्। 367. आध्यानाय प्रयोजनाभावात्।368. आत्मशब्दाच्च।369.आत्मगृहीतिरितरवदुत्तरात्। 370. अन्वयादिति चेत् स्यादवधारणात्।371</u>

नानाशब्दादिभेदादिति खलु भिदुरां वक्ष्यति ब्रह्मविद्यां
रूपं विद्यान्तरस्य प्रकरणपठितात् नान्यदन्यत्र योज्यम्।
तस्मात् सत्यत्वपूर्वाः तदितरगुणवत् स्युर्व्यवस्थापनीयाः
मैवं ब्रह्मस्वरूपावगतिरिह यतस्तद्धि सर्वास्वपेक्ष्यम्।।334

सत्यत्वं विश्वहेतौ बहुविधचिदचिद्विक्रियाजालहानेः
ज्ञानत्वं ज्ञातृभावात् स्वरबहुलतया स्वप्रकाशत्वतश्च।

त्रिव्द्येकाभिस्तु सर्वं प्रमितमिहपरिच्छित्तिभिर्ब्रह्मणोन्यत्
तस्यानन्त्यं वियोगात् तिसृभिरपि सदा निर्मलानन्दधाम्नः।।335

उक्तं जन्मादिसूत्रे ननु निखिलजगद्धेतुता ब्रह्मलक्ष्म
स्यात् तेनैव स्वरूपावगतिरिह मुधा सत्यतादीनि चेन्न।
हेतोरीशस्य हेत्वन्तरगतविविधावद्यवर्गप्रसङ्गे
शङ्कारूढे क्रमेणेतरविभजनतस्तस्य साफल्यसिद्धेः।।336

**नन्वाध्यानं प्रियाद्यैरपि भवति शिरःपक्षपुच्छादिरूपैः**
**बाढं तत्र प्रियाद्यैस्तदवगतिरतस्ते तु सर्वानुवृत्ताः।**
**पुच्छाद्यंशो निरंशे न भवति न च तद्दृष्टिरुत्कृष्टतत्वे**
**तस्मात् चिन्त्याग्निरूपक्रमवदिह कृतं रूपणं ब्रह्मणि**
**स्यात्।।337**

**आनन्दत्वप्रधानं कतिचिदिह विदुः सौत्रमानन्दशब्दं**
**धर्मानन्दाभिधानं तदुभयवचनं वेति पश्यन्ति केचित्।**

**ज्ञानोक्तौ चैतदेवं तदितरसमता यावता स्यान्न शङ्क्या**
**तावद्धर्मानुवृत्तिर्बहुभजनपदे ब्रह्मणि स्थाप्यतेऽत्र।।338**

<u>कार्याख्यानाधिकरणम्। 87.</u>

<u>**सूत्रम् – कार्याख्यानादपूर्वम्। 372.**</u>

**आचामेदित्यपूर्वाचमनमिह विधेः प्राणविद्यावतः स्यात्**
**मैवं स्मृत्यादिसिद्धेः परमनुविहिता प्राणवासस्त्वदृष्टिः.।**
**भुञ्जीतेत्यादिनीत्या विधिरपि घटते प्राप्तधात्वर्थनिष्ठः**
**प्रागुक्ता प्राणविद्या तदिदमवसरे चिन्तितं त्वङ्गमस्याः।।339**

**आदावन्ते च वासःपरिधिरभिहितो मन्यतिश्चात्र दृष्ट्यै**
**सा चाराध्यप्रियार्था स्तुतिरिह न भवेत् गत्यलाभाभिनन्द्या।**
**युक्तश्चापूर्वभावात्  परिदधतिगिरा तद्विधानाभिसन्धिः**
**प्राणश्चाराधनीयः परिहितवसनो युज्यते सद्भिरद्भिः।।340**

समानाधिकरणम्। 88

**सूत्रम् – समान एवञ्चाभेदात्। 373.**

**स्थानद्वन्द्वे वशित्वप्रभृतिविरहिता वाजिभिस्तद्युता चा-**
**धीता शाण्डिल्यविद्या तदिह भिदुरता कल्पनीयेति चेन्न।**
**आरण्योक्तं वशित्वाद्यपि खलु विततिः सत्यसङ्कल्पतायाः**
**साधीताग्रे रहस्येप्यधिकविरहतो नात्र विद्यैक्यबाधः।।341**

**शाखैक्येध्येतृभेदो न भवति न गुणः कश्चिदन्यो विधेयः**
**तस्मादुक्ताविशेषश्रवणमिह पुनः किं न विद्यां विभिन्द्यात्।**
**मैवं यद्यप्यनूक्तिर्न तु गुणविधये कल्पते स्यात् तथापि**
**व्यक्त्यै सौकर्यतश्च व्यसनसमसनन्यायतस्त्वैक्यसिद्धेः।।342**

**छन्दोगैर्वाजिभिश्च स्फुटमनुपठिता भाति शाण्डिल्यविद्या**

**भेदाभेदावमर्शस्त्विह किमिति न सदंर्शितो भाष्यकारैः।
तद् ब्रूमो यत्रयत्राधिकपरिपठनं तत्रतत्राधिकानां
अन्तर्भावादियुक्तावनधिकमधिकं वेति साधारणोक्तेः।।343**

सम्बन्धाधिकरणम्। 89

**सूत्रम् – सम्बन्धादेवमन्यत्रापि। 374. न वा विशेषात्। 375. दर्शयति च। 376.**

**अक्ष्यादित्योपलक्ष्ये भगवति भजनं चोदनादेरभेदात्
एकं स्यात् तेन नाम्नोरनियतिरिति न स्थानतो रूपभेदात्।
स्थानं तत्स्थत्वबुद्ध्यै ह्युपदिशति न चेत् स्यान्न रूपातिदेशः
तस्मादर्काक्षियोगादहरहमिति तन्नामनी स्थापनीये।।344**

सम्भृत्यधिकरणम्। 90

**सूत्रम् - सम्भृतिद्युव्याप्त्यपि चातः। 377.**

**सम्भृत्यादिर्गुणौघः प्रकरणपठनाभावतः सर्वविद्या-
स्वन्वीयेतेति चेन्न क्वचिदगतिकतो लिङ्गतः स्थापितत्वात्।
अल्पस्थानासु विद्यास्वघटितवपुषः स्वोचितस्थानवृत्तेः**

**द्युव्याप्तेरेकमन्त्रे सहपठनवशात् तत्समस्थानिनोन्ये।।345**

पुरुषविद्याधिकरणम्। 91

**सूत्रम् – पुरुषविद्यायामपि चेतरेषामनाम्नानात्। 378.**

**आख्याद्यैक्यादभेदः पुरुषविषययोर्विद्ययोरित्ययुक्तं**
**यज्ञाद्याकारक्लृप्तेरिह विषमतया रूपभेदप्रसिद्धेः।**
**तादर्थ्यात् तैत्तिरीये परभजनफलं मुक्तिरत्राप्यनूक्ता**
**छान्दोग्ये पूर्णमायुः फलमिति तु तयोर्भाति संयोगभेदः।।346**

**स्पष्टे रूपादिभेदे हठसमुपनतो नामसाम्यादिमात्रात्**
**पुंविद्यापूर्वपक्षो मृदुरिति विफलाधिक्रियैषेति चेन्न।**
**अन्यैव न्यासविद्याप्रकरणपठिता तद्विधानप्रधाने-**
**-त्यस्वातन्त्र्यादिसिद्ध्यै**
**विभजनमनयोरित्यतीवार्थवत्वात्।।347**
**यद्येवं यज्ञदृष्टिः परविदि पुरुषे चोद्यते सानुबन्धे**
**यज्ञस्यानङ्गभूतं कथमिह विविधं कल्प्यते तत्रतत्र।**
**तस्मात् प्रक्रान्तविद्यास्तुतिरियमुचितेत्याहुरेकेऽन्यथान्ये**
**तिष्ठत्वेतद्विधापि प्रकृतसुघटिता सम्प्रदायस्तु चिन्त्यः।।348**

वेधाद्यधिकरणम्। 92

**सूत्रम् – वेधाद्यर्थभेदात्। 379.**

**युज्येरन् ब्रह्मविद्यापरिसरपठिताः शन्न इत्यादिमन्त्राः**
**तादर्थ्यात् सर्वविद्यास्विति न तदुदिताधीतिशेषत्वलिङ्गात्।**
**नो चेत् अन्येपि तद्वत् सविधपठनतः सन्तु शुक्रं प्रविध्ये-**
**त्येवम्प्रायास्तदर्था न च घटत इदं लिङ्गतो दुर्बलत्वात्।349**

हान्यधिकरणम्। 93

**सूत्रम् – हानौ तूपायनशब्दशेषत्वात्**
**कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम्। 380.**

**शाखे द्वे मुक्तिभाजः क्वचन कथयतः पुण्यपापप्रहाणं**
**ब्रूतेन्या तत्प्रवेशं प्रियतदितरयोर्दायसंक्रान्तिकाले।**
**हानञ्चोपायनञ्च क्वचिदिति पृथगाम्नातसम्पर्कसिद्धिः**
**वाक्यं शाखान्तरस्थं भवति हि विहिताकाङ्क्षया**
**वाक्यशेषम्।।350**

**इत्थं ब्रह्मज्ञकर्मत्यजनमितरसंक्रान्तिसम्पृक्तमस्तु**
**स्याच्चिन्तायां व्यवस्था  पृथगनुपठनादित्यसत्**
**क्लृप्तिदौस्स्थ्यात्।**
**सर्वेषां मुक्तिभाजां द्वितयमपि यथोपास्तिसाध्यं समानं**
**तच्चिन्तासौ तथा तन्महिमविद इति स्थापनीयोभयत्र।।351**

**कर्त्रा तेनैव भोग्यं शुभमितरदपि स्थापितं कर्मकाण्डे**
**तस्मात् ब्रह्मज्ञकर्म द्विषति सुहृदि वा नापतेदित्ययुक्तम्।**
**विद्यामाहात्म्यतो यद्विगलति विदुषः कर्म तत्साध्यतुल्यं**
**विद्वत्प्रद्वेषभक्त्योः फलमिति कथने वाक्यतात्पर्यसिद्धेः।।352**

<u>साम्परायाधिकरणम्। 94</u>

**<u>सूत्रम् – साम्पराये तर्तव्याभावात् तथाह्यन्ये। 381. छन्दत उभयाविरोधात्। 382. गतेरर्थवत्वमुभयथान्यथा हि विरोधः। 383. उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्। 384. यावदधिकारमवस्थितिराधिकारिकाणाम्। 385.</u>**

**कर्मोद्धूतिर्मुमुक्षोः क्वचिदुपनिषदि श्रूयते साम्पराये**
**मार्गेन्यस्यां द्विधैवं शकलश इह तच्चिन्तनञ्चास्तु मा भूत्।**
**न ह्युक्तं कर्मसाध्यं पथि फलमथ गत्यर्थदेहानुवृत्तिं**

**मुक्त्यै विद्यैव कुर्यादघहतिवचने पाठतोऽर्थो बलीयान्।।353**

**निश्शेषं कर्म नश्येदिह यदि  विदुषः स्थूलदेहान्तमात्रे**
**विश्राम्येत् तस्य तावच्चिरमिति हि वचो नार्थवत्वं गतेः स्यात्।**
**गत्वा सम्पद्य चाविर्भवनमिति न संबोभवीतीत्ययुक्तं**
**स्यात् धीसङ्कोचमात्रस्थितिकृदनुगतः सूक्ष्मसंस्कारयोगः।।354**

अनियमाधिकरणम्।95

**सूत्रम्  –  अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्याम्।**
**386.**

**पन्थाः स्यादर्चिरादिः फलमिह सकलब्रह्मविद्यासु मा वा**
**प्रारभ्याधीतियोगात् प्रकरणनियता तस्य चिन्तेति चेन्न।**
**सर्वासां तद्य इत्थं विदुरिति वचसाथात्र येचेति चोक्त्या**
**मार्गे साधारणेस्मिन् तदनुसरणतस्तद्वदेवास्य चिन्ता।।355**

**हेयोपादेयमार्गद्वितयमुपदिशन् मुक्तिदाता मुमुक्षोः**
**योगी यः  कश्चनैतत्सरणियुगलविन्मुह्यते नेत्यगायत्।**
**तस्मादस्माद्दशाधीत्यविशदविशदीकर्तृवाक्यावमर्शात्**
**ब्रह्मप्राप्त्यर्हकृत्स्नप्रणिहितविहितं मार्गचिन्ताविधानम्।।356**

**हानादेरर्चिरादेरपि किमभिहितं चिन्तनं सूत्रकारैः
विद्याङ्गत्वादिसिद्ध्यै यदि भवतु तदानन्तरे पाद एतत्।
मैवं विद्याङ्गतायामपि भजनमिवेदञ्च धीत्वाविशेषात्
कर्मादिभ्यो विभक्तं कथयितुमिह तत्सूत्रणं स्थानपाति।।357**

अक्षरध्यधिकरणम्। 96

**सूत्रम्–अक्षरधियां त्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्। 387.**

**इयदामननात्। 388.**

**यस्यामस्थूलतादिः प्रपठितमुचितं चिन्तनं तस्य तस्यां
नान्यस्यां मानहानेः न यदि नियमनं कस्य कुत्रेति चेन्न।
हेतुत्वोन्नेयदोषव्यपनयनमिह ब्रह्मविद्यासु सर्वा-
स्वानन्दाधिक्रियोक्तक्रमनियमितमित्यस्य सार्वत्रिकत्वात्।।358**

**सत्यत्वाद्यैः स्वरूपावगतिरभिहिता सर्वविद्यानुवृत्या
भूयस्तत्तुल्यधर्मेष्वधिकरणमिदं स्यात् वृथैवेति चेन्न।
कैश्चिज्ज्ञातस्वरूपे क्वचिदितरगतं क्विञ्चदन्यन्निषेध्यं**

**व्यावृत्या न स्वरूपावगतिरत इति प्रेक्षणस्यात्ररोधात्।।359**

**व्यावर्त्यानन्त्यतस्तद्व्युदसनमपि हि स्यादनन्तं ततस्त-
च्चिन्ता किञ्चिज्ज्ञसाध्या जलधितरणवन्नोपदिश्येत मैवम्।
तत्तत्सामान्यधर्मानुगतिकबलिताशेषभेदोपदेशे
तादृक्चिन्तोपपत्तेरनवममिति वा गृह्यतां संगृहीतिः।।360**

<u>अन्तरत्वाधिकरणम्। 97</u>

**<u>सूत्रम् – अन्तराभूतग्रामवत् स्वात्मनोन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्। 389. व्यतिहारो विशिंषन्ति हीतरवत्। 390.सैव हि सत्यादयः। 391.</u>**

**सूत्रस्वारस्यलाभात् प्रथममसुभृतः पूर्वपक्षे निवेशः
सिद्धान्ते ब्रह्मणश्चेत्यधिकरणगतिः स्तोकशङ्कापनुत्यै।
साक्षाद्ब्रह्मेति वाक्यद्वयमवमृशतामन्यशङ्कैव न स्यात्
इत्यालोच्याथ भाष्ये परविषयतया पूर्वपक्षोप्युपात्तः।।361**

**यत्साक्षादित्यमुष्मिन् श्रुतिशिरसि परं ब्रह्म वेद्यं यदेवे-
त्येतस्मिंश्चास्त्वथापि प्रतिवचनभिदा तत्र रूपं भिनत्ति।
विद्याभित् प्रष्टृभेदोप्ययमिति यदि नानूद्य भूयोनुयोगात्**

**पश्चादुक्तश्च दोषात्यय इह न भिदां सौति साधारणत्वात्।।362**

**सद्विद्यायां यथा हि प्रतिवचनभिदा प्रश्नभेदानुसारात्**
**विद्यैकत्वे विशेष्यं प्रकटयति परां देवतामेव तत्र।**
**तेनोषस्तः कहोलश्रुतमपि स च तत्संश्रुतं सङ्कलय्य**
**ध्यायेतां ब्रह्म सर्वान्तरमिति फलवत् तत्र सब्रह्मचर्यम्।। 363**

<u>कामाद्यधिकरणम्। 98</u>

**<u>सूत्रम् – कामादीतरत्र तत्रचायतनादिभ्यः। 392.</u>**

**<u>आदरादलोपः। 393. उपस्थितेतस्तद्वचनात्। 394.</u>**

**आकाशं ताण्डिनस्तच्छयितमधिजगुर्वाजिनस्तेन विद्या**
**भिद्येतात्रेति चेन्न द्विविध इह यतो ब्रह्मनिर्देश एषः।**
**सर्वाधारत्वपूर्वैः परतरविषयः सामगाकाशशब्दः**
**विश्वेशाधारतोक्त्या सुषिरविषयतान्यत्र रूपं तु नान्यत्।।364**

**छन्दोगानामुपास्यं प्रथितमिह गुणैरष्टभिर्ब्रह्म जुष्टं**
**तच्चान्येषां वशित्वप्रभृतिघटितमित्यस्तु रूपे तु भेदः।**
**मैवं यत् तत् वशित्वाद्यपि तदिह भिदा सत्यसङ्कल्पतायाः**
**इत्यैकार्थ्यं निरूढं परमपि दहरोपासनं तद्वदूह्यम्।। 365**

**नन्वाकाशो गुणाद्यैः पर इति दहराधिक्रियायां पुरोक्तं**
**तस्मान्नान्यार्थशङ्केत्यधिकरणमिदं नोज्जिहीतेति चेन्न।**
**व्योमातीतं निमित्तं दहरमिदमुपादानमित्युद्गृणन्तः**
**पूर्वं क्षिप्ताः प्रसङ्गात् पुनरपि गमिताश्छिन्नमूलत्वमत्र । 366**

<u>तन्निर्धारणानियमाधिकरणम्। 99</u>

**<u>सूत्रम् - तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम्। 395.</u>**

**उद्गीथादौ क्रियाङ्गे भजनमपि भवेत्पर्णताद्युक्तनीत्या**
**कर्माङ्गं तत्फलोक्तिस्त्विह नुतिरिति गोदोहनन्यायभग्नम्।**
**स्वर्गादीनां फलत्वं क्रतुषु तदधिको ह्यत्र वीर्यातिरेकः**
**पर्णत्वादौ न वाक्यं वदति करणतां कर्म चाहानुपास्तौ।।367**

**उद्गीथे प्राणदृष्टौ क्रतुघटितफलादन्यदुक्तं फलं तत्**
**स्वीकृत्य प्राक् विचारः स्थित इति विहतः पूर्वपक्षोत्र मैवम्।**
**अत्रत्येनङ्गभावे स्थिरनिहितधियस्तत्र विद्यैक्यशङ्का**
**त्यक्त्वाङ्गानङ्गभावौ पृथगपृथगिति स्याच्च पूर्वत्र चिन्ता। 368**

प्रदानाधिकरणम्। 100

**सूत्रम् – प्रदानवदेव तदुक्तम्। 396.**

**कामानेतांश्च सत्यानिति वचनबलात् धर्म्युपास्तेर्विभक्ता**
**धर्मोपास्तिस्तदर्थं गुणिपरिगणनं तन्त्रतोस्त्वित्ययुक्तम्।**
**तत्तद्वैशिष्ट्यभेदात् प्रतिविधि गुणिनश्चिन्तनावृत्तिरर्थ्या**
**राजत्वाद्यैः पृथक्त्वाद्भवति हि हविषो दानमावृत्तमिन्द्रे।।369**
**तत्तद्भोगप्रतीतेर्गुणघटितपरोपासना भोगहेतुः**
**मुक्तिश्च स्यात् क्रमादित्यसत् अगुणवचस्यान्यपर्याभिधानात्।**
**शास्त्रेस्मिन् आ समाप्तेः क्व फलमभिहितं निर्गुणोपास्तिसाध्यं**
**नोच्छास्त्रञ्च प्रकल्प्यं गुणनियमनतः ख्यातिमांश्चैष पादः। 370**

**प्रत्येकं मेलनाद्वा दहरगुणगणेप्यत्र सञ्चिन्त्यमाने**
**गुण्यावृत्यर्थलब्धेः कथमिह तदनावृत्तिशङ्केत चेन्न।**
**बुद्ध्यारोहे गुणानां यदवधि गुणिनो रूपमर्थ्यं ततोन्यत्**
**विद्यैकान्तं तदावृत्यनुघटिततदावृत्तिचिन्ताप्रवृत्तेः।।371**

## लिङ्गभूयस्त्वाधिकरणम्। 101

**सूत्रम् – लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि। 397.**

**प्रक्रान्ता दह्रविद्या प्रकटमुपरि च ज्ञायते तैत्तिरीये**
**तस्मादूर्ध्वानुवाकः प्रकृतविषयनिर्धारणार्थोस्तु मैवम्।**
**तत्तद्विद्योदितैस्तैः परमिह पुरुषं प्रत्यभिज्ञाप्य शब्दैः**
**तस्मिन् नारायणत्वं वददधिकबलं प्रक्रियातो हि वाक्यम्।।372**

**वाक्यैः सर्वार्थतायां दहरभजनमप्यत्र भागीति सार्थः**
**तल्लिङ्गोपेतभागो न च बहुभिरलं योद्धुमेकं कृतार्थम्।**
**नैकस्यास्योपकुर्यात् प्रकरणमलसं किञ्च सर्वोपजीव्ये**
**तत्वे तात्पर्यमत्र स्फुटमिति वितथा तत्परित्यागक्लृप्तिः।। 373**

**आत्मैक्यं देवतैक्यं त्रिकसमधिगता तुल्यतैक्यं त्रयाणां**
**अन्यत्रैश्वर्यमित्याद्यनिपुणफणितीराद्रियन्ते न सन्तः।**
**त्रय्यन्तैरेककण्ठैस्तदनुगुणमनुव्यासमुख्योक्तिभिश्च**
**श्रीमान्नारायणो नः पतिरखिलतनुर्मुक्तिदो मुक्तभोग्यः।। 374**

## पूर्वविकल्पाधिकरणम्। 102

**सूत्रम् - पूर्वविकल्पःप्रकरणात्स्यात् क्रियामानसवत्। 398.**

अतिदेशाच्च। 399. विद्यैवतु निर्धारणाद्दर्शनाच्च। 400. श्रुत्यादिबलीयस्त्वाच्च न बाधः। 401. अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम्। 402. न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः। 403. परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्वनुबन्धः। 404.

अङ्गं पूर्वप्रसक्तेष्टकचितसमुपस्थापितस्य क्रतोः स्यात्
बुद्ध्यात्माग्निर्मनश्चित्प्रभृतिरपि यथा मानसं द्वादशाहे।
तद्वीर्यस्यातिदेशादिति न सत् उदितो ह्यत्र विद्यात्मकोऽङ्गी
श्रुत्याद्यैरेव तस्मिन् उपकृतिसमताबोधनार्थोऽतिदेशः।। 375

कल्प्यो ह्यत्र क्रियात्मा क्रतुरपि तदपि प्रागुपात्ताङ्गशक्त्या
वाक्यस्थैश्चानुबन्धैरिह समुपनतो भाति विद्यामयस्तु।
दूरस्थाकृष्टयोगात् स्ववचनपठिताकृष्टयोगो बलीयान्
अप्राप्तेर्थे विधित्वं ह्यनुवदनसमेप्याश्रितं तद्वदत्र।।376

## शरीरेभावाधिकरणम्। 103

सूत्रम् - एक आत्मनश्शरीरे भावात्। 405.
व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत्। 406.

**तत्कालाकारिणः स्यादहमिति भजने कञ्चुकस्यात्मनो धीः**
**आसत्तेर्मामुपास्वेत्युदितवदिति चेन्नान्यथा सन्निकर्षात्।**
**शुद्धो ह्यात्मात्र साध्यः फलमतिरविनाभाविनी बोद्धृकृत्ये**
**बुद्ध्यासन्नेन्तरङ्गे सति विधिनियता तत्क्रतुन्यायसिद्धिः। 377**

**कर्तुर्भोक्तृत्वमात्रं गणयितुमुचितं दृष्टभोगार्थयत्ने**
**स्वर्गाद्यर्थेन्यदेहानुगतिरपि परं स्वाधिकारानुविद्धा।**
**मुक्त्यर्थे प्राप्त्यवस्थाप्रणिधिकथनतस्तत्क्रतुन्यायवाचा**
**चिन्त्यस्य प्राप्यतार्थो गमित इति कुतोतिप्रसङ्गादिशङ्का। 378**

**विद्याभेदेषु वेद्याकृतिविषमयता यावदुक्तेपि चिन्त्ये**
**प्राप्यं सर्वोपपन्नं खलु तदिह कथं प्राप्य चिन्तानिषेधः।**
**तस्मात् बद्धस्य चिन्तास्त्विति न कलुषितो न ह्यहंशब्दमुख्यः**
**प्राजापत्यात् तु वाक्यादकलुषदशया भावनीयत्वसिद्धिः।।379**

अङ्गावबद्धाधिकरणम्। 104

**सूत्रम् - अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम्। 407.**

**मन्त्रादिवद्वा विरोधः। 408**

**उद्गीथादेर्विशेषे भजनविधिरसौ स्यात् स्वसान्निध्यगीते**

**मैवं सर्वाङ्गिभूतक्रतुमुखत इहाशेषसान्निध्यसिद्धेः।**

**सामान्यं व्यक्त्यपेक्षक्रियमपि नियमादर्शने व्रीहितावत्**
**शब्दश्चोद्गीथमात्रं वदति न तु भिदां छागनीतिस्तु नात्र।। 380**

भूम्नज्यायस्त्वाधिकरणम्। 105

**सूत्रम् - भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति। 409**

**व्यस्तो वैश्वानरात्मा प्रतिनियतफलोदाहृतेश्चिन्तनीयः**
**कृत्स्नोपास्तौ फलोक्तिः स्तुतिरिह यदि वा कृत्स्नरूपोप्युपास्यः।**
**मैवं व्यस्तेषु दोषः पृथगनुकथितस्तत्फलोक्तिः स्तुतिः स्यात्**
**दृष्टं ह्यष्टाकपालप्रभृतिषु च तथा तेन चिन्त्यः समस्तः।। 381**

**सामस्त्येनैव योगे द्रढिमवति महावाक्यतात्पर्यवृत्त्या**
**व्यस्तेष्वंशाननूद्य स्तुतिनियतनयादान्यपर्यं फलोक्तेः।**
**मानादीनामुपास्तौ फलमवधितयापेक्षितं भूमवाक्ये**
**नाप्येवं प्रत्यवायः श्रुत इति विषमोदाहृतिर्नार्थसिद्ध्यै।।382**

## शब्दादिभेदाधिकरणम्।106

**सूत्रम् - नाना शब्दादिभेदात्। 410**

**सर्वासु ब्रह्म वेद्यं फलमपि खलु तत् ब्रह्मविद्येति चाख्या**
**ध्यानाद्युक्त्येकलक्ष्ये विधिरपि भजने सर्वविद्यैक्यमित्थम्।**
**तन्त्राख्यारूपभेदात् तदुपहितविधौ तेन वैशिष्ट्यसिद्धेः**
**मिश्रं मध्वादिविद्याफलमिह च पृथक् काम्यविद्यासु**
**चैवम्।।383.**

**नानाशब्दादिभेदादिति कथमवदत् सूत्रकृत् शब्दसाम्ये**
**न ह्येते यागदानादय इव भिदुरा भक्तिविश्रान्तिसिद्धेः।**
**सत्यं शब्दस्य भेदस्त्वयमुपचरितो रूपभेदद्रढिम्ने**
**ज्ञानं ये चाविधेयं करणमिति जगुस्तन्निरासेभिसन्धिः।।384**

**यद्वा शब्दादिभेदादिति तु कथयता सूत्रकारेण सम्यक्**
**न्यासोपासे विभक्ते यजनहवनवच्छब्दभेदादभाक्तात्।**

**आख्यारूपादिभेदः श्रुत इतरसमः किञ्च भिन्नोधिकारः**

**शीघ्रप्राप्त्यादिभिः स्यात् जगुरिति च मधूपासनादौ व्यवस्थाम्।।385**

विकल्पाधिकरणम्। 107

**सूत्रम् -** विकल्पोऽविशिष्टफलत्वात्। 411. काम्यास्तु यथाकामं समुच्चीयेरन्नवा पूर्वहेत्वभावात्। 412.

**ज्योतिष्टोमाग्निहोत्रप्रभृतिवत् अधिकानन्दसिद्ध्यै समुच्चि-त्त्यर्हाः स्युर्ब्रह्मविद्या न च भजनविधिः कश्चिदेकं प्रति स्यात्। कर्तुं ताः कालभेदात् क्षममिति न मिथो वासनास्थैर्यबाधात् संपूर्णब्रह्मलब्ध्यै पृथगिह च विधिः प्रायणान्ते समाधौ।।386**

**रूपादीनां विशेषैर्ननु परभजनं नैकरूपं विभक्तं सामग्रीभेदतस्तत्फलमपि विषमं सम्मतं न्यायतः स्यात्। न स्यात् सर्वासु विद्यास्वपि हि फलतया वक्ष्यते भोगसाम्यं प्राप्यैक्यञ्च प्रसिद्धं बहुसरणिजुषां लोकतो वेदतश्च।। 387**

यथाश्रयभावाधिकरणम्। 108

**सूत्रम् - अंगेषु यथाश्रयभावः। 413. शिष्टेश्च। 414.**

<u>समाहारात्। 415. गुणसाधारण्यश्रुतेश्च। 416. न वा तत्सहभावाश्रुतेः। 417. दर्शनाच्च। 418.</u>

तत्तद्विद्यासु तादृक्फलतरतमतां वारयित्वा प्रसङ्गात्
प्रागुक्तोद्गीथविद्याफलमथ पुनराक्षिप्य गाढीकरोति।
मा भूदुक्तं स्ववाक्ये फलमिह तु न सा पर्णमय्यादिनीतिः
स्पष्टा खल्वत्र विद्या फलकरणतया वर्तमानोक्तितोपि।।388

तादर्थ्यं नात्र कर्मश्रुतिरवगमयेदाश्रयालम्बमात्रात्
विद्याहानौ च युक्तं प्रतिविधिवचनं तत्फलार्थिप्रसङ्गे।
तारे सोपासनेस्तु स्तवनमनुगमात् तावता सा तु नाङ्गं
प्राग्वक्तव्यस्य हित्वा वच इदमुपरि स्थापनीयप्रसक्त्यै।।389

विद्यैक्योद्गीथविद्याद्वितयविभजनप्राणविद्यैकभावाः
सर्वास्वानन्दतादेर्गुणिवदनुगतिः प्राणवासस्त्वदृष्टिः।
शाण्डिल्यैक्यं विभज्य स्थितिरहरहमो सम्भृतेस्स्थानसीमा
पुंविद्याया विभेदोध्ययननियतता शन्न इत्यादिकानाम्।। 390

हानाद्यन्योन्ययोगः तदुचितसमयो देवयानादिसाम्यं
सर्वत्रास्थूलतादि व्यतिहरणमथानेकशिष्यश्रुतानाम्।

**दह्रोपास्त्येकभावो गुणफलविधिरुद्गीथमाश्रित्य दृष्टौ**
**गुण्यावृत्तिर्गुणार्थं निखिलपरतरोपास्तिवेद्यावसायः।।391**

**विद्यारूपा मनश्चित्प्रभृतय उचितज्ञानरूपक्रतुस्थाः**
**क्षेत्री शुद्धोनुचिन्त्यः क्रतुगुणसकलोद्गीथपूर्वेषु दृष्टिः।**
**सामस्त्येनैव वैश्वानरभजनमथानेकविद्योपपत्तिः**
**मोक्षार्थानां विकल्पः पुनरनियतिरुद्गीथदृष्टेरिहोचे।। 392**

**<u>इति तृतीयाध्यायस्य तृतीयः पादः</u>**

<u>अथ तृतीयाध्यायस्य चतुर्थः पादः</u>

<u>पुरुषार्थाधिकरणम्। 109</u>

**<u>सूत्रम् - पुरुषार्थोऽतश्शब्दादिति बादरायणः। 419.</u>**
**<u>शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः। 420.</u>**
**<u>आचारदर्शनात्। 421. तच्छ्रुतेः। 422. समन्वारम्भणात्।</u>**
**<u>423. तद्वतो विधानात्। 424. नियमात्। 425.</u>**
**<u>अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्। 426. तुल्यं तु</u>**

<u>तद्दर्शनम्। 427. असार्वत्रिकी। 428. विभागश्शतवत्। 429. ध्ययनमात्रवत:। 430. नाविशेषात्। 431. तयेनुमतिर्वा। 432. कामकारेण चैके। 433. उपमर्दश्च। 434. ऊर्ध्वरेतस्सु च शब्दे हि। 435. परामर्शं जैमिनिरचोदनाच्चापवदति हि। 436. अनुष्ठेयं बादरायणस्साम्यश्रुते:। 437. विधिर्वा धारणवत्। 438.</u>

कर्म प्राक् चिन्तयित्वा ननु परममथ ब्रह्म जिज्ञास्यमुक्तं
पादे विद्याङ्गतोक्तिः पुनरिह वितथानेकधा त्याज्यतोक्तेः।
मैवं कर्मैव तत्तद्गुणयुतविनियुक्त्यन्यभावेन भिन्नं
विद्यानिष्पत्तिहेतुः किमपि च सुकृतं स्यान्निवृत्तैकसंज्ञम्।।393
त्यागः काम्यक्रियाणां क्वचन परविदः क्वाप्यनर्हक्रियाणां
स्वैकाधीनत्वबुद्धेः क्वचिदनुपधिकस्वार्थबुद्धेश्च गीतः।
अत्राहिंसादिकानां त्वघविहतिकृतां सर्वसाधारणानां
ब्रूते वर्णाश्रमादिप्रतिनियतिमतामप्युपास्त्यङ्गभावम्।।394

कर्तात्मा कर्मणां यस्तदधिकमिह न ब्रह्म तस्मान्मखादौ
तद्बुद्ध्यैवोपयुक्ताः स्युरुपनिषद इत्यर्धमीमांसकोक्तौ।
जीवान्यब्रह्मचिन्तात्मकभजनविधौ कर्मणामङ्गभावं

प्राह क्षिप्तान्यलिङ्गैः कलुषशमनतस्सत्वसंवर्धकानाम्।।395

पादैरत्रैवमेकादशभिरपि परंब्रह्म वेद्यं निरूढं
भूयः किं क्षुद्रलिङ्गैर्गगनलिपिनिभैः क्षोभ्यते ब्रह्मविद्या।
सत्यं तत्तादृगल्पश्रुतमतिकलहत्रासितच्छात्रडिम्भ-
स्तोमक्षेमाय जैमिन्यहृदयकथितं पक्षमुत्क्षिप्य हन्ति।।396

कुर्वन्नेवेति वाक्यं परविदि नियताचारतोक्तिः सहैवा-
न्वारम्भो धीक्रियाभ्यामपि न नियमयेदङ्गतामङ्गितां वा।

विद्यापूर्वं क्रियाणां करणमनुवदत् वाक्यमन्यार्थमुक्तं
न ह्येतद् ब्रह्मविद्यामनुवदति न चोद्गीथविद्या क्रियाङ्गम्।। 397

स्वाध्यायप्राप्तये ह्यध्ययनमुदितमाधानवन्नोत्तराङ्गं
विद्याङ्गं चार्थबोधो भवतु यदधिका सा स्वरूपैः फलैश्च।
नित्यात्मज्ञानमात्रं क्रतुषु नियमतोपेक्षितं नान्यविद्या
काम्यत्यागः सविद्ये कथमिह भविता सापि यद्यङ्गमेषाम्।।398

नाङ्गं विद्या मखादेर्न हि तदधिकृतेष्वेव तामामनामः
स्यात् तत्तत्कर्मणां सेत्यपि न बहुविधात् वैपरीत्योपदेशात्।

**जाबालैरूर्ध्वरेतोविधिरपि पठितोनूद्यतेन्यैश्च तस्मात्**
**प्राप्तिर्ग्राह्यान्यथापि स्वयमिह तु विधिस्तन्निषेधस्सरागे।।399**

<u>स्तुतिमात्राधिकरणम्। 110</u>

**<u>सूत्रम् - स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्। 439.</u>**

**<u>भावशब्दाच्च। 440.</u>**

**जुह्वादिस्तोत्रनीत्या भजतु रसतमाद्युक्तिरङ्गस्तुतित्वं**
**मैवं तत्तद्विधानप्रकरणरहितापूर्वनिर्देशयुक्तेः।**
**तत्तद्दृष्टेर्विधानं विविधमिह समालक्षि चैतत्समीपे**
**तेनानन्यार्थशिष्टे फलवति च विधिर्युज्यते कल्प्यमानः।। 400**

**किञ्च प्राप्तेरभावान्न तदनुवदनं नाधिरोप्यस्तुतिर्वा**
**युक्ता विध्येकवाक्ये गतिरियमगतेःसात्र नासत्तिहानेः।**
**उत्कर्षः कल्प्यते चेत् अगतिकविषये तत्प्रसह्य प्रसह्यं**
**मध्ये विद्याविधीनां वचनमिदमिति स्यात्तु विद्यार्थमेतत्।।401**

**विध्यर्थत्वेपि युक्ता स्तुतिरियमसतः कीर्तनादित्ययुक्तं**
**दृष्ट्युद्देशेतिचारादथ च विशयनं स्यादिति त्वर्भकोक्तिः।**

**नित्येस्मिन् ह्यप्रमाणं प्रसजति निगमो युक्तिवार्यत्वपक्षे**
**त्वित्थंभावे बुभुत्स्ये वच इहफलवत् दृष्टिविध्यर्थमेव।।402**

पारिप्लवाधिकरणम्। 111

**सूत्रम् - पारिप्लवार्था इति चेन्न विशेषितत्वात्। 441. तथा चैकवाक्योपबन्धात्। 442.**

**विद्यास्वाख्यानभेदाः विधिमहिमहृतास्सन्तु पारिप्लवार्थाः**
**न स्युर्विद्याविधानैः प्रकरणपठितैरेकवाक्यत्वदृष्टेः।**
**मन्वाद्याख्यानमात्रं भवति च कथितं तत्र पारिप्लवार्थं**
**तेनाकाङ्क्षानिवृत्तौ न तदधिकपराख्यानतादर्थ्यक्लृप्तिः।। 403**

अग्नीन्धनाधिकरणम्। 112

**सूत्रम् - अत एवचाग्नीन्धनाद्यनपेक्षा। 443.**

**यज्ञादेरङ्गभावान्न तदनधिकृतेष्वङ्गिनोधिक्रिया स्यात्**
**विद्यैक्यं नोर्ध्वरेतस्स्विति न बहुविधस्वाश्रमार्हाङ्गतोक्तेः।**

**विद्यायोगश्चतुर्णां विधिरपि हि समश्श्रूयते स्मर्यते च**

**प्रायेणौचित्यभूम्ना मुनिभिरभिहितं क्वापि मोक्षाश्रमत्वम्।।404**

<u>सर्वापेक्षाधिकरणम्। 113</u>

**<u>सूत्रम् - सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्। 444.</u>**

**त्यक्ते यज्ञादिधर्मे परभजनविधेरूर्ध्वरेतस्सु दृष्ट्या**
**विद्या तेनानपेक्षा गृहवति च भवेदित्यनालोचितोक्तिः।**
**यज्ञेनेत्यादिकाभिः श्रुतिभिरवगता ह्यस्य सा तत्प्रसाध्या**
**जिज्ञासार्थत्ववादो जिगमिषति पदेत्यादिनीत्या निवर्त्यः।।405**

**नन्विच्छार्थत्वहानिर्जिगमिषति पदेत्यादिके गत्यभावात्**
**श्रुत्युक्तेस्मिंस्तथा नेत्यसत् इह च यतो गत्यभावः समानः।**
**इच्छा स्यात् धीविशेषात् तदनुपजनने कर्मभिः सा न साध्या**
**जिज्ञासां प्राप्तुमिच्छोर्न च न भवति तज्ज्ञानमिष्टं पुरैव।। 406**

**नन्वत्रेच्छानुवृत्तिं प्रति विहितमिदं कर्म योज्यं ततः किं**
**नेच्छार्थं धीविशेषप्रजननमुदितं तावता वारितं स्यात्।**
**ज्ञानार्थं कर्मविध्यन्तरमपि विविधं नापलापक्षमं ते**
**निध्यानन्यायतोतस्त्वनुवदति विधेयेष्टतां सन्प्रयोगः।।407**

शमदमाद्यधिकरणम्। 114

**सूत्रम् - शमदमाद्युपेतस्स्यात् तथापि तु तद्विधेस्तदंगतया तेषामप्यवश्यानुष्ठेयत्वात्। 445.**

**यज्ञादिव्यापृतत्वादनिभृतकरणे सर्वकालं गृहस्थे**
**शान्त्यादीनामयोगात् तदितरविषयास्ते गुणा इत्ययुक्तम्।**
**प्रव्रज्यादिस्थितानामपि तदुपधिकानेकधर्मप्रवृत्तेः**
**तत् सर्वं सह्यते चेत् सह तदपि फलाद्युज्झनञ्चात्र तुल्यम्।।**
**408**

**प्रज्ञातस्वापराधाः प्रभुमनुतपने लोकसिद्धैरुपायैः**
**आत्मार्हैरर्चयन्तः क्रमशमितरुषस्तस्य सेवां लभन्ते।**
**इत्थं नश्शास्त्रसिद्धैरिदमनिदमिति स्वाधिकारैर्विभक्तैः**
**निष्प्रत्यूहः प्रसादो निरुपधिसुहृदः श्रीधरस्याधिगम्यः।। 409**

सर्वान्नानुमत्यधिकरणम्। 115

**सूत्रम् - सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्। 446.**

**अबाधाच्च। 447. अपि स्मर्यते। 448.**
**शब्दश्चातोऽकामकारे। 449.**

**आहारस्य व्यवस्था न भवति वचनात् प्राणविद्याधिकर्तुः**
**सामान्यस्थो निषेधो बलवति हि विधौ संकुचेदित्ययुक्तम्।**
**अङ्गत्वेनाविधेः स्यादनुमतिवचनं प्राणभङ्गप्रसङ्गे**
**पश्यैतत् प्राणनिष्ठादधिकमहिमनि ब्रह्मनिष्ठेप्युषस्तौ।।410**

विहितत्वाधिकरणम्। 116

**सूत्रम् - विहितत्वाच्चाश्रमकर्मापि। 450. सहकारित्वेन च।**
**451. सर्वथापि त एवोभयलिंगात्। 452.**
**अनभिभवंच दर्शयति। 453.**

**वर्णादेः कर्मणां हि श्रुतिभिरभिदधे ब्रह्मविद्याङ्गभावः**
**तस्मादब्रह्मनिष्ठे तदननुसरणात् स्वैरितैवास्तु मैवम्।**
**नित्यत्वस्यापि सिद्धेस्तदुचितविनियुक्त्यन्यभावानुसारात्**
**तन्त्रं काम्याग्निहोत्रादिवदिह परविन्नित्यवर्गेपि योज्यम्।। 411**

## विधुराधिकरणम्। 117

**सूत्रम् - अन्तराचापि तु तद्दृष्टेः । 454. अपि स्मर्यते। 455. विशेषानुग्रहश्च। 456. अतस्त्वितरज्ज्यायो लिंगाच्च। 457.**

**दारालाभे विरक्तेर्म्रदिमनि च भवेदन्तरेणाश्रमान् यः**
**तस्मिन्निश्शेषधर्मत्यजि भवतु कथं ब्रह्मविद्येति चेन्न।**
**सामान्यैर्वर्णधर्मैर्गुणनियतियुतैः साहि तत्रापि साङ्गा**
**भीष्मादौ दृष्टमेतत् भवति तु वृषले गत्यभावादभावः।।412**

## तद्भूताधिकरणम्। 118

**सूत्रम् - तदभूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः। 458. न चाधिकारिकमपिपतनानुमानात्तदयोगात्। 459. उपपूर्वमपीत्येके भावमशनवत्तदुक्तम्। 460. बहिस्तु उभयथापि स्मृतेराचाराच्च। 461.**

**आरूढो नैष्ठिकादित्रयमथ पतितस्तत्परावर्तनात् यः**
**तत्रापि ब्रह्मविद्या भवतु सहकृता तद्दशार्हैः स्वधर्मैः।**

**मैवं यद्यप्यभीच्छन्त्युपपतनमिदं शोधकञ्चास्त्यनेकं**
**सर्वार्हं कीर्तनाद्यं तदपि तदुचितो नैष तादृङ्निषेधात्।। 413**

**प्रायश्चित्तं वदन्ति ह्युपपतनमहापातयोर्ब्रह्मयोगं**
**प्राप्ते पाते प्रमादात् विदधति मुनयो योगिनां योगमेव।**
**तस्मादारूढपातेप्यधिकृतिरिति नाचोदनीयं हि शास्त्रं**
**यावज्जीवं तु तन्निष्कृतिरिति नियमः सूत्रकाराद्यभीष्टः।। 414**

**यो बालं हन्ति यः स्त्रीं  शरणमुपगतं यश्च यो वा कृतघ्नः**
**प्रायश्चित्तैर्विशुद्धानपि जगदुरिमान् साधुसंसृष्ट्यनर्हान्।**
**स्मृत्याचारानुसारादिह  च गतिरियं दर्शिता सूत्रकारैः**
**शास्त्रं नश्शासनीयं यदि भवति तदा संप्लुतो धर्मसेतुः।। 415**

**ब्रह्मांशत्वे समाने गुणविषमतया शुद्ध्यशुद्धिस्वभावैः**
**देहैर्योगादनुज्ञा परिहरणमपि प्रेक्षणस्पर्शनादेः।**
**इत्येवं सूत्रितं प्राक् पुनरिह विविधालेपकक्षोभशान्त्यै**
**सम्यग्ज्ञातात्मनोपि स्वतनुसमुचिताचारतः प्रत्यबोधि।।416**

<u>स्वाम्यधिकरणम्।119</u>

**<u>सूत्रम् -  स्वामिनः  फलश्रुतेरित्यात्रेयः।  462.</u>**

**आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते। 463.**

**उद्गीथादावुपास्तिर्भवति हि फलिना यज्वनैवात्र शक्त्या**
**तस्मात् तत्कर्तृकासाविति यदि न परिक्रीतकर्माश्रयत्वात्।**

**ऋत्विक्साध्या यथान्ये गुणफलविधयोनूद्यते चैवमेषा**
**शक्यत्वं न ह्युपाधिर्विधिबलनियते स्वामिभृत्यक्रमेण।। 417**

सहकार्यन्तरविध्यधिकरणम्। 120

**सूत्रम् - सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्। 464. कृत्स्नभावात्तु गृहिणोपसंहारः। 465. मौनवदितरेषामप्युपदेशात्। 466.**

**मन्तव्यत्वे श्रुते सत्यथ मुनिरिति वागस्तु तस्यानुवादः**
**कश्चिन्न ह्यत्र दृष्टो विधिरिति न पुरः पण्डितत्वस्य लब्धेः।**
**ऊहापोहार्हता हि श्रवणमननतोनन्तरं पण्डितत्वं**
**मौनख्यातिः प्रकृष्टे मनन इति विभौ धारणाद्युक्तिरेषा।। 418**

अनाविष्काराधिकरणम्। 121

**सूत्रम् - अनाविष्कुर्वन्नन्वयात्। 467.**

**शिष्टं बाल्येन तिष्ठासनमपि विदुषो बालकृत्यं तदस्तु**
**प्राप्तुं बालस्य भावो न तु सुशक इति स्वैरितास्येति चेन्न।**
**दुश्चारित्रादमुं नाविरत इति वचः सन्निरुन्धे ह्यतोस्मिन्**
**माहात्म्यं स्वं निगूहेदिति मुनिविहिते बाल्यविध्याशयः**
**स्यात्।।419**

ऐहिकाधिकरणम्। 122

**सूत्रम् - ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात्। 468.**

**भोगार्थोपासनानां स्वजनकसुकृतैस्तत्क्षणादुद्भवः स्यात्**
**स्वर्गादिस्त्वत्र देहे न घटत इह तु स्वान्तशुद्ध्योपपत्तिः।**
**स्नानप्रायत्यनीतिस्तत इति न पुरा विघ्नसम्भावनोक्तेः**
**कारीर्यादौ तदर्हैः सगुणविरचितेप्यस्ति विघ्नः कदाचित्।। 420**

मुक्तिफलानियमाधिकरणम्। 123

**सूत्रम् - मुक्तिफलानियमस्तदवस्थाधृतेस्तदवस्थाधृते:।**

**469.**

**अस्त्वन्यत्रान्तरायः प्रबलतममिदं सात्त्विकत्यागयुक्तं**
**कर्म प्रोक्तं निवृत्याह्वयमिति सपदि ब्रह्मविद्यां विदध्यात्**
**मैवं तस्मात् बलीयान् यदि भवति परब्रह्मभक्तापराधः।**
**तच्छान्तौ तत्प्रसूतिः स न यदि झटिति स्यात् परोपास्तिलाभः।।**
**421**

**विद्यार्थत्वं क्रियाणां व्यभिचरणवशान्नेति शङ्कापनुत्त्यै**
**प्रत्यूहानाञ्च तूर्णं प्रशमनमुचितं सर्वदेति प्रसिद्ध्यै।**
**निष्प्रत्यूहस्य सद्यः फलमिति च सतां तोषहेतोरमुष्मिन्**
**पादान्ते न्यासिषातामनियमविषयौ शास्त्रकर्त्राधिकारौ।।422**

**प्रत्यूहस्य प्रसङ्गः क्षम इह परवित्कर्मणां तद्विधूत्यै**
**भोगार्थोपास्तिहेतुष्वयमनुकथितः किं मुधात्रेति चेन्न।**
**काम्ये निर्विघ्नबुद्ध्या पतति मतिरतस्तत्र वैराग्यभूम्ने**
**तत्प्रत्यूहप्रसक्तिर्भवति फलवती स्याच्च विद्यार्थकाम्यम्।। 423**

विद्या कर्माङ्गिका स्यात् रसतममुखधीश्चोदिता प्राप्त्यभावात्
आख्यानानाञ्च विद्याविधिसविधजुषां तद्विधानार्थतैव।
विद्या साङ्गोर्ध्वरेतस्स्वपि गृहवति सा यज्ञदानाद्यपेक्षा
शान्त्याद्यर्हो गृहस्थोप्यविपदि विदुषोप्यन्नशुद्ध्यैव सिद्धिः।।
424

एकं विद्याश्रमार्थं विधुरमपियुतं विद्ययाहुश्च्युतं न
क्रत्वङ्गे दृष्टिरृत्विक्कृतिरथ मुनिता चोदिता ध्यानसिद्ध्यै।
बाल्यं शक्त्यादिगुप्तिः बलवदभिहतैः कर्मभिर्नान्यविद्या
तद्वन्मुक्त्यर्थविद्या स्वजनकसुकृतैरित्युवाचात्र पादे।। 425

वाक्यार्थज्ञानमात्रं कतिचन कुदृशो मुक्त्युपायं गृणन्ति
ज्ञानं कर्मेति युग्मं करणमिति समुच्चित्य मन्यन्त एके।
कर्मप्राधान्यमन्येनिजगदुरपरे मुक्तिमिच्छन्त्यसाध्यां
सर्वे तेप्यत्र कर्माङ्गकभजनविधिस्थापनोक्त्या निरस्ताः।।426

यत् दुःखं वर्तते तत् क्षणभिदुरतया न स्वयत्नोपरोध्यं
नातीतार्थञ्च यत्नः न च सुपरिहरं भावि हेतौ समग्रे।
दुःखात्यन्तोपरोधे करणविधिरतो व्यर्थ इत्यर्धरम्यं
प्रायश्चित्त्या कृतानां परमकरणतो दुःखसामग्र्यपोहात्।। 427

राजद्विष्टादि सर्पाद्यपि परिहरसि च्छत्रपूर्वं बिभर्षि
प्रायश्चित्ताप्रवृत्तौ फलति दुरितमित्येवमीहामिहेच्छ।
उत्प्रेक्षारूढभाव्यापजयशमनतः स्वोक्तिसाफल्यमिच्छन्
पश्यंश्चाबालतिर्यक् भयचकितगतिं जोषमित्थं जुषस्व।। 428

साध्यं वा साधनं वा स्वविहितविपथैर्दुर्निरूपं वदन्तः
तद्वादे किं प्रवृत्ताः किमिति च विदधत्यन्वहं भोजनादीन्।
मुक्तेर्नित्यत्व सिद्ध्या भजनमफलमित्यप्यसत् प्रागसिद्धेः
सांख्यात्वत्रानुयोज्याः सकरणदशया नित्यमुक्तिं गृणन्तः।। 429

मोक्षाभावे मुधा स्यात् सपरिकरमिदं साधनं चिन्त्यमानं
मुक्तिश्चेत् भ्रान्तिसिद्धा भ्रम इह भविता यावदात्मस्वरूपम्।

क्षेत्रज्ञं नित्यमुक्तं कथयितुरफलः साधनाध्याय इत्थं
प्रध्वंसात्मा हि मुक्तिर्नयविदभिमता सा तु भावात्मिका
नः।।430

सन्तत्यात्मा कपालप्रभृतिबहुविधावस्थयान्यत्र नाशः
धीसङ्कोचप्रणाशो विकसनमतथाभूतमत्रागमात्स्यात्।

**मन्यन्तेन्ये तु धारावहनमतिनयात् सन्ततिं मुक्तबुद्धेः**
**सामग्री चेश्वरेच्छाप्रभृतिसमुदयः स्यादनावृत्तिरेवम्।। 431**

**इति तृतायाध्याये चतुर्थः पादः**

अथ चतुर्थाध्याये प्रथमः पादः

**इत्युत्पत्तिक्रमेण प्रथममभिहितो मुक्त्युपायस्सहाङ्गैः**
**तत्साध्यं सूत्रकारः फलमथ विदुषः पर्वभेदैर्व्यनक्ति।**
**स्थूले देहेस्य सिद्ध्येत् यदिह वदति तत् पादयुग्मेन पूर्वं**
**निष्क्रान्तस्याथ यत् स्यात् परिगणयति तत् पादयुग्मान्तरेण।।**
**432**
**सूक्ता प्रागेव विद्या किमिति पुनरिमां वक्ति यद्यस्ति शेषं**
**ब्रूतामेतच्च पूर्वं न हि तदिह फले संघटेतेति चेन्न।**
**मुक्तेरन्यैरसिद्धिं प्रकृततदविनाभावम् आसन्नसिद्धिं**
**मुक्तावस्थासमञ्ज स्थिरभजनरसं व्यङ्क्तुमत्रानुबन्धात्।। 433**

आवृत्यधिकरणम्। **124**

**सूत्रम् - आवृत्तिरसकृदुपदेशात्। 470. लिंगाच्च। 471.**

शुद्धैरुत्कृष्टधर्मैः सदनपचरणे ब्रह्मविद्या भवित्री-
त्युक्तं पूर्वाधिकारे विमृशति तु परं तत्स्वरूपं यथावत्।
प्रत्यक्षं  वा स्मृतिर्वा सकृदिदमसकृद्वेति नोक्तं पुरस्तात्
यावज्जीवानुवृत्तिप्रभृति च तदिहापौनरुक्त्यं सुबोधम्।।434

ज्ञानं मुक्तेरुपायः श्रुतिभिरभिहितस्तस्य संख्या तु नोक्ता
सौकर्यं स्यात् सकृत्वे तत इह तु भवेच्चारितार्थ्यं विधीनाम्।
सम्यक्त्वात् तद्ध्रुवत्वं न पुनरनुगमात् प्रोक्तमित्यप्यसारं
सामान्योक्तेर्विशेषे सति पशुनयतस्तत्रविश्रान्तिसिद्धेः।।435
किञ्चाग्नेय्यादिनीत्या विदिरिह वदति ध्यानशब्दार्थमेव
ध्याने चोपासनोक्तिः परभजनतया वक्ति सेवात्मकत्वम्।
ऐकार्थ्ये विद्युपास्योर्व्यतिकरिततया श्रूयते च प्रयोगः
कार्ये हेतौ च भक्तेःक्वचिदुपचरितो भक्तिभेदत्ववादः।।436

योगोद्युक्तेषु यः  स्यात् स्ववरणविषयस्तेन लभ्यः परात्मा
ग्राह्यत्वञ्च प्रियत्वात्  तदपि हि गुणतो भक्तिरेव श्रुतैवम्।
सा च प्रीत्यात्मिका  धीः क्वचिदतिशयिते स्मृत्यबाधोप्यतस्स्यात्
प्रोक्ता चैषा ध्रुवानुस्मृतिरनुवहनात् तैलधाराक्रमेण।। 437

रागादादौ प्रवृत्तिः श्रवणमननयोर्ध्यानमेकं विधेयं

तत्र द्रष्टव्यशब्दो विशदतमतया वक्ति वैशिष्ट्यमात्रम्।
शब्दोत्थं दर्शनं ये विषयमकथयन् वेदनोक्तेरमीषां
व्याघातादिप्रपञ्चः स्वयमिह निपुणैः सूक्ष्ममन्वेषणीयः।। 438

ध्याने वैशद्यमात्रादुपचरणवती दृष्टिशब्दप्रवृत्तिः
स्यात् तुल्यं तत् तवापि ह्यभिलपति धियं चक्षुषा भानशून्ये।
घ्राता स्प्रष्टेति शब्दः करणविरहिते मुख्यवृत्तो न हि स्यात्
तद्ग्राह्यस्त्वस्मदीयो बहुनयगुणवान् त्याज्य एव त्वदीयः।। 439

न द्वारद्वारिक्लृप्तिः कथमपि घटते विश्रमश्चेत् विशेषे
सामान्यात्मा विशेषैर्लघु च न गुरुभिःकर्तुरैक्ये विकल्प्यम्।
अर्थैक्ये दर्शनोक्त्या स्मृतिरुपचरिता युज्यते स्पाष्ट्यसिद्ध्यै
स्मृत्युक्त्या दर्शनस्योपचरणमसदित्यन्यदेतत् फलान्नः।। 440

कृच्छ्रादौ शक्तिहीनो दृढपरितपनः संयमार्हश्च कुर्यात्
सर्वार्थां केशवानुस्मृतिमिति घटते तद्विकल्पो यथार्हम्।
सामान्यात् सर्वदोषेष्वियमुपकुरुते सर्वनैमित्तिकानां
मुक्तेरप्यत्रमूलं मुनिरनुमनुते तादृशध्यानरूपाम्।।441

नन्वेवं ये मुकुन्दं शरणमुपगता वर्जिता ध्यानयोगैः
ते चातिक्रम्य मृत्युं यमिन इव परं धाम यान्तीत्युशन्ति।

**सत्यं तेपीति शब्दान्नियतविषययोर्गौरवे लाघवेपि**
**प्राप्तार्थं ध्यानशास्त्रं प्रणिधिसहदशायोगिभिर्योगविद्भिः।। 442**
**धर्मो वर्णादियोग्यः कलुषशमनतःसत्ववृद्ध्योपकारी**
**भक्तेः तद्वत् प्रपत्तिस्त्वगतिकसमयेष्वन्तरायापहन्त्री।**
**सानुक्रोशे हि शक्ते शरणवरणतः सर्वसाध्यं सुसाधं**
**मोक्षाकाङ्क्षी प्रपद्ये शरणमहमिति क्वापि मन्त्रे श्रुतञ्च।। 443**

<u>आत्मत्वोपासनाधिकरणम्। 125</u>

**<u>सूत्रम् - आत्मेति तूपगच्छन्ति ग्राहयन्ति च। 472.</u>**

**जीवादत्यन्तभिन्नः स विभुरभिदधे लक्षणैः साधनान्तैः**
**मुक्त्यर्थोपासनेस्मिन् मुषिततमसि न ब्रह्मदृष्ट्यादियुक्तिः।**
**तत्त्वज्ञे वीतरागे तदिह न घटते सोहमस्मीत्युपास्तिः**
**तन्न स्वात्मान्तरात्मन्यहमिति वचसोप्यत्र मुख्यप्रवृत्तेः।। 444**

**वस्विन्द्रादेरुपास्तौ प्रकृतिशबलितस्वान्वितेक्षा पुरोक्ता**
**शुद्धः स्वात्मा च चिन्त्यः क्वचिदिह तु विभुस्तादृशा स्वेन युक्तः।**
**व्यक्तिर्जीवेशभेदे व्यधिकरणपदैर्भावने स्यात् तथापि**
**ब्रह्माधीनस्वरूपप्रमितिसुदृढतासिद्धयेहङ्ग्रहोक्तिः।। 445**
**ऐक्योपास्तावहं त्वं त्वमहमिति मतिर्निर्विशेषे कथं स्यात्**

**भेदाभेदाभिलापः करकमणिक तद्व्योमनीत्या न मुख्यः।**
**मत्तुल्यस्त्वं त्वयाहं सम इति वदतां नोपचारोपि युक्तः**
**तस्मात्सर्वान्तरात्मन्ययमहमिति धीराकृतिन्यायसिद्धा।। 446**

**अद्वैतं द्वैतहानौ न भवति सुवचं तत्प्रतिद्वन्द्विकत्वात्**
**द्वैतञ्चाद्वैतगर्भं द्वितयमिह हि तत् स्वस्वरूपादभिन्नम्।**
**द्वैताद्वैतञ्च तादृक् तदुभयनियमानुज्झनादेव सिद्ध्येत्**
**सर्वं स्थाने स्थितं स्यात् प्रमितिपरवतां नेतरेषां तु किञ्चित्।।**
**447**

**नन्वद्वैते निषेध्यो गगनकुसुमवत् भ्रान्तिसिद्धोस्तु भेदः**
**मैवं सत्यादभिन्नः स यदि न खलु तद्भ्रान्तिसिद्धत्वसिद्धिः।**
**भिन्नत्वञ्चास्य तस्मात् यदि भवति मृषा विद्धि दत्तोत्तरं तत्**
**सत्यञ्चेत् सत्यभेदोपगतिरिति मुधा दूरतो धावनं वः।। 448**

<u>प्रतीकाधिकरणम्। 126</u>

**<u>सूत्रम् - न प्रतीके न हि सः। 473. ब्रह्मदृष्टिरुत्कर्षात्। 474.</u>**

**नामादि ब्रह्मदृष्टावपि तदहमिति प्रत्ययः पूर्ववत्स्यात्**
**ब्रह्मध्यानत्वसाम्यादिति यदि न न खल्वन्तरात्मा प्रतीकः।।**

**न ब्रह्मण्यन्यदृष्टिः कथमपि घटते तस्य सर्वाधिकत्वात्**
**अन्यस्मिन् ब्रह्मदृष्टौ परमिह नियतैर्लक्षणैस्तद्ग्रहोर्थ्यः।।449**

**आत्मन्यब्रह्मभूते भवतु फलवती कुत्रचिद्ब्रह्मदृष्टिः**
**नैषा वस्तुव्यवस्थां शिथिलयति नरे वैनतेयत्वधीवत्।**
**एतावन्मात्रमोहादिदमहमिति तु स्थापयन् क्षिप्रमृच्छेत्**
**इन्द्रत्वारोपदर्पोद्धतनहुषमहाभोगिसंस्थामवस्थाम्।।450**

<u>आदित्यादिमत्यधिकरणम्। 127</u>

**<u>आदित्यादिमतयश्चांगउपपत्तेः। 475.</u>**

**तादर्थ्यात् देवतानां फलकरणतया कर्मणश्चोदितत्वात्**
**आदित्यादौ निकृष्टात्मनि भवतु समुत्कृष्टकर्माङ्गदृष्टिः।**
**मैवं कर्म प्रधानं विहितमपि यतस्तत्समाराधनं तत्**
**तत्प्रीता देवतैव प्रदिशति फलमित्यर्थतः सा प्रधानम्।।451**

**अन्यस्मिन्नन्यदृष्टेर्विधिरिह घटतामन्यथाख्यातिपक्षे**
**याथार्थ्यं सर्वबोधानुगतमिति मते युज्यते नान्यदृष्टिः।**
**तन्नात्राद्ये हि न स्यात् विमतिः अविमता भ्रान्तिनीतिः परस्मिन्**

**तादृक्भेदाग्रहोपप्लुतमतियुगलस्थापनायां नियोगात्।।452**

**द्रष्टव्यापह्नवेन  भ्रमदनुघटिता दृष्टिरद्वैतमोहः**
**स्यादुत्कृष्टापराधस्तत इह विहिता तादृशत्वस्य दृष्टिः।**
**तादृग्दृष्टौ न दोषस्तत इति कतिचित् तार्क्ष्यदृष्ट्यादिनीत्या।**
**द्वेधान्यत्रान्यदृष्टिर्न किमनधिगता व्यक्तितो जातितश्च।।453**

**मुख्यं ब्रह्मैकमेवेत्यवहितमनसां ब्रह्मदृष्टिः कथं स्यात्**
**एकत्वेनेति केचिन्न हि बलिनि विधौ शङ्कनीयो विरोधः।**
**स्वेच्छापूर्वद्विचन्द्रभ्रमवदिह भिदाकल्पनामाहुरन्ये**
**बम्भ्रम्यन्ते  यथा च श्रुतिषु बहुविधं ब्रह्म भातीति बालाः।। 454**

<u>आसीनाधिकरणम्।128</u>

<u>**सूत्रम् -  आसीनस्संभवात्।  476.  ध्यानाच्च।  477. अचलत्वंचापेक्ष्य।  478.  स्मरन्ति च।  479.  यत्रैकाग्रता तत्राविशेषात्।  480.**</u>

**आसीनस्यैव योगः  श्रुतिषु न ददृशे ध्यानमाहुस्सदेति**
**न्यासश्चेलाजिनादेर्नियमविधिकृतः पाक्षिकासीनतायाम्।**

तस्मादेतत् घटेत स्थितिगतिशयनेष्वप्रकम्प्येन्द्रियस्ये-
त्यप्राप्तं यत्ननिद्रान्वयिनि कथमविच्छिन्नधीसन्ततिः स्यात्।।
455

चित्तैकाग्र्योपपत्त्यै विदधति नियतिं देशकालासनादेः
सच्छिद्रं त्वन्यदापि  क्षममिति सततं चिन्तनं संस्मरन्ति।

प्रत्यक्संस्कारभूम्ना परनिहितधियस्तादधीन्यादिबुद्ध्या
जुष्टं व्यासक्तनीत्या भवति हि समये योगिनः कर्म सर्वम्।। 456

कर्मोपास्त्यङ्गभूतं यदिह निगदितं तत्परे पूर्वपादे
योगेन ब्रह्मदृष्टिर्यदपि च परमो धर्म इत्युक्तमाप्तैः।
तेन प्राधान्यसिद्धावितरदनुगुणं तस्य नेयं तथा च
प्रायः प्रक्रान्तयोगे पटिमलघुतया कल्पितः कालयोगः।।457

विद्याङ्गं पूर्वमुक्तं किमिह पुनरसावासनाद्यङ्गवादः
दृष्टार्थांशं विभज्य प्रथयितुमपि  न प्राक् शमाद्यङ्गवादात्।
सत्यं ध्यानाख्यधारावहनमतिदशा त्वन्वहं साधनीया
चित्तैकाग्र्येण सर्वप्रयतनविरहे स्यादितीदं प्रकाश्यम्।।458

आप्रयणाधिकरणम्।129

**सूत्रम् - आप्रयणात्तत्रापि हि दृष्टम्। 481.**

**एकस्मिन्नेव घस्रे यदि भवति परध्यानरूपा तु भक्तिः**
**तद्विश्रान्तो विधिः स्यादुपरि तु विफला ब्रह्मचिन्तेत्ययुक्तम्।**
**छान्दोग्ये यावदायुः सुचरितमुदितं ब्रह्मलोकाप्तिहेतोः**
**तद्धि ध्यानस्य वृद्ध्यै तदपि च विहिते कुत्रचित् प्रायणान्तम्।।**
**459**

तदधिगमाधिकरणम्। 130

**सूत्रम् - तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्। 482.**

**नाभुक्तं कल्पबृन्दैरपि सुपरिहरं कर्म गीतं मुनीन्द्रैः**
**पापाश्लेषप्रणाशश्रुतिरपि परविद्वैभवोक्तिस्ततः स्यात्।**
**मेवं नाभुक्तमित्याद्यपि फलजनने कर्मणो दार्ढ्यमाह**
**प्रायश्चित्तक्रमेण त्विह परभजनं चोदितं कर्मशान्त्यै।। 460**

**निष्कृत्यात्मत्वमस्योदितदुरितसमुन्मूलनस्योपपन्नं**
**नात्र स्वर्गादिनीतिः प्रतिहतिविगमे धीविकासः स्वतो हि।**
**पापालेपः प्रमादोदितसहनमिति स्थाप्यमाज्ञानुवृत्त्यै**
**नो चेन्न स्यात् गतिर्नाविरत इति गिरो योगिनाञ्च प्रवृत्तेः।।461**

**अश्लेषः कर्मशक्तेरनुदय उदये तन्निवृत्तिर्विनाशः**
**शक्तिः सा च प्रणेतुः तदुचितफलकृन्निग्रहानुग्रहात्मा।**
**प्रायश्चित्तं निमित्ते कथमनुदित इत्यत्र नैवानुयोज्यं**
**नाधर्मस्तत्र तत्स्यादिति खलु हृदयं ग्राह्यमश्लेषवाचः।। 462**

**धीपूर्वं तूत्तराघं न सृजति परवित् सर्वदा सावधानः**
**जातं नैमित्तिकैश्च क्षिपति समुचितैराशु भुञ्जीत वा तत्।**
**वृत्रादौ दृष्टमेतत् नियतिविभवतश्चेदिराजादिसिद्धिः**
**युक्ताद्यैवान्यदा वा मुनिरिह मनुते ब्रह्मनिष्ठस्य मुक्तिम्।। 463**

<u>इतराधिकरणम्। 131</u>

**<u>सूत्रम् - इतरस्याप्येवमसंश्लेषः पाते तु। 483.</u>**

**धर्मस्याश्लेषनाशौ न हि परभजनानुग्रहेणोपपन्नौ**
**तस्याघत्वप्रसङ्गात् श्रुतिरपि च परं पापनिर्मुक्तिमाह।**

**भोगैस्तत्पुण्यनाशोस्त्विति यदि न यतः काम्यमप्यस्य पापं**
**तस्मिंस्तल्लक्ष्मसिद्धेः न सुकृतमिति च श्रूयते पाप्मतास्य।। 464**

**पुण्यं विद्यानुकूलं यदिह सफलता तस्य विद्याप्रदत्वात्**
**तस्यां यन्नोपयुक्तं तदपि दुरितवत् बन्धकत्वेन वार्यम्।**
**कारागारोपरुद्धे निगलयुगलतः सार्वभौमस्य भृत्ये**
**हैमं कार्ष्णायसञ्च प्रसदनसमये भञ्जनीयं सहैव।। 465**

**काम्यं नेच्छेत् विरक्तो यदि किल कुरुते रागयोगात् फले तत्**
**नाधीपूर्वञ्च काम्यं किमपि न च दिशेत् बन्धमज्ञातधर्मः।**
**विद्यार्थैर्लुप्यतेतः किमितरदिति चेन्नाधिकैःसान्तरायैः**
**अन्यार्थैर्मोहजैः क्वाप्यनुतपनवतो बन्धुजैश्चास्त्वलेपः।। 466**

<u>अनारब्धकार्याधिकरणम्। 132</u>

<u>**सूत्रम् - अनारब्धकार्ये एव तु पूर्वे तदवधेः। 484.**</u>

**नश्यत्वारब्धकार्यं परविदि दुरितं न ह्यधीतो विशेषः**
**सर्वे पाप्मान इत्यप्यभिहितमिति चेत् नोपलम्भादिबाधात्।**
**सद्विद्या तस्य तावच्चिरमिति च वदत्यस्मरन्श्चागमज्ञाः**
**जीवन्मुक्त्यादिशब्दोप्युपचरणपरो मोहितास्तेन मन्दाः।। 467**

**रोगाद्यारम्भकाणां प्रशमनविधयः सन्ति दानार्चनाद्याः**
**प्रत्येतुः स्वावताराद्यपि विभुरपुनर्जन्मतामप्यगायत्।**
**तस्मादारब्धकार्ये फलनियतिवचो दुर्घटं भाति मैवं**
**प्रयश्चित्तोज्झितानां ननु फलनियतिः सूत्रकाराद्यभीष्टा।। 468**

<u>अग्निहोत्राद्यधिकरणम्।133.</u>

**<u>सूत्रम् - अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्। 485.</u>**
**<u>अतोन्यापि ह्येकेषामुभयोः। 486. यदेव विद्ययेति हि।487.</u>**

**श्लेषश्चेदस्य पुण्यैः स तु भवति तदा बन्ध इत्यभ्युपेतं**
**यद्यश्लेषो भवेत् तैः परविदि विफला पुण्यनिष्ठा परस्तात्।**
**तस्मात् धर्मोप्यधर्मक्रमत इह परित्याज्य एवेत्ययुक्तं**
**न स्यात् बन्धाय विद्याङ्कुरमुपचिनुते ह्यग्निहोत्रादिधर्मः। 469**

**सर्वापेक्षेत्यवोचन्ननु परभजने कर्मणामङ्गभावं**
**भूयो वक्त्यग्निहोत्रेत्यपि तदिति मुधा ह्येकमत्रेति चेन्न।**
**विद्याया नैरपेक्ष्यात् तदपरिकरता शङ्किता प्रागपास्ता**
**श्लेषाभावप्रसक्ता त्विह पुनरिति तन्नीतिवैषम्यसिद्धेः।। 470**

इतरक्षपणाधिकरणम्। 134

**सूत्रम् - भोगेन त्वितरे क्षपयित्वाथ सम्पद्यते। 488.**

**निर्दिष्टास्माच्छरीरादिति नियतिरतो यावदित्यादिशब्दः**
**कर्म प्रारब्धकार्यं कथयति विदुषस्तच्छरीरान्तमेव।**
**मैवं प्रारब्धचैत्र्यान्न तदवधिविधौ व्याप्रियेतान्यपर्यात्**
**भूयो देहस्मृतेश्चान्तिमवपुषि दृढोद्यत्समाधेस्तु मोक्षः।। 471**
**नन्वत्रास्मादितीदं विथतमिह पदं स्याच्छरीरे न तु स्यात्**
**कारागारौपमित्यप्रथनपरतया तस्य साफल्यसिद्धेः।**
**त्याज्यत्वव्यक्तये हि प्रभुरसुखमिमं लोकमित्यप्यगायत्**
**भूतावासं विशिंषन् इममिति च मनुर्हेयभावं व्यनक्ति।। 472**

**सर्वे जीवाः समाना स्वत इह विविधं कर्म चानादि तुल्यं**
**वैषम्यादिश्च दोषो न भवति भगवत्यन्यथा शास्त्रभङ्गः।**
**मुक्तौ नातो विलम्बप्रभृति घटत इत्यल्पसारोनुयोगः**
**चित्रे कर्मप्रवाहे फलसमयभिदा ह्याश्रिता सर्वतन्त्रैः।। 473**

**आवर्त्या ब्रह्मविद्या त्वसकृत् अहमिति स्याच्च न स्यात् प्रतीके**
**कर्माङ्गेऽर्कादिदृष्टिः प्रणिधिरपि भवेत् सासनः प्रत्यहञ्च।**

**पापे पुण्ये च नाशादिकं अथ तु तयोर्भोग्यतारब्धकार्ये**
**कार्यत्वं स्वार्हवृत्तेरिति कथितमिहारब्धशान्तौ च मोक्षः।। 474**

**इति चतुर्थाध्याये प्रथमः पादः**

अथ चतुर्थाध्याये द्वितीयः पादः।

**नित्यत्वज्ञत्वपूर्वैर्निपुणमभिहितं जीवतत्त्वं द्वितीये**
**जागर्यादौ च खेदो जगदटविमहाजाङ्गिकस्याथ गीतः।**
**विद्यारम्भावसानावधि यदपि परं ध्यातुरर्थ्यं तदुक्तं**
**प्रारब्धस्यावसाने वपुरिह जहतो गत्युपक्रान्तिमाह।। 475.**

**वर्ण्यो वैराग्यपादे तनुकरणगणक्षोभ ईदृक् तथापि**
**ब्रह्मज्ञस्यापि काले भवति मृतिरिति ज्ञप्तयेत्रानुबन्धः।**
**तस्योत्क्रान्तौ विशेषं कथयितुमुचिता चात्र साधारणोक्तिः**
**मध्ये विद्याफलानां मरणमपि वदन् तत् प्रियं चिन्त्यमाह।। 476**
**वृत्तिर्वागादिकं वा क्वचन भजतु सम्पत्तिमन्यक्रमां वा**
**श्रुत्यैवोक्तक्रमां वा न हि फलमिह तच्चिन्तनस्येति चेन्न।**
**सम्पत्त्याम्नानमीदृक्क्रमनियतियुतं युज्यते न ह्यपार्थं**

**तस्मात् तच्चिन्तनं क्वाप्युपकुरुत इति स्थाप्यते तत्**
**यथार्हम्।।477**

**जीवं ये नित्यमुक्तं निजगदुरथवा जीवतो मुक्तिमाहुः**
**तत्तज्जल्पोपजापप्रचलितनिगमग्रामसंक्षोभशान्त्यै।**
**उक्त्वा  प्रारब्धकार्यं विदुषि च फलवत् प्रायणञ्चात्र तुल्यं**
**नाडीभेदप्रवेशप्रभृति समधिकं वक्ष्यति ब्रह्मगत्यै।।478**

**आयुस्सीमामनिष्टैरिह बहुभिरसावात्मनः प्रेक्ष्य योगी**
**यत् कुर्यात् यच्च पुत्रप्रभृतिषु न हि तत् तर्क्यमत्रेत्यनुक्तिः।**
**गीतादिष्वन्त्यकाले यदगणि तदपि प्राच्ययोगप्रकारे**
**तत्तत्प्राप्यानुरूपे नियतमिति यथा पूर्वधीरत्र भाव्या।। 479**

वागधिकरणम्। 135

**सूत्रम् - वाक् मनसि दर्शनाच्छब्दाच्च। 489. अत एवं सर्वाण्यणु। 490.**

**कर्मज्ञानाक्षवर्गो मनसि न विलयं यात्यतत्संभवत्वात्**
**तद्वृत्तेस्तादधीन्यात्  तदुपरतिमिह प्राह सम्पत्तिशब्दः।**

**इत्येतन्नोपपन्नं तदुभयविलये चोद्यनिस्तारसाम्यात्**
**सम्पत्तिः श्लेषमात्रं करणविषयवाक्छब्दमुख्यत्वसिद्ध्यै।। 480**

मनोधिकरणम्। 136

**सूत्रम् - तन्मनः प्राण उत्तरात्। 491.**

**अन्नस्योक्तं विकारो मन इति मनसः प्राणसम्पत्तिवाक्ये**
**प्राणस्याम्भोमयत्वात् प्रकृतिविकृतितासम्भवात् तल्लयोस्तु।**
**मैवं तत्तन्मयत्वश्रुतिरभिमनुते तत्तदाप्यायनं तैः**
**प्राग्वत् संश्लेषमात्रं तत इह हि मनः प्राण इत्यामनन्ति।। 481**

अध्यक्षाधिकरणम्। 137

**सूत्रम् - सोध्यक्षे तदुपगमादिभ्यः। 492.**

**प्राणः सैकादशाक्षस्तदनु निविशते तेजसीत्थं श्रुतत्वात्**
**मध्येन्यप्राप्तिक्लृप्तौ श्रुतिहतिरिति चेन्नात्मयोगस्य चोक्तेः।**

**प्राणस्य स्वाप्तजीवे मिलति निजतनोरुद्धृतैर्भूतसूक्ष्मैः**

**तेजःप्राप्तिश्च गङ्गानिपतितयमुनासागरप्राप्तिवत् स्यात्।।482**

भूताधिकरणम्। 138

**सूत्रम् - भूतेषु तच्छ्रुतेः। 193. नैकस्मिन् दर्शयतो हि। 194.**

**तेजस्येवास्तु युक्तः श्रिततनुभृत् अनस्तेजसीत्याद्यबाधात्**
**छत्रिन्यायोपि नास्मिन्निति यदि न तथान्यत्र भूतान्तरोक्तेः।**
**विश्वारम्भाय देवस्त्रिवृतमकृत च प्रागिमं भूतवर्गं**
**प्राचुर्यात् तत्तदेकव्यवहृतिरिति चासूत्रयत् पूर्वमेव।। 483**

आसृत्युपक्रमाधिकरणम्। 139

**सूत्रम् - समानाचासृत्युपक्रमादमृतत्वं चानुपोष्य। 495. तदापीतेस्संसारव्यपदेशात्। 496. सूक्ष्मं प्रमाणतश्च तथोपलब्धेः। 497. नोपमर्देनातः। 498. अस्यैव चोपपत्तेरूष्मा। 499. प्रतिषेधादिति चेन्न शरीरात्स्पष्टो ह्येकेषाम्। 500. स्मर्यते च। 501.**

**अत्रैव ब्रह्म विन्दत्यमृत इह भवत्यागमात् ब्रह्मनिष्ठः**

नोत्क्रान्तिस्तस्य युक्तेत्यसदुपनिषदो ह्यस्य गत्याद्युशन्ति।
नान्यप्राप्त्यर्थमेतत् सगुणसमधिके कुत्रचिन्मानहानेः
तस्मादत्रामृतत्वप्रभृतिवचनतस्तादृशी तद्दशोक्ता।। 484

निश्शेषं भोगहेतौ गलति परविदः कर्मणि प्रायणेथो
गत्यर्थं सूक्ष्मदेहानुगतिरणुतया निश्चितस्याफला स्यात्।
मार्गे संवादवादस्तदुचितवपुषा त्वस्त्वितीवानुयोगे
कृत्स्ना विद्या निवृत्तिः परपदगमनापेक्षिणीत्यादि वाच्यम्।। 485
कल्पादौ भूतसूक्ष्मप्रभृतिभिरुदितं वर्ष्म कल्पान्तनाश्यं
प्रत्येकं प्राणिभेदे नियतमनियतस्थूलदेहानुयायि।
लिङ्गाख्यं भस्त्रिकान्तःपरुवकवदवस्थायि सांख्यैः प्रगीतं
सूक्ष्मांशः पूर्वमूर्तेरुपरितनतनोर्बीजमत्रेष्यते तत्।।486

तत्त्वज्ञानेन बन्धः किल गलति पुरा नोत्क्रमेणेत्यसारं
माता वन्ध्येतिवद्धि स्ववचनविहतिर्जीवतो मुक्तिवादे।
मुक्तश्चेत् तत्त्वबोधात् तनुभृदिह तदा तत्परं नैष दुःख्येत्
मिथ्या दुःखं तदा चेत् कथय तव कदा तस्य
सत्यत्वमिष्टम्।।487

यं यं भावं स्मरन्तो जहति वपुरिदं देहिनो यान्ति तं तं
तस्मादुत्क्रान्तिसाम्यं न घटत इति चेत् तन्न तन्मात्रसाम्यात्।

**विद्याभेदादिनीत्या भवति विषमता ह्यन्तिमप्रत्ययादौ**
**किञ्चित्साधर्म्यवादे न च नियतिमती सर्वथा साम्यसिद्धिः।।488**

<u>परसम्पत्यधिकपणम्। 140</u>

**<u>सूत्रम् - तानि परे तथा ह्याह। 502.</u>**

**जीवोत्क्रान्त्युक्तिकाले विदुषि तु घटते तत्प्रतिक्षेपभङ्गः**
**भूतोत्क्रान्तेस्तु पश्चात् तदुपनिपतने सङ्गतिः स्यात् कथंचित्।**

**तस्मात् साधारणोपि ह्ययमुपरि ततः स्थाप्यते हार्दयोगः**
**तुल्येप्यस्मिन्नतुल्याः सरणिमुखतया प्राप्यभेदेन नाड्यः।।489**

**प्राप्तुं भोगापवर्गौ प्रयति तनुभृति प्राप्तसूक्ष्मस्वदेहे**
**सम्पत्त्या किं परस्यां श्रितहृदयसुषौ लभ्यते देवतायाम्।**
**आतस्तेजःपरस्यामिति चिरघटितेप्यस्तु सिद्धानुवादः**
**मैवं मानानुसारात् फलमिति परमे संक्रमः श्रान्तिसिद्ध्यै।। 490**

<u>अविभागाधिकरणम्। 141</u>

**<u>सूत्रम् - अविभागो वचनात्। 503.</u>**

**सम्पत्तिर्देवतायां भवतु लय इयं सा हि सर्वस्य योनिः**
**भूयः स्रष्टुं क्षमा चेत्यसदनुषजतो वाच्यवैरूप्यदोषात्।**
**विश्लेषो भूतसूक्ष्मैरिह न च घटते सृष्टिक्लृप्तिस्तु गुर्वी**
**प्रोक्ता धूमादिमार्गे गतिरपि भविनस्तत्परिष्वङ्गनेन।। 491**

<u>तदोकोधिकरणम्।142</u>

**<u>सूत्रम् - तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्</u>**
**<u>तच्छेषगत्यनुस्मृतियोगाच्च -</u>**
**<u>हार्दानुगृहीतश्शताधिकया। 504.</u>**

**नाडीजालेतिसूक्ष्मे न भवति सुशका मुक्तिनाडी विवेक्तुं**
**तस्मान्मूर्धन्यनाडीगतिरनियमतो मुच्यमानस्य पुंसः।**
**वाक्यं गन्तुस्तयोर्ध्वं प्रवददमृततां सम्भवादस्तु मैवं**
**विद्या सम्प्रीतहार्दप्रसदनमहसा स्वार्हनाडीप्रवेशात्।। 492**

**स्वाधीनो हार्दसंज्ञः स्वयमविकलया सम्पदा साकमेकः**
**स्थित्वा हृत्पद्ममध्ये स्थगितनिजतनुः सप्तलोकीगृहस्थः।**
**नाडीचक्रे सुषुम्नां निखिलधृतिकरीं नाभिमूर्धान्तरूपां**

**भित्वा तन्मध्यरन्ध्रप्रहितमिषुमिवोत्क्षिप्य नेता मुमुक्षुम्।। 493**

रश्म्यनुसार्यधिकरणम्। 143

**सूत्रम् - रश्म्यनुसारी । 505.**

**एतैरेवेति वाक्ये दिनकरकिरणालम्बनेनोर्ध्वयानं
यत्प्रोक्तं योगिनस्तत् दिनमृतिनियतं निश्चयुक्त्येति चेन्न।
अह्नि च्छायासु रात्रिष्वपि हि लघुतरा रश्मयः सन्ति लिङ्गात्
तापो वर्षादिरात्रौ न यदि हिमदिनन्यायतो नेयमेतत्।। 494**

निशाधिकरणम्। 144

**सूत्रम् - निशि नेति चेन्न सम्बन्धस्य
यावद्देहभावित्वात् दर्शयति च। 506.**

**सर्वेषामप्रशस्तं रजनिमरणमित्यह्नि योगी म्रियेत
प्रेयात् यद्येष रात्रौ न चरममरणं तत् भवेदित्ययुक्तम्।
कर्म प्रारब्धकार्यं ह्यनियतसमयं क्षीयते तावदेवे-
त्युक्तश्चास्मिन् विलम्बोऽहनि निशि च परं विद्यया
सोऽश्रुतेऽतः।। 495**

**यत्रैकस्यापवर्गः प्रतिनियततया गण्यते जातकज्ञैः**
**तत् स्यादन्त्यं  शरीरं ननु भवति ततोप्यन्ययोगव्युदासः।**
**न ह्यत्राप्यन्तकाले दिनरजनिभिदा देशभेदादि चैवं**
**शव्यं कुर्वन्ति यस्मिन् यदु च यदु च नेत्यादि चैवं विभाव्यम्।।**
**496**

<u>दक्षिणायनाधिकरणम्।  145</u>

**<u>सूत्रम् -  अतश्चायनेपि दक्षिणे।  507.  योगिन:  प्रति स्मर्यते स्मार्ते चैते।  508.</u>**

**देहं योगीश्वरोपि त्यजति यदि रवेर्दक्षिणावृत्तिकाले**
**विन्देत् सायुज्यमिन्दोः इह भवति पुनः तच्छ्रुतेस्तत्स्मृतेश्च।**

**मैवं पूर्वोक्तनीतिस्त्विह न हि  विहताथास्य सायुज्यमिन्दौ**
**विश्रान्त्यै सूर्यनीत्या जगदुपकृतये भीष्मकालप्रतीक्षा।।497**

**किञ्च प्रारब्धकर्म प्रतिनियतमिदं जाह्नवीसम्भवस्य**
**स्वेच्छा येनैवमासीत् स च वसुरभवत् नैष साक्षाद्विमुक्तः।**
**तस्मात् विन्देत मुक्तिं नरपितृदिविषत्  रात्रिकालेपि योगी**

**स्यातां प्राशस्त्यनिन्दे तदितरविषये गीतयोक्तौ तु मार्गौ।।498**

**सम्पद्येतान्यदक्षं मनसि तदपि तत्संयुतं प्राणवायौ**
**सोध्यक्षे तैस्समेतः स च तदखिलवान् भूतवर्गे तु सूक्ष्मे।**
**उत्क्रान्तिः स्यात् समाना युतिरथ च परे सा च संश्लेषमात्रं**
**निर्गच्छेत् ब्रह्मनाड्या घृणिभिरथ निशा देवरात्र्योश्च**
**मोक्षी।।499**

**इति चतुर्थाध्याये द्वतीयः पादः।**

अथ चतुर्थाध्याये तृतीयःपादः।

**निर्गत्य ब्रह्मरन्ध्रात् तपनकरमथालम्ब्य नाडीनिबद्धं**
**प्रत्युद्यद्देवबृन्दप्रहितबलिरसौ येन योगी प्रयाति।**

**मौकुन्दःस्थाप्यतेसौ परमिह मुनिना पञ्चभिर्न्यायभेदैः**
**मोहाकूपारपारं पुरमभिगमयन् मुक्तिघण्टापथो नः।। 500**

अर्चिराद्यधिकरणम्। 146

**सूत्रम् - अर्चिरादिना तत्प्रथितेः। 509.**

**शाखाभेदेषु भिन्नां गतिमुपनिषदोऽधीयते तन्मुमुक्षोः**
**विद्यावैषम्यनीत्या गतिरपि विषमा न व्यवस्थार्चिरादेः।**
**नैतत् सर्वत्र तैस्तैरिह तदिदमिति प्रत्यभिज्ञानसिद्धौ**
**भाव्यं न्यूनाधिकत्वप्रभृति निखिलमप्यत्र सिद्धाविरुद्धम्।।**
**501**

**चैद्यादीनामयोध्यास्थिरचरजनुषां पुण्डरीकादिकानां**
**भीष्मादीनामुपास्तिक्रमभवविभवव्यूहलोकस्थितानाम्।**
**धातॄणां तत्सुतानामधिकृतिविगमे ब्रह्म सम्प्रेप्सताम-**
**प्यन्येषां प्रस्थितिः सा शितपृथुमतिभिश्चिन्तनीया यथार्हम्।।**
**502**

वाय्वधिकरणम्। 147

**सूत्रम् - वायुमब्दादविशेषविशेषाभ्याम्। 510**

**सम्प्राप्तो देवलोको मरुदपि च समं वत्सरादित्यमध्ये**

**नैकत्वं रूढिभेदात् तत इह तु तयोस्तुल्यभावात् विकल्पः।**
**मैवं योयं प्रसिद्धः पवत इह मरुत् देवतानां गृहत्वं**
**तस्योक्तं धारकत्वात् तत उचितमिदं निर्विकल्पं तदैक्यम्।503**

वरुणाधिकरणम्। 148

**सूत्रम् - तटितोधि वरुणस्सम्बन्धात्। 511.**

**कौषीतक्यागमोक्ता वरुणशतमखौ सोपि नाथः प्रजानां**
**क्वापि स्थाप्या निपीड्य श्रुतिमपि विफला ह्यन्यथा तच्छ्रुतिः स्यात्।**
**तस्मात् ते वायुलोकात्परमनुपठनात् तत्र सन्त्वित्ययुक्तं**
**सम्बन्धाद्विद्युतोन्वग् वरुण इति परौ पाठतः तत्परौ स्तः।।504**
**यत्त्वस्यामानवस्य श्रुतमिह परसम्प्रापकत्वं भवेत् तत्**
**सद्वारत्वेप्यबाधं तदपि सहकृतौ तच्छ्रुतौचित्यभूमा।**
**यश्चोक्तो मानसाख्यस्तटित उपरि तु ब्रह्मलोकाप्तिहेतुः**
**तस्मान्नेता स नान्यो विदुरतिवहनं वैद्युतेनैव तस्मात्।। 505**

आतिवाहिकाधिकरणम्। 149

**सूत्रम् - आतिवाहिकास्तल्लिंगात्। 512. वैद्युतेनैव ततस्तच्छ्रुतेः। 513.**

**भोगस्थानान्यमूनि ज्वलनदिनमुखान्यध्वचिह्नानि वा स्युः**
**लोकोक्तिच्छाययैवं स्थितमिदमिति नासंभवात् कालशब्दे।**
**स्पष्टे नेतृत्वपुंस्त्वे क्वचित् अतिवहनं तद्वदन्यैश्च कार्यं**
**सन्दिग्धे वाक्यशेषात् गतिरिति**
**जगुरग्न्यादिवाचोभिमन्तॄन्।।506**

**यां श्रुत्वा धर्मसूनुर्न्यपतत् अभिपतेत् तां असौ तामसौघः**
**वर्गस्त्रैवर्गिकाणां पितृसरणिघटीयन्त्रचक्रे विघूर्णेत्।**
**वर्तन्येषार्चिरादिः श्रुतिभिरपुनरावर्तिनां संविभक्ता**
**तत्र ब्रूतेतिवोढॄंस्तदितरवत् अहःपक्षमासादिशब्दः।।507**

**पूर्वं धूमादिमार्गे सुकृतिषु कथिता चन्द्रमःप्राप्तिरुक्ता**
**सायुज्यं न्यासविद्याप्रकरणपठितं चान्द्रमन्यादृगुक्तम्।**
**अन्यत्रार्चिर्मुखानामतिवहनकृतामष्टमस्याप्तिरिन्दोः**
**इत्थं सुस्था व्यवस्था प्रणिहितहृदयैरेवमन्यच्च सूहम्।। 508**

भूलोकेशाग्निपूर्वान्  कतिचन भविनः केपि मन्यन्त एतान्
शब्दैक्ये ह्यत्र गुर्वी भवति तदभिमन्त्वन्तराणां प्रक्लृप्तिः।
अन्ये चामानवस्य स्वपदगतपरब्रह्मनेतृत्वदृष्ट्या
नित्यत्वात् तद्वदेतान्निजगदुरखिलान्नित्यवैकुण्ठभृत्यान्।। 509

कार्याधिकरणम्। 150

सूत्रम् - कार्यं बादरिरस्य गत्युपपत्तेः। 514.
विशेषितत्वाच्च। 515. सामीप्यात्तु तद्व्यपदेशः। 516.
कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्। 517.
स्मृतेश्च। 518. परं जैमिनिर्मुख्यत्वात्। 519. दर्शनाच्च।
520. न च कार्ये प्रत्यभिसन्धिः। 521.
अप्रतीकालंबनान्नयतीति बादरायण उभयथा च
दोषात्तत्क्रतुश्च। 522. विशेषञ्च दर्शयति। 523.

वैधात्रस्थाननेतॄन् समकथयदिमान् बादरिस्तादृशानां
गत्यौचित्यं तदा स्यात् न खलु विभुजुषामत्र वेद्यं न लभ्यम्।
सामीप्यात् ब्रह्म चोक्तः सरसिजवसतिः तेन सार्धञ्च मुक्तिः
युक्तेत्येतन्न नानाश्रुतिपठितपरस्थानगत्याद्यबाधात्।।510
मार्गोसावर्चिरादिर्गमयति परमं धाम गत्यादियोगात्

ब्रह्मोक्तेर्मुख्यभावादिति तु निरणयज्जैमिनिर्युक्तमेतत्।
वक्तव्यं त्वत्र किञ्चित् नयति परविदः स्वान्वितब्रह्मनिष्ठान्
तद्देहस्वात्मनिष्ठानपि मुखभिदयामी च सम्पूर्णनिष्ठाः।।511

ध्यायेयुर्ये च जीवान् प्रकृतिशबलितान् केवलान् वा यथेष्टं
द्वेधापि ब्रह्मदृष्ट्या जडनिवहमपि स्वेन यद्वान्यदृष्ट्या।
ते सर्वे हि प्रतीकप्रणिहितमनसो नार्चिराद्यध्वयोग्याः
ब्रह्मोपास्तेश्च लिङ्गं गतिरियमनघा सूत्रिता पूर्वमेव।। 512

प्रत्यापत्तिप्रकारः प्रतिनियतिमती कर्मयोगादिनिष्ठा
विद्याभेदाधिकारः परभजनबलान्मुक्तिविघ्नोपशान्तिः।
अन्त्यावस्थाव्यवस्था पृथगयनगतौ विश्रमाप्तिर्विभक्ता
साक्षान्मुक्तिः क्रमाद्वेत्यखिलमगतिकैरप्रणोद्यं परैश्च।।513

पन्थानं देवयानं तमिममधिगतः पश्चिमे देहपाते
तत्त्वस्तोमांस्तमोन्तान्  अतिपतति तरत्यापगां तत्र दिव्याम्।
दिव्यं देहादि लब्ध्वा जनिलयरहितं याति विष्णोः पदं तत्
पर्यङ्कारोहणान्तां भजति बहुमतिं ब्रह्मसंवादधन्यः।।514

संघाते नित्यता न क्वचिदपि न पृथिव्यादिभावस्तथात्वे
पर्यङ्काद्यैर्न साध्यं किमपि भगवतः पूर्णनिस्सीमशक्तेः।

**व्याप्तप्राप्त्यर्थमूर्ध्वं गतिरपि विफलेत्यादिकान् हैतुकानां**
**क्षोदिष्ठक्षीबजल्पान् श्रुतिरुपशमयेत् अद्भुतार्थस्वतन्त्रा।।515**

**भावोभावश्च यत्रानुपधि समुदितौ तत्र भावी विरोधः**
**प्रज्ञातव्याप्तिरोधेप्यधिकनिजबलान्मानतः स्वार्थसिद्धिः।**
**दृष्टं सर्वेष्टमेतन्न यदि न हि भवेत् मानमध्यक्षतोन्यत्**
**बाधोध्यक्षे मिथो वा वटदलशयनाद्यद्भुतं चैवमूह्यम्।।516**

**एकत्वं ब्रह्मविद्यापरिषदि सुपथोधीयमानस्य तस्मिन्**
**वायौ स्यात् देवलोकश्रुतिरपि वरुणाद्यन्वयो विद्युतोधि।**
**नेतारोऽमानवान्ताः परपदगमने तद्विदां सोयमध्वा**
**तुर्याध्यायस्य पादे सृतिरधिकरणैरित्थमुक्ता तृतीये।।517**

**इति चतुर्थाध्याये तृतीयः पादः**

## अथ चतुर्थाध्याये चतुर्थः पादः

**उक्तं पादैरघानामिति पृथुवपुषः सूक्ष्ममूर्तेश्च हानं**
**निर्धूतोपाधिराशेर्निरुपधिकमहानन्दमन्त्येन वक्ति।**
**स्वाविर्भावोत्र चिन्त्यस्त्रिभिरधिकरणैश्छन्दवृत्तिस्त्रिभिश्चे-**

**त्येवं द्वे पेटिके स्तः स्वत उभयमिदं नोपधेर्नार्थनिघ्नम्।। 518**

<u>सम्पद्याविर्भावाधिकरणम्। 151</u>

**<u>सूत्रम् - सम्पद्याविर्भावस्स्वेन शब्दात्। 524. मुक्तः प्रतिज्ञानात्। 525. आत्मा प्रकरणात्। 526.</u>**

**अश्रान्तस्वप्रकाशं यदिदमहमिति प्रत्यगात्मस्वरूपं
तस्याविर्भावसिद्धौ न तु किमपि फलं स्यात् सुषुप्ताविशेषात्।
तस्मान्मुक्तः स्वमन्यद्व्रजति वपुरसौ देववत् रूपशब्दात्
नैवं स्वेनेति शब्दोह्यफल इह भवेत् रूपवाचार्थसिद्धेः।। 519**

**नित्यस्वात्मस्वरूपस्थितिरियमभिनिष्पत्तिरित्यूचिवांसः
तन्मात्रं स्यान्न विद्याफलमिति न विदुर्नित्यसिद्धं त्वसाध्यम्।
सिद्धं साध्यानुवेधादपि भवति फलं सा त्वविद्यादिभङ्गः
यद्वा सिद्धस्य वित्तिस्तदिह न विहतं मुक्त इत्यादि सूत्रम्।। 520**

**स्वाकारान्नित्यभातादधिकसुखतया भाति जीवस्तदानीं
सिद्धाविर्भावमात्रेप्यनुविदुरभिनिष्पत्तिवाचः प्रयोगम्।**

**सङ्कोचात्यन्तहानिर्धिय इयमभिनिष्पत्तिरागन्तुरुक्ता
निष्प्रत्यूहस्वरूपोपधिकमपि तदा स्वेनशब्दः प्रवक्ति।। 521**

**प्रायः स्वस्मिन् स्वदेहिन्यनघगुणनिधौ तद्विभूतिद्वये वा**
**दृष्टं यत्स्यात् समाधौ भवति पृषतवत् तद्धि मुक्तानुभूतेः।**
**कृत्स्नं तत् शर्करौघव्यतिकरितसुधासिन्धुवत् स्वादुभूतं**
**तस्मात्स्वात्मप्रकाशे न फलमिति वदन् कूपकूर्मो घृणार्हः।। 522**

**मल्ली शुद्धं प्रसूनं जनयति समये रञ्जकोपाधिमुक्ते**
**तद्वन्नाथानुकम्पा फलमुपशमितावग्रहं सूरितुल्यम्।**
**तस्मादागन्तुकेपि प्रतिहतिविरहात् तादृशे धीविकासे**
**प्रत्यापन्नस्वदायक्रम इह कथितः प्राप्तिसिद्धेः प्रतीचः।। 523**

**अर्वाञ्चो मुक्तिभेदं कतिचिदगणयन्स्वात्ममात्रानुभूतिं**
**तत्र ब्रह्मानुभूतेर्विहतिरुपधितः स्यात् स्वतो वेति चिन्त्यम्।**
**सन्ति द्वेधापि दोषास्तत उपचरणान्मुक्तिशब्दोत्र युक्तः**
**सालोक्यादिप्रभेदेष्वपि सरणिरियं सावधानैर्विभाव्या।। 524**

<u>अविभागेनदृष्टत्वाधिकरणम्। 152</u>

<u>**सूत्रम् - अविभागेन दृष्टत्वात्। 527.**</u>

**जीवेशौ नित्यभिन्नौ श्रुतिरिह च सहेत्याह मुक्तस्य भोगं**

**साम्ये पारम्यमुक्तं स्मृतमपि स पृथग्भातु तस्मात् परस्मात्।**
**मैवं तत्त्वं हि मुक्तौ स्फुरति तदनयोर्भेदभानांश इष्टः**
**सिद्धे देहात्मभावे त्विह न हि घटते तत्स्वनिष्ठत्वदृष्टिः।। 525**

**मन्त्रोक्तं भोक्तृभावे यदि सहभवनं ब्रह्म न स्यात् प्रधानं**
**तस्मात् तत् भोग्यभावे भवतु तदुचितं ब्राह्मणव्याकृतेश्च।**
**द्वेधापि ब्रह्मतत्वात् पृथगितर इह स्यादितीदञ्च वार्तं**
**सिद्धे भेदे स्वनिष्ठस्थितिपरिहरणं ह्यत्र सूत्रोपपाद्यम्।।526**

**पारम्यं यच्च साम्ये श्रुतमिह न हि तत् सर्वथेत्यप्यधीतं**
**ग्राव्णो हेम्नश्च यद्वत् समधरणधृतौ स्यात् तदुक्तिस्तथात्र।**
**एवं तद्देहभावे स्थितवति विविधाबाधिताम्नायभूम्ना**
**ब्रह्मैवेत्यादिवाक्यं प्रथयति समतां तादृगित्यप्यधीतेः।। 527**

<u>ब्राह्माधिकरणम्। 153</u>

<u>**सूत्रम् - ब्राह्मेण जैमिनिरुपन्यासादिभ्यः। 528. चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः। 529. एवमुपन्यासात् पूर्वभावादविरोधं बादरायणः। 530.**</u>

**ज्ञानत्वे किं फलं स्यादिति मिषतु गुणैस्तादृशं ब्रह्मसाम्यं**

**किं धर्मैरस्वरूपैः तदिह भवतु चिन्मात्ररूपप्रकाशः।**
**इत्थं छात्रोक्तपक्षद्वयमुभयविधश्रुत्युपात्तात् विरोधात्**
**निर्धूयाथ द्विधाविर्भवनमघटयत् सिद्धतत्त्वप्रकाशात्।। 528**

**पर्यायौ नामपाठेष्वनुपरिपठितौ मुक्तिकैवल्यशब्दौ**
**कैवल्यञ्चान्ययोगत्यजनमिति कथं धर्मिधर्मान्वयोस्य।**
**मैवं ब्रह्मस्वरूपादपरमिह न खल्वस्ति किञ्चित् स्वनिष्ठं**
**न द्रव्यञ्चागुणं स्यात् अधिकरणयुगं तन्निरातङ्कमेतत्।। 529**

<u>संकल्पाधिकरणम्। 154</u>

**<u>सूत्रम् - संकल्पादेव तच्छ्रुतेः। 531. अत एव चानन्याधिपतिः। 532.</u>**

**धात्रादेरप्यपेक्ष्यो ह्युपकरणगणः सत्यसङ्कल्पवृत्तेः**
**मुक्तस्याप्येवमेवास्त्विति यदि वितथं तत् विकल्पासहत्वात्।**
**इष्टा द्रव्याद्यपेक्षा सुकृततदितरापेक्षणं तत्र दुःस्थं**
**न स्यादिच्छाविघातस्त्वनुपधिकतया देववाञ्छैकरस्यात्।। 530**

**विश्वस्यैतस्य जन्मस्थितिलयरचना विश्वकर्तुर्यथा स्यात्**
**इच्छासन्तानभेदान्नियतिरिह तथा नित्यमुक्तक्रियाणाम्।**
**तस्यानुच्छेदवृत्या प्रतिकलभिदुरास्ताश्च तादृक्प्रवाहाः**
**तद्बुद्धेरापरोक्ष्यं त्वनिशमभिदुरं  वर्तते ब्रह्मधीवत्।। 531**

**प्रत्यूहार्हाः प्रजेशप्रभृतिसुकृतिनः सत्यसङ्कल्पभावे**
**मर्त्यारम्भस्पृहादौ तदितरविविधप्राणिसृष्ट्यादिदृष्टेः।**
**तेनेच्छासन्ततीनां सफलविफलते पुण्यपापैरमीषां**
**मुक्तस्योक्ता चिकीर्षा त्ववहितविषया तारतम्यं न दोषः।।532**

**सूत्रे मुक्तोप्यनन्याधिपतिरभिहितस्तेन कस्तस्य शेषी**
**श्रुत्यैवोक्तः स्वराडित्यपि विहतिरतः प्राक्प्रतिष्ठापितानाम्।**
**मैवं नाथेतरान् प्रत्यघविहित इह क्षिप्यते शेषभावः**
**विश्वस्यात्मेश्वरो यः पतिरिति पठितस्तत्पतित्वं त्वबाध्यम्।। 533**

<u>अभावाधिकरणम्।  155</u>

**<u>सूत्रम् -  अभावं बादरिराह ह्येवम्।  533.  भावं जैमिनिर्विकल्पामननात्।  534.  द्वादशाहवदुभयविधं बादरायणोतः।  535. तन्वभावे सन्ध्यवदुपपत्तेः।  536.  भावे</u>**

जाग्रद्वत्। 537 प्रदीपवदावेशस्तथा हि दर्शयति। 538.
स्वाप्ययसम्पत्योरन्यतरापेक्षमाविष्कृतं हि। 539

मुक्तः प्रोक्तोऽशरीरः क्वचिदथ बहुधासंभवः क्वाप्यधीतः
गानक्रीडादि चोक्तं तदनुगुणमतद्वन्द्वमार्षं निरस्यन्।

स्वच्छन्दस्योभयं तत् क्षममिति वदति स्वं मतं सूत्रकारः
स्याच्चाकर्मोद्भवं तन्निखिलमपि परब्रह्मवत् तत्समस्य।। 534

मोक्षे पुण्याद्यभावात् तदुपधिकवपुर्वर्जितत्वं न दूष्यं
तस्मिन् दुःखार्हदेहत्यजि च शुभवपुस्सत्वपक्षोप्यबाध्यः।
इत्थं सत्यत्र मुक्तस्थितिरिह मुनिना कीदृशी सूत्रिता स्यात्
नैवं स्वच्छन्ददेहग्रहतदनियमस्थापनेऽत्राभिसन्धेः।। 535

नाना देहा यदि स्युर्युगपदधिगतब्रह्मसाम्यस्य पुंसः
तेषां व्याप्तस्वरूपान्वय उचित इति प्राक्तनाणुत्वहानम्।
नैतत् धीव्याप्तिसिद्धेः भवति च जगदावेशवाक् तन्निदाना
सौभर्यादौ प्रक्लृप्तां गतिमपवदितुं न क्षमं ब्रह्मसाम्यम्।। 536

देहानां यौगपद्ये बहुषु कथमणुर्धारकोस्त्वेष मुक्तः
चैतन्यद्वारतश्चेत् सकलमपि सदा धारयेत् व्याप्तबोधः।
मैवं मुक्तस्य शक्तिर्नियमितविषया त्विच्छया सर्वशक्तेः
प्राक् तादृग्योगशक्त्या बहुतनुभजने कर्मबन्धोप्यपेक्ष्यः।। 537
शक्तिः क्षेत्रज्ञसंज्ञामुनिभिरभिदधे वेष्टिता कर्मभिः स्वैः
पुंसोऽनंशापि बुद्धिर्बहुविधविकृतिः स्वीकृतैवं स चास्तु।
वालाग्रेत्यादिवाक्यात् तदयमणुरपि स्यादनन्तोपि मुक्तः
न स्यात् जैनादिभङ्गे परिहृतविकृतेरैकरूप्यानपायात्।. 538

जीवस्यैकैकशो हि त्यजनत उदितो वृक्षशाखासु शोषः
तस्मादद्वारकं स्यादपगतवरणे मुख्यमानन्त्यमस्मिन्।
मैवं शाखासु भोगाश्रयनियतिकरोपाधिनाशः प्रहाणं
क्षेत्रादिन्यायतोसावभिमतिविरहात् स्यादधीतो जहातिः।।539

एको नैकः परस्मात्पृथगपृथगपि स्वस्वरूपेण मुक्तः
स्वाभीष्टाशेषभोक्ता स्वयमिति पृथुकक्षीबवद्ये भ्रमन्ति।
तेन्वीक्ष्य स्वोक्तिबाधं श्रुतिशतविहतिं तत्तदुक्त्यान्यपर्यं
जैनावष्टम्भदृप्यन्मतिकलहमुचः सत्पथं संश्रयन्तु।। 540

सर्वं सङ्कल्पमात्राल्लभत इति समाम्नायते सूत्रितञ्च
स्वेच्छातो देहयोगाद्यनियतिकथनं स्यादतः पिष्टपेषः।

**तन्नान्योन्योपरुद्धश्रुतिगतिनियतिः कामतोनेकदेह-**
**स्वीकारप्रक्रियेत्याद्यनियतिकथने सूत्रकाराभिसन्धिः।.।541**

जगद्व्यापारवर्जाधिकरणम्। 156.

**सूत्रम् - जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च। 540. प्रत्यक्षोपदेशान्नेति चेन्न आधिकारिकमण्डलस्थोक्तेः। 541. विकारवर्ति च तथाहि स्थितिमाह। 542. दर्शयतश्चैवं प्रत्यक्षानुमाने। 543. भोगमात्रसाम्यलिंगाच्च। 544. अनावृत्तिश्शब्दादनावृत्तिश्शब्दात्।।। 545.**

**यद्यप्युक्तो विमुक्तः परतनुरपृथक्सिद्ध इत्यत्र पूर्वं**
**व्यापारांशे तथापि श्रुतमिह परमं साम्यमक्षोभणीयम्।**
**संकल्पादेव सर्वोत्थितिरपि हि ततः स्यादिति प्रत्यवस्थां**
**कृन्तत्यन्येधिकारे कृतिमदितरयोः स्थापयन् भोगसाम्यम्।।542**

**सायुज्यं भोगसाम्यं समगणि निपुणैः शब्दशक्त्याद्यबाधात्**
**तच्च व्यापारसाम्ये त्वसति न घटते स्वक्रियास्वादहानेः।**
**तस्मान्मुक्तस्य सृष्टिप्रभृतिरपि जगद्व्यापृतिर्ब्रह्मतुल्या**

मैवं तल्लक्षणं सा कथमनुगमतस्तस्य चान्यस्य च स्यात्।।543

कथ्यन्ते सृष्टिवाक्ये क्वचिदपि न जगत्कारणत्वेन मुक्ताः
प्राधीतः कामचारो भवतु न जगदारम्भकत्वं ततः स्यात्।
सर्वाकारोपभोग्येश्वरविषयधियस्साम्यतो भोगसाम्यं
युज्येतानन्दवल्ल्यां  समगणि विभुनानन्दमात्रे समत्वम्।।544

निष्कामश्रोत्रियस्याप्यतिदिशति सुखं मानुषानन्दतुल्यं
सानन्दान् वक्तुकामा शतगुणमधिकान् आविरिञ्चं क्रमेण।
तत्तद्भोगात् त्वदिष्टं कथमिदमपरं कष्टमिष्टं च मुक्ते
नित्यानन्दे मुकुन्दप्रियजनसदृशे ह्येकदेशानुवादः।।545

आनन्दानन्त्यमाह  श्रुतिरिह हि यतो वाच इत्यादिकास्याः
विश्रान्तिः श्रान्तिमात्रादिति च निगदितं यामुनाचार्यवर्यैः।
न ह्यानन्दोन्मितिः  स्यात् विधिशतवचनेप्यस्य यष्ट्या नभोवत्
तच्चोक्तं भूभृदण्वोरुदधिपतितयोर्मज्जने को विशेषः।।546

विश्वं मुक्तस्य देहो  न खलु तदपृथक्सिद्ध्यभावोपलम्भात्
नोपादानं ततोसौ कथयितुमुचितः सर्वशक्तित्वहानेः।
नात्माशक्यं चिकीर्षेत् तदितरविषये निर्विघाता तदिच्छा
व्यापारे भिद्यमानेप्यविषमरसता दृश्यते क्वापि लोके।।547

तत्तत्सेवाविशेषस्थिरपरिणमितः सार्वभौमप्रसादः
सूते भृत्यस्य साम्यं स्वयमनभिमतस्वामिचिह्नैकवर्जम्।
एवं देवं दयालुं शरणमुपगतैर्लभ्यतेऽनन्यलभ्या
निर्धूतावृत्तिशङ्का निरुपधिकरसा सव्यवस्था त्ववस्था।। 548

अत्राहुः सूत्रमन्त्यं पृथगधिकरणं केचिदाञ्जस्यलाभात्
अस्त्यावृत्तेर्निषेध्ये त्विममिति हि पदं तेन शङ्कोत्थितेति।
भाष्यादौ तन्त्र दृष्टं भवति च सुगमं पूर्वशेषत्वमस्य
स्यादावृत्तिप्रसङ्गादपि निखिलजगन्निर्मितौ साम्यशङ्का।।549

सर्गाद्यावर्तलीलारससहचरिते दण्डरासे नियुक्तं
जीवं देवो विमुच्य  क्रमत इति सयुग्भावधन्यं भुनक्ति।

कर्मात्यन्तोपशान्तेः इह न  च पुनरावर्तयत्येनं इत्य-
प्याम्नातेः कर्ममूलक्षयफलकथनाद्युत्थशङ्कोपशान्तिः।।550

स्वाविर्भावोपवर्गे निरुपधिनियतस्वप्रकार्यन्तदृष्टिः
चिद्रूपस्यैव तद्वच्छ्रुतिमकुटमितैः स्वप्रकारैः सहेक्षा।
सङ्कल्पादेव सिद्धिः तनुषु च नियमोन्मुक्तता ब्रह्मसाम्य-

प्राप्तौ तल्लक्षणांशोज्झनमिति  चरमाध्यायतुर्याङ्घ्रिसारः।।
551

ध्यानादिं तत्प्रभावं करणभृत इतो देहकाराकुटीरात्
निष्क्रान्तिं ब्रह्मनाड्या गतिमपि सुपथा स्वप्रकाशञ्च साध्यम्।
इच्छातः स्वेष्टसृष्टिं परममपि परब्रह्मणा भोगमात्रे
साम्यं मायामतस्थः कथमिव घटयेत् अन्तिमाध्यायसारम्। 552

मानामानप्रभेदप्रभृतिविभजनादादिमे कर्मभागे
नाना वा देवतेत्याद्यनुपदपठनान्मध्यमे देवतांशे।
भागेस्मिन्  भेदधर्मप्रभृतिकथनतः सौगतादेश्च भङ्गात्
मीमांसायां त्रिकाण्ड्यां क्वचिदपि न मृषावादगन्धावकाशः।।
553

त्रय्यन्तोदन्वदन्तस्सृतिरियमुदिता देशिकैः कर्णधारैः
मुक्त्यर्थज्ञानपारं गमयति विशदं त्वन्यदीक्ष्यं विमुक्तौ।
कर्तव्ये कल्पकारैः क्वचिदभिदधिरे कृत्यसन्देहभेदाः
तत्त्वेप्येवं क्वचित् स्यात् तदपि न वितथा स्वोपयुक्तांशबोधः।।
554

श्रुत्यन्तैकान्ततर्कक्रमगरिमधृतौ तूलवच्छैलवर्गः

तत्सिद्धब्रह्मबोधद्युमणिरुचि तमस्तोमकल्पोन्यकल्पः।
मोक्षोपायैकराज्ये तदितरविधयः किङ्करत्वं भजन्ते
मुक्तानन्दामृतैकोदधिपृषतकणस्पर्धिनोन्ये पुमर्थाः।।555

पारावर्यं विविच्य प्रथममवितथैरागमैस्तत्त्ववर्गे
संसारे तीव्रभीतिः परसमधिगमे तीव्रनिष्पन्नरागः।
कश्चित् विद्याविशेषं सपरिकरमधिष्ठाय शान्तान्तरायः
सम्पद्य ब्रह्म भुङ्क्ते निरुपधिकमनावृत्तिरित्थं श्रुतार्थः।। 556

सासौ सासूयतत्तत्कुमतिमतसमुन्मूलनी मूलनीति-
श्रेणीनिश्श्रेणिकल्पा त्रियुगपथरथारोहसूतं सुवीत।
सन्तस्सन्तापवर्गप्रशमनपटुना तत्त्वबोधेन सन्तं
सन्तोषं ब्रह्मसूत्राधिकरणचरणाध्यायसारावलिर्वः।।557

षट्पञ्चाशच्छतञ्चेत्यधिकरणगणैर्व्यक्तसीमाविभागे
काण्डेस्मिन् अस्मदुक्तं कतिचिदनुविदुः क्षेपधन्यैः किमन्यैः।
पश्यन्तो विश्वमेतत् त्रिगुणगुणनिकायन्त्रितस्वान्तनिघ्नं
नाथे नस्साक्षिभूते न वयमिह मुधा कुर्महे नर्महेलाम्।।558

विश्वं द्रव्यादिभेदात् विशदमभिहितं तत्त्वमुक्ताकलापे
व्यूढं शारीरकस्य त्विह दृढघटितं रूपमापादचूडम्।

तस्मादस्मच्छ्रुताब्धेरमृतमिव समुद्वान्तमश्रान्तबद्ध-
श्रद्धैरन्योन्यहस्तप्रदमिदमुभयं धार्यमाचार्यवद्भिः।।559

इत्थं शारीरकोक्ते पथिसमुपनताः स्रग्धराः श्रद्दधानं
पारे मायापयोधेः प्रहितमभिमुखैः सूरिभिः शुद्धभावैः
ब्रह्मालङ्कारकल्पैर्बहुभिरुपनिषत्सूत्रतात्पर्यशिल्पैः
देवार्हत्वाय दिव्याप्सरस इव परिष्कृत्य सम्भावयन्ति।।560

प्रज्ञा धम्मिल्लमल्लीपरिमलमिलितप्राज्ञसेवासमुद्य-
च्छुद्धालोकोज्ज्वलं मां श्रुतिपरिषदुपस्कारिसौभाग्यवद्भिः।
पद्यैरेतैः स्वहृद्यैः प्रणवमहिमवत्पाञ्चजन्यक्रमेण
स्वाध्मातं रङ्गनाथः स्वयमिति मुखरीकृत्य सम्मोदते स्म।। 561

पाराशर्यः प्रभूतादुपनिषदमृतोदन्वतः सारभूतं
निर्मथ्यादत्त सूत्रैरवितथनिगमाचार्यनामा मुनीन्द्रः।
यत्तन्निष्कृष्टमित्थं यतिपतिहृदयारूढमारूढतार्क्ष्यः
तद्वक्ता वाजिवक्त्रः सह मम गुरुभिर्वादिहंसाम्बुवाहैः।।562

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः।।

**अंशत्वं, 98**

**अक्षाणां, 107**

**अक्षाद्यव्यक्तनिष्ठं, 53**

**अक्षाद्युत्पत्यनूक्तौ, 101**

**अक्ष्यादित्योपलक्ष्ये, 137**

**अख्यातिस्त्वन्यथाधीः, 81**

**अग्र्यादावण्डमध्यस्थितिमति, 106**

**अग्रे संवर्तनं, 60**

**अग्रे सत्तामृषीणां, 102**

**अङ्गं पूर्वप्रसक्तेष्टकचित, 149**

अङ्गुल्या निर्दिशन्तः, **15**

**अज्ञातब्रह्मतत्त्वः, 132**

अत्ता खल्वोदनादेर्भवभृदिति, **34**

अत्राकाशस्त्वशेष, **28**

अत्रायोगान्ययोग, **31**

**अत्राहुः सूत्रमन्त्यं, 216**

**अत्रैव ब्रह्म, 192**

**अद्वैतं, 177**

**अध्यक्षो, 126**

अन्तर्यामी सजीवो, **36**

**अन्नस्योक्तं, 190**

**अन्यस्मिन्नन्यदृष्टेर्विधिरिह, 179**

अन्यस्मिन्नन्यदृष्ट्या न भवति विदुषां, **38**

**अन्यस्याधिक्यवादे, 125**

अन्यार्थो ह्यर्थवादः, **21**

अन्वारुह्यात्र भेदं, **33**

अर्भकौकस्त्वात्तद्व्यपदेशाच्च, **33**

**अर्वाञ्चो मुक्तिभेदं, 207**

**अव्यक्तादीन्, 73**

**अश्रान्तस्वप्रकाशंयदिदमहमिति, 206**

**अश्लिष्टं, 115**

**अश्लेषः, 183**
**अष्टावत्राधिकाराः, 101**
**अस्त्वन्यत्रान्तरायः, 169**
अस्पष्टस्पष्टरूप, **32**
**आकाशं, 145**
आकाशप्राण, **27**
आक्षिप्य स्थापनीयाः, **11**
**आख्याद्यैक्यादभेदः, 138**
**आख्यावन्तं, 129**
**आचामेदित्यपूर्वाचमनमिह, 135**
**आचारांशस्य, 110**
आत्मज्ञानाभिलाषादनुपरतशुचे, **41**
**आत्मन्यब्रह्मभूते, 178**
आत्मन्येवं परस्मिन्नकृत, **23**
आत्मा तस्यैष, **25**
**आत्मार्थं विश्वसृष्टिः, 70**
**आत्मैक्यं, 148**
**आदावन्ते, 135**
आदेशात्मस्वशब्दैरनितर, **24**
**आदौ जिज्ञास्यतास्तां, 62**
**आनन्दत्वप्रधानं, 134**
**आनन्दानन्त्यमाह, 215**
आम्नातैरैहिकार्थैरविगुण, **22**
**आयुस्सीमामनिष्टैरिह, 189**
**आरूढो, 165**
**आवर्त्या, 187**
**आसीदग्रे, 56**
**आसीनस्यैव, 180**
**आहारस्य, 163**
**आहुत्योर्देहवत्वं, 112**
**इत्थं, 140**
इत्थं विद्यात्रयेण, **27**
**इत्थं शारीरकोक्ते, 219**
**इत्युत्पत्तिक्रमेण, 172**

इष्टापूर्तादिरूपं, 110
ईक्षा तादृक्, 65
उक्तं जन्मादिसूत्रे, 134
उक्तं नित्योपलब्धि, 99
उक्तं पत्या, 118
उक्तं पादैरघानामिति, 205
उक्तः प्राणस्त्रिलोक्या, 104
उक्तानन्यत्वपक्षे, 68
उक्त्वा तत्त्वान्तराणां, 60
उत्क्रान्ति, 93
उत्थानं ज्योतिरादावधिकरणयुगे, 29
उत्सर्गेणापवादं, 122
उद्गीथादावुपास्तिर्भवति, 166
उद्गीथादेर्विशेषे, 150
उद्गीथादौ, 146
उद्गीथे प्राणदृष्टौ, 146
एकं विद्याश्रमार्थं, 170
एकत्वं, 205
एकद्व्यादिस्वभावैर्यदणुभिरथवा, 78
एकस्मिन्नेव, 129, 182
एको नैकः परस्मात्पृथगपृथगपि, 213
एको यस्यास्ति देहः, 66
एतैरेवेति, 196
एवं जीवातिरिक्ते, 56
ऐक्योपास्तावहं, 177
कथ्यन्ते सृष्टिवाक्ये, 215
कर्तव्ये ह्यर्थ उक्ते, 20
कर्ता न ह्यन्यतन्त्रः, 95
कर्ता देवः, 97
कर्तात्मा, 157
कर्तुर्दोषं, 114
कर्तुर्भोक्तृत्वमात्रं, 150
कर्तृत्वं स्यात्, 96

**कर्त्रा तेनैव, 140**

**कर्म प्राक्, 156**

**कर्मज्ञानाक्षवर्गो, 189**

**कर्मोद्धूतिर्मुमुक्षोः, 141**

**कर्मोपास्त्यङ्गभूतं, 181**

**कल्पादौ, 192**

**कल्प्यो, 78, 149**

**कल्प्योपादानमेके, 75**

कल्याणालोकनादेरिव, **35**

**कश्चिद्योगप्रभावान्निज, 117**

**कश्चिन्नित्योऽचिदंशो, 124**

कस्मैचित्सिद्धमर्थं, **16**

**कामं कामं, 118**

**कामानेतांश्च, 146**

**काम्यं, 184**

**कार्यं धर्मैर्विरुद्धैः, 67**

कार्यं यत्कर्मवश्यं, **31**

कार्यत्वात्
स्याद्विवादास्पदमिदमखिलं, **19**

**कार्ये किञ्चित्, 73**

कार्ये व्युत्पत्तिराद्या, **15, 16**

**कार्यैक्ये हि प्रतिज्ञा, 59**

**काले दुःखोपशान्तिं, 95**

**किञ्च प्राप्तेरभावान्न, 159**

**किञ्च प्रारब्धकर्म, 198**

**किञ्च स्वोक्त्यादिभग्नो, 94**

**किञ्चाग्नेय्यादिनीत्या, 174**

**किञ्चादौ, 116**

**किञ्चोत्सर्गापवादक्रममिह, 114**

**कुर्वन्नेवेति, 157**

**कूटस्थात्, 90**

**कृच्छ्रादौ, 175**

**कृत्स्नं कार्यात्मना, 69**

कृत्स्नस्वाध्याय, **9**

**कृष्यादेर्मर्दनादेरपि, 126**
**कैश्चित् ज्ञानत्वमात्रं, 92**
कौक्षेयज्योतिषैक्यं कथितमिह, **29**
**कौषीतक्यागमोक्ता, 200**
**क्लृप्तिर्व्योमादिकेऽपि, 100**
क्षित्याद्यं कार्यताद्यैः, **19**
**क्षेत्रज्ञानां, 96**
गम्भीरे ब्रह्मभागे, **9**
**गीतं शूद्रादिकानामपि, 50**
गौणेक्षासाहचर्यान्न, **23**
चन्द्रे शाखेव, **18**
**चित्तैकाग्र्योपपत्त्यै, 180**
**चैद्यादीनामयोध्यास्थिरचरजनुषां, 199**
**छन्दोगानामुपास्यं, 145**
**छन्दोगैर्वाजिभिश्च, 136**
**छन्दोगोद्गीथशब्दस्तदवयवपरः, 131**
**जन्तूनां, 121**
**जन्म प्राप्तिर्जरायुप्रभृतिषु, 112**
**जन्म व्रीह्यादिनाम्ना, 113**
जन्माद्यैश्चैद्विशेष्यं, **17**
**जाग्रत्स्वप्नौ, 120**
**जातावाचार्यशब्दः, 87**
**जिज्ञास्यत्वेन, 61**
**जीवं ये नित्यमुक्तं, 189**
जीवस्तर्ह्येष आत्मा, **45**
**जीवस्यैकैकशो, 213**
**जीवस्योत्पत्तिमाह, 86**
**जीवादत्यन्तभिन्नः, 176**
**जीवादत्यन्तल्भिन्नः, 98**
**जीवानादित्वमूचे, 120**
**जीवेशौ नित्यभिन्नौ, 208**
**जीवोत्क्रान्त्युक्तिकाले, 193**
**जीवोत्रानाद्यनन्तः, 86**
**जुह्वादिस्तोत्रनीत्या, 159**

जैमिन्युक्तं, **11**
**जैमिन्युक्तापशूद्राधिकरण, 50**
ज्ञातं चेन्नोपलक्ष्यं, **18**
**ज्ञातृत्वं, 92**
**ज्ञातृत्वं पुंस, 94**
ज्ञाते ह्येकत्र, **23**
**ज्ञानं मुक्तेरुपायः, 173**
**ज्ञानत्वे किं फलं, 209**
**ज्यैष्ठ्यश्रैष्ठ्यादिसाम्ये, 132**
ज्योतिःप्राणेन्द्रशब्दाः, **30**
ज्योतिश्शब्दस्तु, **27**
**ज्योतिष्टोमाग्निहोत्रप्रभृतिवत्, 153**
तज्जत्वादेर्हि सर्वं, **38**
**तत्कालाकारिणः, 149**
**तत्तत्सेवा, 216**
तत्तत्स्वप्रत्यनीकव्युदसननियतं, **18**
**तत्तद्भोगप्रतीतेर्गुणघटितपरोपासना, 147**
**तत्तद्वस्तु, 123**
**तत्तद्विद्यासु, 154**
तत्तद्वैशिष्ट्य, **11**
**तत्तादृक्तर्कतन्त्रक्रम, 62**
तत्राद्येऽत्यन्त, **12**
**तत्वज्ञानानुविद्धं, 128**
**तत्वज्ञानेन, 193**
**तन्त्रच्छायानिदाने, 62**
**तर्कैरापातसत्यैरविहतिकथने, 107**
तात्पर्यं ब्रह्मतत्त्वेप्यविहति, **21**
**तादर्थ्यं, 154**
**तादर्थ्यात्, 179**
**तेजः प्राथम्यदृष्टेरमृतवचनतो, 89**
**तेजस्येवास्तु, 191**

**त्यक्तं, 117**
**त्यक्ते, 161**
**त्यागः, 157**
त्रय्यन्त, **8**
**त्रय्यन्तोदन्व, 218**
त्रिष्वत्रोपासितृणां, **38**
त्रेधा सर्वत्र वेदे, **22**
दक्षैराधोरणाद्यैरनुमित, **15**
दह्रं हृत्पुण्डरीके गगनमभिहितं, **44**
दह्राकाशोऽपवर्गप्रद, **45**
**दारालाभे, 164**
दुःखासम्भिन्न, **17**
**दुर्वारा, 78**
दृश्यत्वादेर्निषेधो विकृतिमति, **37**
**दृश्यन्ते, 84**
दृष्टः पूर्वं विकारे, **25**
**दृष्टन्यायेन, 71**
**दृष्टस्याणोःप्रसूतिं, 75**
**दृष्टास्मिन्, 85**
**दृष्ट्युद्देशेतिचारादथ, 159**
**देहं योगीश्वरोपि, 197**
देहत्वात् सप्तधातु, **26**
**देहव्याप्येकमक्षं, 102**
**देहात्मत्वे, 91**
**देहाद्यं, 109**
**देहानां यौगपद्ये, 212**
**देहे देहातिरेके, 91**
**दोषस्स्यान्निग्रहांशो, 96**
**द्यौः पर्जन्योथ, 109**
**द्रव्यं, 90**
**द्रष्टव्यापह्नवेन, 179**
**द्वाभ्यां क्षेप्यं प्रधानं, 52**
**द्वाभ्यां स्मृत्या, 63**
द्वाभ्यामादौ, **14**
द्वेधा वृत्तिः स्तुतौ, **48**

**द्वेधापि ब्रह्मतत्वात्, 208**
**धर्मस्थे, 93**
**धर्मस्याश्लेषनाशौ, 184**
**धर्मो, 176**
**धात्रादेरप्यपेक्ष्यो, 210**
**धीपूर्वं, 183**
**धूत्वेति प्राच्यवाक्यप्रकृत, 51**
**धूमं रात्रिञ्च, 110**
**ध्यानादिं तत्प्रभावं, 217**
**ध्याने, 174**
**ध्यायेयुर्ये, 203**
**न ग्राह्यग्राहकौ, 79**
**न ग्राह्या, 132**
**न द्वारद्वारिक्लृप्तिः, 175**
**न ह्यर्था इन्द्रियाणां, 53**
**नन्वत्राचेतनानां, 73**
**नन्वत्रास्मादितीदं, 187**
**नन्वत्रेच्छानुवृत्तिं, 162**
नन्वत्रोङ्कारमात्रात्रय, **43**
**नन्वद्वैते, 177**
**नन्वाकाशो, 145**
**नन्वाध्यानं, 134**
नन्वाम्नायप्रधानाः, **20**
**नन्विच्छार्थत्वहानिर्जिगमिषति, 161**
**नन्वेवं, 175**
**नश्यत्वारब्धकार्यं, 185**
नह्यङ्गुष्ठप्रमाणं, **46**
**नाङ्गं, 158**
**नाडीजालेतिसूक्ष्मे, 195**
**नादृष्टं, 76**
नाना चेल्लक्षणानि, **17**
**नाना देहा यदि, 212**
**नानाजातीयराशिं, 109**
**नानादेहाप्तिशक्ताः, 48**

**नानाशब्दादिभेदादिदिति, 133, 152**
**नाभुक्तं, 182**
**नामादि, 178**
नामादौ वाक् च, **42**
नामाद्याशान्तवेद्ये, **41**
**नित्यं संबन्धमेके, 76**
**नित्यत्वं, 107**
**नित्यत्वज्ञत्वपूर्वैर्निपुणमभिहितं, 188**
नित्यप्राप्तस्य, **10**
**नित्यस्वात्मस्वरूप, 206**
**निर्गत्य, 198**
**निर्णीतं कर्मकाण्डे, 63**
**निर्णीतं वाक्यजातं, 52**
**निर्दिष्टास्माच्छरीरादिति, 186**
निर्देहे**S**स्मिन्, **25**
**निर्धूते, 76**
**निश्शेषं, 141, 192**
**निष्कामश्रोत्रियस्याप्यतिदिशति, 215**
**निष्कृत्यात्मत्वमस्योदित, 182**
**निष्ठा, 84**
**निस्सीमानन्द, 129**
**नैर्गुण्यं, 116, 121**
नोक्तिं व्याहन्ति लिङ्गं, **29**
**नोपादानं निमित्तं, 59**
न्यायाः सप्तैव साक्षात्, **39**
**पत्यादीनां प्रियत्वं, 57**
**पन्थाः, 141**
**पन्थानं, 204**
**पर्यायौ नामपाठेष्वनुपरिपठितौ, 209**
**पादद्वन्द्वं, 62**
**पादस्यास्याद्यमर्धं, 117**
**पादाभ्यामत्र, 108**

**पादे, 127**
**पादे त्वर्थाः, 115**
**पादेस्मिन्, 87**
**पादैरत्रैवमेकादशभिरपि, 157**
**पारम्यं यच्च साम्ये, 208**
**पारावर्यं विविच्य, 218**
**पाराशर्यः, 220**
**पुंसां भोगापवर्गप्रभृति, 74**
**पुण्यं, 184**
पुत्रस्तेऽभून्न, **16**
**पूर्वं धूमादिमार्गे, 202**
**पूर्वत्राधिक्रियायां, 88**
पूर्वत्रासिद्धरूपैस्स्वमति, **32**
पूर्वन्यायेऽग्निविद्या पुरत, **35**
**प्रक्रान्ता, 147**
प्रख्यातं शुद्धसत्वं किमपि, **26**
प्रख्याताकाशपूर्वस्वविकृतिवहनादक्षराख्यं, **42**
**प्रज्ञा धम्मिल्लमल्ली, 220**
**प्रज्ञातस्वापराधाः, 162**
**प्रत्यङ्ङात्माहमर्थःप्रमितिपरवतां, 96**
**प्रत्यापत्तिप्रकारः, 204**
**प्रत्यूहस्य, 169**
**प्रत्यूहार्हाः, 210**
**प्रत्येकं, 147**
**प्राक् पश्चात्, 80**
**प्रागेवारम्भणोक्तावपहृतविषया, 75**
प्राग्धर्मेऽल्पास्थिरार्थे, **9**
**प्राग्वत्, 131**
**प्राजापत्ये, 83**
**प्राणः प्रागुक्तनीत्या, 104**
**प्राणः सैकादशाक्षस्तदनु, 190**
प्राणद्रष्टातिवादी, **42**
प्राणायत्तं हि, **28**

प्राणेशोऽङ्गुष्ठमात्रः, **46**
**प्राणोपि, 105**
प्राधीतस्यैकरूप, **11**
**प्राप्ताचारातिवृत्तौ, 111**
**प्राप्तुं भोगापवर्गौ, 194**
**प्रामाण्यं कर्मकाण्डे, 85**
**प्रायः स्वस्मिन्, 207**
**प्रायश्चित्तं, 165**
प्रावण्यं प्राक्त्रिवर्गे, **10**
**बाधाभावादकम्पे, 72**
बाह्याकाशश्च यावानयमपि, **44**
**बाह्योक्ताचारभागः, 77**
**बुद्धोसौ, 78**
**बुद्ध्यैक्यं, 80**
**बोधेष्वाकारभेदं, 79**
**ब्रह्मक्षत्रादिदेहेष्वणुरिव, 122**
**ब्रह्मांशत्वे, 166**
ब्रह्मैके निष्प्रपञ्चीकरण, **21**
**ब्रह्मैव, 116**
**भावोभावश्च, 205**
**भीमाभ्यो, 128**
भूयिष्ठानन्तपुण्योपचय, **26**
**भूलोकेशाग्निपूर्वान्, 202**
**भेदः शब्दान्तराद्यैर्विधिषु, 130**
**भेदोपाधिव्यपाये, 58**
**भोक्तृणां, 105**
**भोगस्थानान्यमूनि, 201**
**भोगार्थोपासनानां, 168**
**मन्तव्यत्वे, 167**
**मन्त्रोक्तं भोक्तृभावे, 208**
**मन्वाद्यैः, 106**
**मल्ली शुद्धं प्रसूनं, 207**
**मानामान, 217**
**मायामात्रोक्तिलाभात्, 118**
**मायोदन्वत्यपारे, 98**

**मायोपाधिस्वशक्तिव्यतिकरित, 67**
**मार्गोसावर्चिरादिर्गमयति, 203**
**मिथ्याज्ञानादिचक्रे, 100**
मीमांसायाः कबन्धं, **10**
**मुक्तिर्ब्रह्ण्यपीति, 119**
**मुख्यं ब्रह्मैकमेवेत्यवहितमनसां, 179**
मुख्येक्षा यद्यभीष्टा, **24**
**मृत्पिण्डादेः, 59**
**मेरोरंशः, 99**
**मोक्षाभावे, 171**
**मोक्षे पुण्याद्यभावात्, 212**
**यं यं भावं, 193**
**यज्ञादिव्यापृतत्वादनिभृतकरणे, 162**
**यज्ञादेरङ्गभावान्न, 160**
यत् तत् सेनेश्वरार्यैरगणि, **14**
**यत् दुःखं वर्तते, 170**
यत्प्रीत्यर्थं वचस्तन्निखिल, **21**
**यत्रैकस्यापवर्गः, 197**
**यत्साक्षादित्यमुष्मिन्, 144**
यद्यप्यात्मान्तरादेरनुमितिरनघा, **20**
**यद्यप्याराध्यमूलं, 126**
**यद्यप्युक्तो, 214**
**यद्येवं, 138**
**यद्वा शब्दादिभेदादिति, 152**
यद्वृत्तादेः य एषोऽक्षिणि, **35**
यल्लिङ्गं कारणैकस्थितमिति, **30**
**यस्मिन् पञ्चेतिमन्त्रे, 54**
यस्मिन्नोतं मनोऽन्यैस्सह, **40**
यस्य प्राणश्शरीरं स खलु, **33**
**यस्यामस्थूलतादिः, 142**
**यस्यैतत् कर्म वेद्यः, 56**
**या जीवेनात्मनेति, 106**

यावल्लक्ष्यावबोधं, **18**
**युक्तस्सत्कार्यवाद, 89**
**युज्येरन्, 139**
**यो बालं हन्ति, 166**
**योगाः, 87**
**योगोद्युक्तेषु, 174**
**रागादादौ, 174**
रागान्मीमांसते, **13**
**राजद्विष्टादि, 171**
**रूपादीनां, 153**
**रूपैक्यादैक्यसिद्धौ, 130**
**रोगाद्यारम्भकाणां, 185**
लक्षीभूतोयमेकः, **43**
**वर्णादेः, 164**
**वर्ण्यो, 188**
**वस्विन्द्रादेरुपास्तौ, 176**
**वाक्यार्थज्ञानमात्रं, 170**
**वाक्यैः, 148**
**विद्या कर्माङ्गिका, 170**
विद्या प्रातर्दनी सा, **30**
**विद्याङ्गं, 181**
**विद्याभेदेषु, 150**
**विद्यारूपा, 155**
**विद्यार्थत्वं, 169**
**विद्यास्वाख्यानभेदाः, 160**
**विद्यैक्योद्गीथ, 154**
**विध्यर्थत्वेपि, 159**
विध्युक्त्याधीत्य, **13**
**विश्रान्तिर्न, 76**
**विश्वं त्रैगुण्यवत्त्वात्, 65**
**विश्वं दुःखैकतानं, 70**
**विश्वं द्रव्यादिभेदात्, 219**
विश्वं पादे द्वितीये, **32**
**विश्वं मुक्तस्य, 216**
**विश्वस्यैतस्य, 210**
**विश्वस्त्रष्टुः, 123**

**विश्वात्मानन्तभूमा, 51**
**विश्वारम्भे विवर्तं, 67**
**विश्वेशः श्रीपतिश्चेत्, 61**
**विश्वोपादानवक्त्री, 55**
वीतावीतप्रयोगक्रम, **19**
वृत्तिग्रन्थे तु, **12**
**वृत्तिर्वागादिकं, 188**
**वृद्धिह्रासौ, 82**
**वेदानां, 85**
**वेदानामीशबुद्ध्या, 48**
**वेदान् पूर्वं, 64**
वेदार्थे न्यायचिन्त्ये, **9**
**वैधात्रस्थाननेतृन्, 203**
**व्यस्तो, 151**
व्याचख्युः केपि, **10**
**व्यापारज्ञान, 94**
व्याप्तेस्मिन्नक्षमोतं, **41**
**व्यावर्त्यानन्त्यतस्तद्व्युदसनमपि, 143**
व्युत्क्रम्यात्राद्यतुर्याविभिदधति, **14**
**व्युत्पत्त्या ह्यात्मशब्दः, 57**
**व्योमादिस्थित्यवस्था, 113**
**व्योमैकं, 98**
**शक्तिः, 213**
**शक्तौ कर्तृप्रकृत्योरुपकरण, 68**
शब्दात्मा, **47**
शब्दैस्सद्ब्रह्ममुख्यैः, **27**
**शाखाभेदेषु, 199**
**शाखासु, 130**
**शाखे, 139**
**शाखैक्येध्येतृभेदो, 136**
शास्त्रं त्वेतत्समन्वित्य, **12**
शास्त्रारम्भोपपत्यै, **22**
**शिष्टं, 168**
**शुद्धानन्दे, 127**

शुद्धैरुत्कृष्टधर्मैः, 173
शूद्रादीनां, 50
शैवाद्याख्याविशेषैः, 84
श्रीमद्भूम्यां, 8
श्रुत्यन्तैका, 218
श्लेषश्चेदस्य, 186
षट्पञ्चाशच्छतञ्चेत्यधिकरण, 219
षड्विंशालम्बि, 73
संघाते, 204
संज्ञोपाधिः, 55
संयोगाख्यं, 69
संवादात्, 81
संवादादाक्षपादक्षपण, 65
संसारेनादिसिद्धे मुहुरनुभवतः, 15
संसारोद्विग्नचेता, 108
सच्चासच्च, 82
सच्छब्दार्थातिरिक्तं, 91
सत्त्वं स्वाद्वत्त्यनश्नन्, 34
सत्त्वाद्यान्, 74
सत्यत्वं, 133
सत्यत्वाद्यैः, 143
सत्वं कार्यस्य, 122
सत्वेऽसत्वे, 80
सद्विद्यायां, 144
सन्तत्यात्मा, 172
सन्दिग्धे, 201
सन्मात्रं, 99
सप्त प्राणाश्चरन्ती, 102
सम्पत्तिर्देवतायां, 194
सम्पद्येतान्यदक्षं, 198
सम्प्राप्तो, 200
सम्भृत्यादिर्गुणौघः, 137
सम्राजः, 126
सर्गाद्यावर्त, 216
सर्वं जानाति, 83

**सर्वं सङ्कल्पमात्राल्लभत, 213**
**सर्वं साङ्ख्यास्तु, 88**
सर्वत्वं कर्मभिस्स्वैर्जनिमति, **33**
**सर्वापेक्षेत्यवोचन्ननु, 186**
**सर्वासु ब्रह्म, 152**
**सर्वे जीवाः समाना, 187**
सर्वेभ्यः कल्मषेभ्यो ह्युदित, **26**
सर्वेशाधारतोक्त्या, **45**
**सर्वेषां देहपाते, 111**
**सर्वेषामप्रशस्तं, 196**
**सर्वेष्वानन्त्यवादात्, 103**
**सांख्योक्तप्रक्रियोक्तेः, 61**
**साङ्ख्या वैशेषिकाश्च, 86**
**साधारण्येन, 95**
**साध्यं वा साधनं, 171**
**साध्यं हेतुस्तदङ्गप्रभृति, 81**
**साध्या मुक्तिर्नचेत्, 108**
सामर्थ्यं, **47**
**सामस्त्येनैव, 151**
**सायुज्यं, 214**
**सासौ सासूय, 218**
सिद्धं प्रागेव, **40**
सिद्धे व्युत्पत्तिराद्या, **13**
सिद्धे व्युत्पत्त्यभावे, **14**
**सूक्ता प्रागेव, 173**
**सूत्रस्वारस्यलाभात्, 144**
**सूत्रे मुक्तोप्यनन्याधिपति, 211**
**सेतुं, 124**
**सेतुत्वं, 125**
**सौक्ष्म्यात् तुल्याभिघारात्, 48**
सौत्री सङ्ख्या, **12**
**स्थानं, 119**
**स्थानद्वन्द्वे, 136**
स्थानैक्यादत्र, **36**
**स्पष्टे, 138**

स्पष्टैर्जीवादिलिङ्गैर्युतमिह हि वचः, **39**

**स्मर्ता श्रुत्यैव, 64**

**स्मर्यन्ते, 86**

**स्यादेवं, 49**

स्रष्टा देही, **13**

**स्वज्ञानाद्यं स्वजन्यं, 59**

**स्वप्नेऽर्थाः, 117**

स्वर्लोकादित्य, **38**

स्वस्ति, **8**

**स्वाकारान्नित्य, 206**

**स्वातन्त्र्येण, 54**

स्वातन्त्र्योत्तंसितासु श्रुतिषु, **35**

स्वाधीनाशेषसत्तास्थितियतनतया, **39**

**स्वाधीनो, 195**

**स्वाध्यायप्राप्तये, 158**

**स्वाविर्भावोपवर्गे, 217**

स्वेच्छातस्सर्वहेतुश्शुभगुण, **31**

**हानादेरर्चिरादेरपि, 142**

**हानाद्यन्योन्ययोगः, 155**

**हिंसायोगादशुद्धं, 114**

**हेयं, 122**

**हेयोपादेयमार्गद्वितयमुपदिशन्, 142**